ॐ

पशुपतिमतम्

शिवधर्ममहाशास्त्रम्

पशुपतिमत्स्यपुराणम्



[illegible]

पुस्तकालय

इ.पु. ६६८

सौजन्य :- नारायण प्रसाद योगी
घोराही नगरपालिका वा.नं. ४
चौधेरा

इ.पु. ६७९

ॐ

ॐ 卐 गौः श्रीः शिवौ वेदाः

पशुपतये नमः

पशुपतिमतम्

शिवधर्ममहाशास्त्रम्

पशुपतिनाथदर्शनम्

- योगी नरहरिनाथः

प्रथमम् प्रकाशनम्- शाके-१९२१
संवत्-२०५५ चैत्र शुक्लनवरात्र दुर्गापूजा रामनवमी

सम्पादकौ:- पं. विष्णुप्रसाद अर्याल आत्रेयः
श्रीशस्थापाः

प्रबन्धकः- रामप्रसाद घिमिरे काश्यपः

प्रकाशकः- बृहदाध्यात्मिकपरिषदः
काष्ठमण्डपः गोरखाहिन्दुराष्ट्रम्

प्रथमसंस्करणम्- १००० प्रति

पुनर्मुद्रणाधिकारः- बृहदाध्यात्मिकपरिषदधीनः
मृगस्थलीगोरक्षपीठस्य

मूल्यम्:- नेरू ९५१।-
भारू ६२५।-

टङ्कणः- चन्दन विक्रम शाह

मुद्रकः- चारुप्रिन्टर्स प्रा.लि.डिल्लीवजार-दूरवाणी :४२६०२८

प्राप्तिस्थानम्:- गोरखनाथमन्दिर, मृगस्थली, पशुपति, काष्ठमण्डपः
श्रीवागीश्वरी, कोटिहोमस्थली देवघट्टधाम्नश्चित्रवनस्य
दूरवाणी:-०१-४७३८८७, ०५६-२२५९७

Ac 99862/1675

सम्पादकीयम्

विश्वस्मिन्नेकस्यैव हिन्दुराष्ट्रस्य नेपालस्य संरक्षकत्वेन श्रीपशुपतिनाथो विराजते । पशूनां=ब्रह्मादिस्थावरपर्यन्तानं प्राणिनां यः पतिः=स्वामि, नियन्ता स एव सर्वेषां तद्भक्तानामाराध्यदेवत्वेन विराजते । सृष्टिस्थितिप्रलयस्य हेतुभूत ज्योतिर्लिङ्गात्मक भूतनाथस्य स्वरूपविषये वेदोपवेदेतिहासपुराणेष्वपि सन्ति नैकविधाः प्रसङ्गाः । तादृशपौराणिकग्रन्थेषु सत्सु किमस्यग्रन्थस्यावस्यकेति यदि कश्चन जिज्ञासते तर्हि उमाशंकरयोः संवादात्मकोऽयं ग्रन्थः तेषु सर्वेषु ग्रन्थेषु विलक्षणो विशिष्टश्चेति प्रत्युत्तरं दातुं शक्यते ।
लोकमङ्गलकारकं शिवेतिसार्थकं नामकलयतः कपालिनः सारगर्भितोपदेशपूर्णं शिवधर्मसंग्रहापरनामकं पशुपतिमतमिदमधीत्य कृत्यकर्माणि ज्ञात्वा व्यवहृत्य च स्वजीवनं सफलयितुं जनाः शकनुवन्तीतिमदीयाप्रतीतिः । खेदस्यविषयोऽयं यदेतादृशमहिमयुत ग्रन्थरत्नदर्शनाद् वयमद्यपर्यन्तं वञ्चिता आस्म । स्वीयनाभौस्थितं सुगन्धमज्ञात्वा तद्गन्धग्राहकस्तस्यैवान्वेषणे भ्रान्तो मृग इव वयं स्वयंश्रीपशुपतिमुखोद्गीतं पशुपतिमतमविदित्य कुत्र किमस्तीति जिज्ञासया शास्त्रपर्यालोचनदिशि भ्रान्ता इव भ्रमामः ।

१८३५ मिते वैक्रमाब्दे ब्राह्मीलिपौ लिखितस्यास्य ग्रन्थरत्नस्य देवनागर्यां रूपान्तरणादस्यवैशिष्ट्यं प्रकाशयितुं तदानीन्तना विद्वांसः कृतप्रयत्ना आसन्निति ज्ञायते । तदनन्तरञ्च यथावसरे विद्वांशः कृतप्रयत्ना अप्यस्य प्रकाशने न साफल्यमुपगता इतीतिहासविदैः समुदीरितम् ।

इदानीञ्च- बह्वन्तरायबाधितेनापि मया पशुपतिमतनाम्नोऽस्य दुर्ल्लभग्रन्थस्य सम्पादनविवेचनादिकार्यजातेषु कृतभूरिपरिश्रमाणां विशिष्टैतिहासिकानां ज्ञानकोषाणां नेपालराष्ट्रगौरवभूतानां योगिप्रवराणां श्रीनरहरिनाथस्वामिचरणानामनुज्ञया "कार्यं वा साधयेयं देहं वा पातयेयम्" इति सिद्धान्तमनुसृत्य चारुप्रिण्टर्सेतिनाम्नाख्यातस्य मुद्रणालयस्य सञ्चालकस्य श्रीसरोज नेपालमहाभागस्यात्मीयेन सहयोगेन महता श्रमेण प्रकाशनोपयोगिसम्पादनं विधाय पुस्तकमिदं प्रकाश्यतां नीतम् ।

मया सम्पादनक्रमे प्राप्तपाण्डुलिपौ खण्डितानां पदानां वाक्यानां प्रसङ्गानां वा संस्थापना तथैव विहिता यथोपलब्धम् । इदमेव सम्पादनमधिकृत्य हार्दभावं पद्यद्वयेन प्रकाशयितुमीहे-

शब्दानां वहवो ह्यर्था भवन्ति कथितं वुधैः ।
तस्मान्मया यथालब्धं तथैव स्थापितं पदम् ॥
येषामर्थाः प्रकाशन्ते मदीये मानसे न हि ।
ते शब्दा इह तेनैवरूपेण स्थापिता मया ॥

अत्र गुणैकपक्षपातिभिर्विद्वद्भिः पुस्तकमिदमधीत्य नीरक्षीरविवेकन्यायेन गुणपक्षमङ्गीकृत्य दोषपक्षं विसृज्य त्रुटितस्थलेषु कृपया स्वयं संशोध्य - पठनीयमिति मदीया सविनया काचनाभ्यर्थना विदुषां पुरतः । उक्तञ्चाभियुक्तैः-

न चात्रातीव कर्तव्यं दोषदृष्टिपरं मनः । दोषे ह्यविद्यमानेऽपि तच्चितानां प्रकाशते ॥इति

पुनरपि स्वीयां भावनां स्वनिर्मितैरेव पद्यैर्विनम्रतापूर्वकं प्रकाशयितुं परिस्फुरति मदीयं चेतः-

यदशुद्धमसंवद्धमज्ञानाच्च कृतं मया ।
विद्वद्भिः क्ष्यम्यतां सर्वं विनम्राप्रार्थना मम ॥
सौभाग्यादेव प्राप्नोति जनः सज्जनसङ्गतिम् ।
यया स लक्ष्यमाप्नोति पुष्पेणेव पिपीलिका ॥
विद्वत्सङ्गात् जनो लोके गतिमाप्नोति दुर्लभाम् ।
परम्परागता सूक्तिरियं व्यर्था कथं भवेत् ॥
क्वेदं पाशुपतं शास्त्रं क्वाहं मन्दमतिर्जनः ।
"क्व सूर्यप्रभवो वंशः" कालिदासस्य सूक्तिवत् ॥
गुरोरनुग्रहेणैवं कार्ये सम्पादनात्मके ।
नियोज्यात्मानमधुना मन्येऽहं कृतकृत्यताम् ॥
पशुपति मते ज्ञानं विभाति सागरात्मकम् ।
धर्मो यत्र स्फुरत्यन्तः संस्कृतिर्भाति वैदिकी ॥
यान्निमज्य जनः प्राप्तुं शक्नोति वाञ्छितं फलम् ।
सद्ग्रन्थाराधने सक्तः कोजनोऽसफलो भुवि ॥
पुंण्ये पाशुपते क्षेत्रे शिवधर्मानुयायिनः ।
वञ्चिता वयमद्यापि शिवदर्शन दर्शनात् ॥
तस्मान्नृहरिणा लोकहिताय गुरुणा श्रमात् ।
अन्विष्य दुर्लभो ग्रन्थः साम्प्रतं सुलभः कृतः ॥
शिवे समाश्रितो लोको लोकं व्याप्यस्थितः शिवः ।
तस्माल्लोके शिवं ध्यात्वा शिवंलोको ह्यवाप्नुयात् ॥
जिज्ञासितः शिवः साक्षात् कैलासे जगदम्वया ।
सर्वेषाञ्च हितायेदं शास्त्रं शङ्कर ऊचिवान् ॥
शिवपूजा कथंकार्या शिवधर्मश्च कीदृशः ।
कथञ्च सृष्टिविस्तारः लिङ्गस्य स्थापना कथम् ॥
वटूनाञ्च गृहस्थानां वानप्रस्थाश्रमे सताम् ।
यतीन्नाञ्च स्वधर्माः के कीदृशा विधयोऽपि का ? ॥
कीदृशः पुत्रिका धर्मश्चेत्यादि प्रश्नजालकम् ।
समुत्तर्तुं सहायोऽसौ ग्रन्थराड् भुवि राजते ॥
कर्मणि गहने चास्य सम्पाद्य मुद्रणात्मके ।
योगीनां सहयोगित्वात् नियुक्तेन स्थितं मया ॥
जातं यद्यत् शुभं तत्र कारणं भगवान् शिवः ।
अशुभं यच्च सञ्जातं स दोषः किल मामकः ॥

गहनो विषयो यादृक् समयाल्पस्तथापि च ।
अहर्निश प्रयासाद्धि साम्प्रतमीदृशोऽभवत् ॥
शास्त्राध्ययनशुद्धान्तर्नीरक्षीर विवेकिभिः ।
विद्वद्भिः पठनीयं च संशोध्य त्रुटितस्थले ॥

उक्तमेवाभियुक्तैः-

गच्छतः स्खलनं क्वापि भवत्येवं पमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनः ॥

पुस्तकस्यास्य प्रकाशने सम्पादनकर्मणि प्रेरक गुरुवर योगीनरहरिनाथो येन न केवलं मांप्रेरितमपितु दुर्लभस्यास्य ग्रन्थस्य यथासम्भवमनुदित्य सर्ववेद्यञ्च विहितम् । यस्य प्रेरणया अहं सम्पादनकर्मणि प्रवृत्त स श्रद्धेय गुरुवर मम सर्वदा वन्दनीयो वर्तते ।

दुर्लभं ग्रन्थरत्नमिदं संरक्षणसौभाग्यान्वितः श्रीकृष्णप्रसाद पाण्डेय परिवारः विशेषतः श्रीयादवप्रसाद पाण्डेयो येनेदं ग्रन्थरत्नं प्रकाशनार्थं प्रदत्तम्, नकेवलं दत्तमेव अपितु स्वकीयैः सहयोगिभिस्सह कार्येऽस्मिन् संलग्नोऽस्ति हृदयतः प्रशंसनीयो वर्तते ।

सम्पादनात्मकेऽस्मिन्कार्ये मां सहयोगं कृतवन्तः कमलप्रसाद अर्याल, श्रीश्रीराम पोखेल, श्रीदामोदर भण्डारी, श्रीकृष्णप्रसाद काश्यपः श्रीध्रुवप्रसाद अर्यालः श्रीदण्डपाणि खतिवडा, श्रीभरतप्रसाद अधिकारी, श्रीरामप्रसाद घिमिरे महाभागाः मम हृदयतः धन्यवादार्हाः । टंकणकार्ये संलग्नः श्रीचन्दन विक्रम शाह प्रति हृदयतः साधुवादमूचे । परमात्मीय सहयोगी श्रीसरोजनेपालः चारुप्रिण्टर्समुद्रणालयपरिवारस्य मुद्रणात्मकः सहयोगस्तु स्तुत्यमेव । अन्यच्च यैरस्यप्रकाशने मनवचनकर्मणा प्रत्यक्ष परोक्षतः सहयोगं प्रापितं स्तुत्यकर्माणस्तेसर्वे सर्वेषां धन्यवादार्हाः ।

भगवतः शंकर प्रति भक्तिभावनां विधाय एतादृशं पुण्यकार्यं कुर्वाणाः सर्वेऽपि सत्कर्मिष्ठा जनाः ईश्वरस्य कृपादृष्टिं प्राप्नुयुरिति मदीया भ्यर्थना ईशं प्रति ।

ॐ करचरणकृतं वाक्कायजं कर्मजं वा,
श्रवणनयनजं वा मानसं वाऽपराधम् ॥
विहितमविहितं वा सर्वमेतत्क्षमस्व ॥
जय जय करुणाब्धेः श्रीमहादेव शम्भो ॥

विनीत-
सम्पादकः

“पशुमतितम्” मेरो दृष्टिमा

समादरणीय गुरुवर योगी नरहरिनाथज्यूबाट अनुदित “पशुमतिमतम्” अर्थात् आराध्यदेव भगवान् श्री पशुपतिनाथको मत उहाँको महान् तपश्या र परिश्रमको प्रतिफल हो भन्दा अत्युक्ति नहोला । भगवान् शिवका अनन्यभक्त तथा सरस्वतीका वरद्पुत्र योगीज्यूले हिन्दूत्वको सँस्थागत विकास, सँस्कृत भाषाको उत्थान, राष्ट्रियताको जर्गेना, पूर्विय दर्शनको श्रीवृद्धि, प्रमाणिक इतिहासको लेखन् तथा वैदिक मूल्य मान्यताको पुनःस्थापना सम्वन्धमा हजारौं अमूल्य कृतिहरू रचना गरेर सम्पूर्ण नेपाली जनता तथा विश्वका ॐकार परिवारका सदस्यहरूलाई चीर ऋणी वनाउनु भएको छ । आजीवन विद्यार्थी, पदयात्री, अन्वेषक र चिन्तक योगीजी समाज र संसारलाई सधै दिईमात्र रहनुहुन्छ, केही न आजसम्म लिनुभएको छ र केही लिने अभिलाषा नै देखिन्छ । लाग्छ, वर्तमान मानव समाजमा उहाँजस्तो व्यक्तित्वको उपस्थिति समयको बरदान् नै मान्नुपर्छ । योगीजीको अखण्ड ज्ञान भण्डारबाट उद्घाटित “पशुमतिमतम्” शिवज्ञान सम्वन्धी अजस्रश्रोत त छँदैछ, साथै यसले वाह्य अतिक्रमणबाट दिनानुदिन कान्ति क्षय हुँदैगइरहेको हिन्दूधर्मको यशोबृद्धिमा गहनभूमिका निर्वाह गर्नेछ भन्ने मलाई विश्वास छ ।

कोटीहोमको आयोजना गर्दै देशदेशावरमा विश्व शान्तिको विगुल फुक्दै निर्वाधघुम्ने महात्मा श्रेष्ठ योगीजी जो भोक, तिर्खा, थकाई, विमार र निन्द्रालाई विर्सेर अहोरात्र राष्ट्रको उत्थानमा दत्तचित्त हुनुहुन्छ, का कृतिहरूलाई प्रकाशन गर्न सकेमा सम्पूर्ण विश्वले जीवनोपयोगी, ज्ञानबर्द्धक तथ्यहरू प्राप्त गर्नुका साथै चीरकाल पर्यन्त योगीजीको सम्मान भैरहने कुरा विश्वास गर्न सकिन्छ । हजारौं ग्रन्थहरू प्रकाशन हुन नसक्नाले नष्टहुने अवस्थामा रहेको वेला हामी सम्पूर्ण मिलेर प्रकाशन गर्नसकेमा योगीजीप्रतिको सच्चासेवा यही हुनेछ ।

अन्तमाः जीवनभर मानवमात्रको सेवामा समर्पित सम्पूज्य गुरु योगी नरहरिनाथको ज्ञान भण्डारबाट अन्य यस्तै कृतिहरू प्रवाहित भइरहुन् र गुरुमा सुस्वास्थ्य दिर्घायुको कामना गर्दै कलम रोक्ने अनुमति माग्दछु ।

रामप्रसाद घिमिरे नुवाकोट, मदानपुर-६ दाङ्मै
(हाल गोरक्ष पीठ, वृहद् आध्यात्मिक परिषद् काष्ठमण्डपः)

श्री भगवान् भोलेवाबा श्री पशुपतिनाथको विस्तृत व्याख्यान भएको यो “पशुपतिमतम” पुस्तकमा मैले आर्थिक तथा नैतिक सहयोग गर्न पाएकोमा म ज्यादै गौरवन्वित छु ।

शिवकुमार पाण्डे
वाग्मती अञ्चल नुवाकोट जिल्ला
थान्सिङ्ग गा.वि.स. वार्ड नं.१

ॐ श्री पशुपतिनाथो विजयते

विषय सूचि	पृष्ठ संख्या
शिव भक्तिर्न्नाम प्रथमोऽध्यायः	१
प्रश्नान्ध्यायोनाम द्वितियोऽध्याय	४
लिङ्गोत्पत्तिर्न्नाम तृतियोऽध्यायः	५
शिवालय निर्माणोन्नाम चतुर्थोऽध्यायः	१०
शिवार्चनद्रब्य विधिर्न्नाम पञ्चमोऽध्यायः	१४
नन्दिकेश्वर प्रणीते षष्ठोऽध्यायः	२७
शिवार्चनफल कथनंनाम सप्तमोऽध्याय	४४

अत्र खण्ड़ितः पाण्डुलिप्याम्

शिवोपनिषदि

मुक्ति निर्देशाय प्रथमोऽध्यायः	१
मुक्ति निर्देशाय द्वितियोऽध्यायः	८
शिवगृहनामः तृतियोऽध्यायः	१३
शान्ति गृह्याग्निकार्ये चतुर्थोऽध्यायः	१५
शिवभष्मनाम पञ्चमोऽध्यायः	२३
फलदानोपकाराख्यः षष्ठोऽध्यायः	३१
शिवोपनिषदको आगम	८३
गवामुपनिषदि चाष्टमोऽध्यायः	८५
गोसावित्री नवमोऽध्यायः	१००
गोप्रदान बिधिर्न्नाम दशमोऽध्याय	१०९
नारीजातिको अधिकार	१२३
नन्दिकेश्वर शिवाश्रमो नामैकादशोऽध्यायः	१४३
शिवधर्मोत्तरे षडङ्ग बिधिर्नाम प्रथमोऽध्यायः	१८३
शिवधर्मोत्तरे विद्यादानं नाम द्वितियोऽध्यायः	१९३
शिवधर्मोत्तरे ज्ञानयोगोनाम तृतियोऽध्यायः	२०६
शिवधर्मोत्तरे सत्पात्रप्रदानन्नाम चतुर्थोऽध्यायः	२१२
शिवपूरधर्मगतिर्न्नाम पञ्चमोऽध्यायः	२१९
शिवधर्मोत्तरे षष्ठोऽध्यायः	२२३
पापगतिर्न्नाम सप्तमोऽध्यायः	२३०
संसार गतिर्न्नाम अष्ठमोऽध्यायः	२४६
स्वर्ग्यनारकचिन्ह्रो नवमोऽध्यायः	२६१
ज्ञानयोगोनाम दशमोऽध्यायः	२६४
प्रायश्चित्तंनामः एकादशोऽध्याय	२७७
गोलोकोनाम द्वादशोऽध्याय	२८३
गोलोक शिवलोकश्चः	२८८
शिवधर्मसंग्रहे गर्भोत्पत्तिर्न्नाम प्रथमोऽध्यायः	३२३
शिवधर्मसंग्रहे द्वित्तियोऽध्यायः	३२६
शिवधर्म संग्रहे तृतियोऽध्यायः	३४०
शिवधर्म संग्रहे चतुर्थोऽध्यायः	३४६
शिवधर्मसंग्रहे पञ्चमोऽध्यायः	३५६
शिवधर्मसंग्रहे षष्टोऽध्यायः	३६७
शिवधर्मसंग्रहे सप्तमोऽध्यायः	३८२
शिवधर्मसंग्रहे अष्टमोऽध्यायः	३९२
शिवधर्मसंग्रहे नवमोऽध्यायः	४०२
शिवधर्मसंग्रहे दशमोऽध्यायः	४०५
शिवधर्मसंग्रहे एकादशोऽध्यायः	४१२
सत्यलोके बेदध्यानम्	४२२
शिवधर्मसंग्रहे द्वादशोऽध्याय	४२३

उमामहेश्वर संवादे चातुर्वण्यविभागो नाम

प्रथमोऽध्यायः	४३४
द्वितियोऽध्यायः	४४१
तृतियोऽध्यायः	४४७
चतुर्थोऽध्यायः	४५१
पञ्चमोऽध्यायः	४५५
सप्तमोऽध्यायः	४५९
अष्टमोऽध्यायः	४६२
नवमोऽध्यायः	४६६
दशमोऽध्यायः	४६९
एकादशोऽध्यायः	४७४
द्वादशोऽध्यायः	४७७
त्रयोदशोऽध्यायः	४८१
चतुर्दशोऽध्यायः	४८४
पञ्चदशोऽध्यायः	४८९
षोडशोऽध्यायः	४९६

सप्तदशोऽध्यायः ४९९
अष्टादशोऽध्क्षयः ५०३
उनविंशोऽध्यायः ५०६
विंशोऽध्यायः ५०९
एकविंशतितमोऽध्यायः ५११
द्वाविंशतितमोऽध्यायः ५१७
प्रथमोऽध्यायः ५१९
द्वितियोऽध्यायः ५२३
तृतियोऽध्यायः ५३१
चतुर्थोऽध्यायः ५४०
पन्चमोऽध्यायः ५४५
बृषगुणेनाम षष्ठोऽध्यायः ५५५
सप्तमोऽध्यायः ५५९
अष्टमोऽध्यायः ५७०
नवमोऽध्यायः ५७३
दशमोऽध्यायः ५७७

बृषसार संग्रह

प्रथमोऽध्याय ५८०
शिवाण्ड संख्या नाम द्वितियोऽध्यायः ५८५
अहिंसा प्रशंसा नाम तृतियोऽध्यायः ५८८
यम विभागो नाम चतुर्थोऽध्यायः ५९१
पन्चमोऽध्याय
षष्टोऽध्यायः
सप्तमोऽध्यायः
अष्टमोऽध्यायः
त्रैगुण्यविशेषणीयोनाम नवमोऽध्यायः ६०६
कायतिथेवी बर्णननाम दशमोऽध्यायः ६१०
चतुराश्रम धर्मविधानोनाम नामैकादशोऽध्यायः ६१३
विपुलो पाख्यानोनाम द्वादशोऽध्याय ६१७
गर्भोत्पत्तिर्न्नाम त्रयोदशोऽध्याय ६२९
प्रश्न ब्याकरणे नाम चतुर्दशोऽध्याय ६३३
जिवनिर्णयोनामः पंन्चदशोऽध्यायः ६३९
अध्यात्म निर्णयोनाम षोडषोऽध्यायः ६४१
पूर्वकर्म्मविपाक चिन्हाष्टादशोऽध्यायः ६४६
दानयज्ञविशेषोनामैकोनविंशोऽध्यायः ६५१
पन्चविंशतितत्व निर्णयोनाम विंशोऽध्यायः ६५५
कल्पनिर्णयोनाम एकविंशतितमोऽध्यायः ६६१
द्वाविंशतितमोऽध्यायः ६६५
निद्रोत्पत्तिर्न्नाम त्रयोविंशतितमोऽध्यायः ६७०
शास्त्रवर्णननाम चतुर्बिंशोऽध्यायः ६७३

धर्मपुत्रिकाया संहिताया

साधनप्रकरणनाम प्रथमपटलः ६७९
आसन प्रकरणन्नाम द्वितियपटलः ६९०
धारणावंश प्रकरणन्नाम तृतियपटलः ६९४
ध्यानमार्ग प्रकरणन्नाम चतुर्थपटलः ६९६
सुक्ष्मान्तरायो नाम पञ्चमपटलः ७०७
महा सुक्ष्मान्तरायो नाम षष्ठपटलः ७०९
प्रमादजान्तरायो नाम सप्तमपटलः ७१३
प्रतिभाद्यन्तरायो नाम अष्ठपटलः ७१५
जयोनाम नवमपटल ७१६
चिकित्सानाम दशमपटलः ७२०
चललिङ्गोनाम एकादशपटलः ७२४
धुवलिङ्गोनाम द्वादशपटलः ७२५
बृद्दध्युपायोनाम त्रयोदश पटलः ७२६
विनाशोनाम चतुर्दश पटलः ७२७
प्रत्यानयनन्नाम पञ्चदशपटलः ७२८
सिद्ध्युपायो नाम षोडषपटलः ७३०
राष्ट्रले गर्व गर्नुपर्ने ब्यक्तित्वः ७३३६
संक्षिप्त पञ्चदेवता मानसपूजाः ७३९
स्वागतम् स्वागतम् ७५३
बृहद नेपालको नक्साः ७६४

अथ पशुपतिमते शिव धर्म्मशास्त्रे शिवभक्तिर्न्नाम प्रथमोऽध्याय:

श्री गणेशाय नमः ॥

ॐ नमः शिवाय ॥

देवदेव महादेव शान्तङ्कमललोचन ॥
जगदार्ति हरं देवं शूलपाणिन्नमोस्तुते ॥१॥
नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारभे ॥
त्रैलोक्यनगरारम्भें मूलस्तम्भाय शम्भवे ॥२॥
सर्वकारणशेषस्य जगतः सर्वदा शिवम् ॥
गोब्राह्मणनृपाणाञ्च शिवं भवतु सर्वतः ॥३॥
शिवमादौ शिवं मध्ये शिवमन्तेच सर्वदा ॥
सर्वेषां शिवभक्तानां मनुजानाञ्च नः शिवम् ॥४॥
मेरुपृष्ठे सुखासिनमृषिसंघैः समावृतम् ॥
लोकानुग्रहकर्तारं सर्व्वज्ञनन्दिकेश्वरम् ॥५॥
तेषां मध्येसमुत्थाय मुनिब्रह्मसुतोत्तमः ॥
सनत्कुमारः सुतपाः पृच्छतिस्म यथाविधिः ॥६॥

॥सनत्कुमार उवाच ॥

भगवन्सर्वधर्मज्ञ शिवधर्मपरायणः ॥
श्रोतुकामाः परंधर्म्ममिमंसर्व्वे समागताः ॥७॥
अग्निष्टोमादयो यज्ञा वहुवित्तकृयान्विताः ॥
नात्यन्त फलभूयिष्ठा वह्वायाससमन्विताः ॥८॥
न शक्यन्ते यतः कर्तुमल्पवित्तैर्द्विजातिभिः ॥
सुखोपायमतो ब्रूहि सर्वकामार्थ साधकम् ॥९॥
हिताय सर्व्वसत्वानां शिवधर्मम् सनातनम् ॥

॥नन्दिकेश्वर उवाच ॥

श्रूयतामभिधास्यामि सुखोपायमहत्फलं ॥
परमसर्व्वधर्माणां शिवधर्मं शिवात्मकं १० ॥
शिवेन कथितं पूर्व्वं पार्वत्याः षण्मुखस्य च ॥
गणानान्देवमुख्यानामस्माकञ्च विशेषतः ॥११॥
अज्ञानार्णवमग्नानां सर्व्वेषां प्राणिनामयं ॥
शिवधर्मान्तु यः श्रीमानुध्दारार्थमुदाहृतं । ।१२॥

येन यं शान्तचेतस्कैः शिवभक्त्कैः शिवार्थिभि ॥
संसेव्यते परोधर्मस्ते रूद्रो नात्रसंशयः ॥१३॥
एककालं द्विकालम्वा त्रिकालं नित्यमेव वा ॥
येस्मरन्ति विरूपाक्षं विज्ञेयास्ते गणेश्वराः ॥१४॥
कीर्तयिष्यन्तिये रूद्रं सकृदप्यशुभैर्नराः ॥
सर्व्वपापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि ॥१५॥
येऽर्च्चयन्ति सदा रूद्रं न ते प्रकृति मानुषाः ॥
रूद्रलोकात्परिभ्रष्टास्तेरूद्रा नात्रसंशयः ॥१६॥
जातेनात्मद्रुहा येन नार्चितो भगवान् शिवः ॥
सुचिरं संसरत्यस्मिनसारे दुःखसागरे ॥१७॥
सहानिस्तत्महच्छिद्रं समोहः सान्धमूकता ॥
यः क्षणम्वा मुहूर्तम्वा शर्वमेको नु चिन्तयेत् ॥१८॥
दुर्लभं प्राप्यमानुष्यं येऽर्च्चयन्ति सदा शिवं ॥
तेषां हि सफलं जन्म कृतार्थास्ते नरोत्तमाः ॥१९॥
शिवभक्तिपरां ये तु भवप्रणतमानसः ॥
भवसंस्मरणेयुक्त न ते दुःखस्यभागिनः ॥२०॥
भुवनानिमनोज्ञानि विचित्राऽभरणास्त्रियः ॥
धनम्वा तुष्टिपर्यन्तं शिवपूजाविधेर्फलम् ॥२१॥
ये वाञ्छन्ति महाभोगान्राज्यञ्च त्रिदशात्मके ॥
ते ऽर्च्चयन्ति सदाकालं हरस्य चरणाम्वुजं ॥ २२ ॥
सौभाग्यकान्तिमद्रूपं सत्यं त्यागप्रभावतां ॥
शौर्यंश्च जगतः ख्यातिं शिवमर्च्चयतो भवेत् ॥२३॥
नारुद्रः संस्मरेद्रुद्रं नारुद्रो रुद्रमर्च्चयेत् ॥
नारुद्रः कीर्त्तयेद्रुद्रं नारुद्रोरुद्रमाप्नुयात् ॥२४॥
शिवधर्म्मस्य सारोयं शिवभक्तिः सुनिश्चला ॥
साचाष्टाङ्गी शिवेनोक्ता कार्य्यानित्यं प्रयत्नतः ॥२५॥

श्री भगवानुवाच ॥

मद्भक्तजनवात्सल्यम्पूजायाश्चानुमोदनं ॥
स्वयं मेऽभ्यर्च्चनं कुर्य्यात्ममार्थेचाङ्गचेष्टितं ॥२७॥
मत्कथाश्रवणे भक्तिः स्वरनेत्राङ्गविक्रिय ॥
ममानुसंस्मरेन्नित्यं यश्चमामुपजीवति ॥२८॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ॥
स विप्रेन्द्रोमुनिः श्रीमान् स यतिः स च पण्डितः ॥२९॥

न मे प्रियश्चतुर्वेदोमद्भक्तः श्वपचोऽपि यः ॥
तस्मै देयन्ततो ग्राह्यं स च पूज्योयथाह्यहम् ॥३०॥
शिवभक्ताय यद्दानं भक्त्याकिञ्चित्प्रदीयते ॥
तदहन्तत्त्रिगृह्णामि तेनानन्त तदुच्यते ॥३१॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥
तस्याहन्न प्रणस्यामि स च मे न प्रणस्यति ॥३२॥
यो मान्न सर्व्वगम्यश्चेन्नरः सर्वमयिस्थितं ॥
स माम्पर्व्वतदुर्ग्गेषु मार्गमाणो विपद्यते ॥३३॥
यो मां सर्व्वगतं पश्येत्सर्व्वश्च मयिसंस्थितः ॥
तस्याहन्नित्यमात्मस्थः स च नित्यं मयिस्थितः ॥३४॥

॥नन्दिकेश्वर उवाच ॥

सुदुर्ल्लभा शिवे भक्तिः दुर्ल्लभञ्च शिवार्च्चनं ॥
दुर्ल्लभञ्च शिवेदानं शिवहोमश्च दुर्ल्लभः ॥३६॥
सुदुर्ल्लभं शिवज्ञानं तदभ्यासोपि दुर्ल्लभः ॥
सुदुर्ल्लभतरं यज्ञं जपध्यानं शिवात्मकं ॥३७॥
सुदुर्ल्लभा तपः प्राप्तिस्तदभ्यासोपि दुर्ल्लभः ॥
सुदुर्लभमिदं ज्ञात्वा शिवभक्तिं समाश्रयेत् ॥ ३८॥
इत्येष वः समासेन शिवधर्मो ऽखिलक्रमात् ॥
निर्द्दिष्टः प्रथमेऽध्याये शेषोऽसौ च प्रविस्तरः ॥३९॥
नमस्तेभ्यो मनुष्येभ्यो ये शिवं शरणङ्गताः ॥
येषां दिवा च रात्रौ च नित्यं शिवगतस्मृतिः ॥४०॥
नमस्कारादिसंयुक्तं शिव इत्यक्षरद्वयं ॥
जिह्वाग्रे वर्त्तते यस्य सफलन्तस्य जीवितं ॥४१॥
इमं यः पठते नित्यं श्रृणुयाद्वापि भक्तितः ॥
स मुक्तः सर्व्वपापैस्तु शिवलोके महीयते ॥४२॥
डाकिन्यो विविधाकारा राक्षसा प्रेतनायकाः ॥
न तस्य पीडाङ्कुर्व्वन्ति तथान्येपि हि हिंसकाः ॥४३॥
शत्रवो नाशमायान्ति सङ्ग्रामे जयमाप्नुयात् ॥
सर्वरोगैर्न्नवाध्यन्ते आपदो नस्पृशन्ति तं ॥४४॥
धनमायुर्य्यशो विद्यां प्रभावमतुलं लभेत् ॥
शुभेनोपचयंयाति नित्यं पूर्णमनोरथः ॥

इति शिवधर्म्मशास्त्रे शिवभक्तिर्न्नाम प्रथमोऽध्यायः ॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मप्रश्नाध्यायो नाम द्वितीयोऽध्यायः ॥

ॐ नमः शिवाय

॥सनत्कुमार उवाच ॥

लिङ्गार्च्चनविधिं पुण्यं श्रोतुमिच्छामि तत्वतः ॥
त्वत्प्रसादाद्विशेषेण भगवन्नन्दिकेश्वर ! ॥१॥
यत्पुण्यं स्थापितेलिङ्गे कृतेयच्च शिवालये ॥
सम्मार्ज्जने च यत्पुण्यं यत्पुण्यमुपलेपने ॥२॥
नीराजनौषधी वीज स्नाने मङ्गलवादने ॥
पुण्यं यच्चार्घ्यदानेन तोयस्नानेन यद्‌भवेत् ॥३॥
पञ्चगव्यपयस्नाने दधिस्नाने च यद्‌भवेत् ॥
घृतस्नाने च यत्पुण्यं घृताभ्यङ्गेच यत्फलं ॥४॥
मधुस्नाने च यत्पुण्यं पुण्यमिक्षुरसेन च ॥
उद्वर्तनान्तरस्नाने कुशपुष्पोदकेन च ॥५॥
सुवर्णरत्नतोयैश्च गन्धचन्दनवारिभिः ॥
कर्प्पूरागुरुतोयेन स्वच्छतोयेन यत्फलं ॥६॥
विलेपनैश्च गन्धाद्यैर्विलिप्तेयत्फलं लभेत् ॥
तालवृन्तप्रदानेन प्रदाने चामरस्य च ॥७॥
मुक्तपुष्पार्चने यच्च मालया लिङ्गपूरणे ॥
पुष्पमण्डपकार्यश्च पुष्पमाला वलम्वने ॥८॥
पूजाभक्तिविशेषैश्च वेद्यां मालाववेष्टने ॥
पुष्पजातिविशेषेषु धूपेष्वपि च यत्फलं ॥९॥
वस्त्राऽलङ्कारदाने च दीपदर्प्पणदर्शने ॥
भक्ष्यभोज्यान्नपानादि फलकन्दनिवेदने ॥१०॥
प्रदक्षिणे नमस्कारे प्रणामस्तोत्रजं फलं ॥
पताकाध्वजछत्राणां घंटावादित्रशंखया ॥११॥
वितानवस्त्र पूजायां बलिहोमे क्रियासु च ॥
गवाँश्च भृत्यनागानां भूमिदानेन यत्फलं ॥१२॥
ग्रामखेटपुराणाश्च दशदाने च यत्फलं ॥
तत्पालनाऽ पहारे च पुण्यापुण्यन्तु यद्‌भवेत् ॥१३॥
यतीनामन्नदानानि पात्रोपकरणानि च ॥
दत्वा किं लभते पुण्यं दत्वा चापि प्रतिश्रयं ॥१४॥
यदंप्यन्यद्‌भवेत्सूक्ष्ममज्ञानान्न प्रचोदितं ॥
तत्सर्व्वङ्कथयास्माकं भक्तानामनुकम्पया ॥१५॥

इति शिवधर्म्म प्रश्नाध्यायो द्वितीयः ॥२॥

अथ पशुपतिमते शिवधर्मशास्त्रे नन्दिकेश्वरप्रोक्तायां संहितायां लिङ्गात्पत्तिर्न्नाम

तृतीयोऽध्यायः ॥

ॐ नमःशिवाय

नन्दिकेश्वर उवाच ॥

त्वमतीव शिवेभक्तः पद्मयोनिसुतोत्तम ॥
तेन ते निखिलं वक्ष्ये श्रृणुष्वेकाग्रमानसः ॥२॥
पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे ॥
विवादः सुमहानासीद्ब्रह्माविष्णोः परस्परं ॥३॥
अहंकर्त्ता त्वहं कर्ता न मदन्योजगत्पतिः ॥
एवमाह हरिं ब्रह्मा ब्रह्माणंश्च हरिस्तथा ॥४॥
तयोर्द्दर्प्पापहाराय प्रवोधार्थश्च वेतयोः ॥
मध्ये समुत्थितं लिङ्गमैश्वर्य्यन्तेजसः परं ॥५॥
ज्वालामालावृतन्दिव्यमप्रमेयगुणोदितं ॥
योजनायुतविस्तीर्णः स्थितन्तद्विमलेन्यपि ॥६॥
ज्वालाभिर्म्मोहितौ तस्य लिङ्गस्य सुरसत्तमौ ॥
तदा विस्मयमापन्नौ पश्यन्तावमराधिपं ॥७॥
गतावूर्द्धमधस्तस्य संप्रधार्य्यपरस्परं ॥
अधोवलम्वये विष्णोरगादूर्द्ध पितामहः ॥८॥
अदृष्ट्वातदधश्चोर्द्ध तौ समेत्य परस्परं ॥
कृताञ्जलिपुटौ भूत्वा लिङ्गन्तुष्टवतुस्तथा ॥९॥
लिङ्गमध्ये परं लिङ्गं स्थितं द्वादशसम्मितं ॥१०॥
समाधिस्तोत्र सम्पन्नौ दृष्टवन्तौ शिवात्मकं ॥
नैवतत्काञ्चनं रौप्यं ताम्रं स्फटिकमौक्तिकं ॥११॥
लक्षमात्रं स्थितं शान्तं केवलन्तच्छिवात्मकं ॥
तयोस्तुष्टो महादेवः प्रोवाच वरमुत्तमं ॥१२॥
कारणत्वमनुज्ञाय तत्रैवान्तरधीयत ॥
प्राञ्जलिः प्रणतो विष्णुर्ब्रह्मापिं वेद तत्परः ॥१३॥
पूर्व्वं लिङ्गं समभ्यर्च्य तदाकार्याणि चक्रतुः ॥
ब्रह्मा ब्रह्माक्षरैर्द्दिव्यैर्ल्लिङ्गः पूजयते सदा ॥१४
गन्धपुष्पादिभिर्न्नित्यं विष्णुः पूजयते शिवं ॥
तदा प्रभृति ब्रह्माद्याः प्रतिस्थाप्यसुरासुराः ॥१५॥
तल्लिङ्गानुकृतं लिङ्गमीजिरे मुनयस्तथा ॥
परंभूतशरीरस्थं लिङ्गं क्षेत्रमनादियत् ॥१६॥

यदाद्यमैश्वरन्तेज स्तल्लिङ्गम्पञ्चसंज्ञकं ॥
कल्पान्ते तस्य लिङ्गस्य लीयन्ते सर्व्वदेवता: ॥१७॥
दक्षिणे लीयते ब्रह्मा वामेविष्णु: सनातन: ॥
हृदयेचैव गायत्री सर्व्वदेवोत्तमोत्तमा: ॥१८॥
मूर्ध्निर्नतिष्ठन्ति वै वेदा: सषडङ्ग पदक्रम: ॥
जठरे लीयते सर्व्वं जगत्स्थावरजङ्गमं ॥१९॥
पुनरुत्पाद्यते तस्माद्ब्रह्माद्यं सचराचरं ॥
आकाशं लिङ्गमित्याहु: पृथिवी तस्य पीठिका ॥२०॥
आलयं सर्वभूतानां लीयनाल्लिङ्गमुच्यते ॥
तस्माल्लिङ्गं प्रतिष्ठाप्य सर्वदेवभवोभवं ॥२१॥
स्थापितन्तेन सर्व्वंस्यात् पूजितश्च न संशय: ॥
यो लिङ्गं द्वेष्टि सम्मोहात्सर्व्वदेव नमस्कृतं ॥२२॥
नरो नरकगामीस्यात् तस्य संभाषणादपि ॥
ब्रह्मापूजयते नित्यं लिङ्गशैलमयं शुभं ॥२३॥
तस्य संपूजनात्तेन प्राप्त ब्रह्मत्वमुत्तमं ॥
शक्रोपि देवराजेन्द्रो लिङ्ग मणिमयं शुभं ॥२४॥
भक्त्या पूजयते नित्यं तेनेन्द्रत्त्वमवाप स ॥
लिङ्गं हेममयं कान्तं धनदोर्च्चयते सदा ॥२५॥
तेनासौ धनदो देवो धनदत्वमवाप्तवान् ॥
विश्वेदेवामहात्मानो रौप्यं लिङ्गम्मनोरमं ॥२६॥
यजन्ति विधिवद्भक्त्या तेनविश्वत्वमाप्नुवन् ॥
वायु: पूजयते भक्त्या लिङ्गं पित्तलसंभवं ॥२७॥
वायुत्वं प्राप्तवान्तेन अनौपम्यगुणान्वितं ॥
इन्द्रनीलमयं लिङ्गं विष्णुरर्च्चयते सदा ॥२८॥
विष्णुत्वं प्राप्तवान्तेन अर्च्चितेन सनातनं ॥
वसव: कासिकं लिङ्गं पूजयन्ति विधानत: ॥२९॥
प्राप्तास्तेन महात्मानो वसुत्वं सुमहोदयं ॥
अश्विनौ पार्थिवं लिङ्गं पूजयन्तौ विधानत: ॥३०॥
तेनतावश्विनौ देवौ दिव्यदेहगतावुभौ ॥
स्फटिकं निर्म्मलं लिङ्गं वरुणोऽर्च्चयते सदा ॥३१॥
वरुणत्वं हि संप्राप्त तेन वृद्धिबलान्वितं ॥
लिङ्गं रत्नमयं पुण्यमग्निर्यजति भाक्तितः ॥३२॥
अग्नित्वं प्राप्तवान्तेन तेजोरूपमनिन्दितं ॥
ताम्रलिङ्गं सदाकालं भक्त्यादेवोदिवाकर: ॥३३॥

त्रिष्कालं यजनात्तेन प्राप्तं सूर्यत्वमुत्तमं ॥
बुद्धेनाप्यर्चितं लिङ्गं जम्वुनदमयं शुभम् ॥३४
तेनवुद्धत्वमाप्नोति सदाशान्तमवस्थितं ॥
आर्हतस्तु सदाकालं पुष्पलिङ्गार्च्चनात्परं ॥३५॥
तेनार्हत्वमवाप्नोति योगञ्चापि सुदुर्ल्लभं ॥
मुक्ताफलमयंलिङ्गं सोमः पूजयते सदा ॥३६॥
तेन सोमोपि संप्राप्तः सोमत्वं सततोज्वलं ॥
प्रवालकमयंलिङ्गं यजन्तः यन्नगोत्तमाः ॥३७॥
तेननागेषु भोगाढ्याः प्रयान्ति परमं पदं ॥
कृष्णायसमयं लिङ्गं पूजयन्त्यसुरोत्तमाः ॥३८॥
राक्षसाश्च महात्मानस्तेन ते ऽमितविक्रमाः ॥
त्रपुसीसमयं लिङ्गं पिशाचा पूजयन्ति तत् ॥३९ ॥
तेन दिव्यगुणैर्युक्ताः प्रयान्ति परमं पदं ॥
त्रैलोहितमयंलिङ्गं यजन्ते गुह्यकादयः ॥४०॥
तेन भोगगुणोपेताः प्रयातीश्वरमन्दिरं ॥
वज्रलोहमयं लिङ्गं यजन्ते मातरः सदा ॥४१॥
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमंपदं ॥
एवं देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः ॥४२॥
पूजयन्ति सदाकालमीशानं सुरनायकम् ॥
सर्व्वालैङ्गमयो लोकाः सर्व्वलिङ्ग प्रतिष्ठितं ॥४३॥
तस्मात्सदार्च्चयेल्लिङ्गं यदिच्छेत्सिद्धि मात्मनः ॥
लिङ्गे देवो महादेवः साक्षादेव व्यवस्थितः ॥४४॥
अनुग्रहाय लोकानां तस्माल्लिङ्गं प्रपूजयेत् ॥
यो न पूजयते भक्त्या लिङ्गं त्रिभुवनेश्वरं ॥४५॥
नासौ स्वर्ग्गस्य मोक्षस्य क्षिप्रंभवति भाजनं ॥
यस्तु पूजयते नित्यं लिङ्गं त्रिभुवनेश्वरं ॥४६॥
स स्वर्ग्गमोक्षराज्यानां क्षिप्रं भवति भाजनं ॥
तस्मादेकमना भूत्वा यावज्जीवं प्रतिज्ञया ॥४७॥
अर्च्चयीत महादेवमापन्नोपि सदावुधः ॥
वरं प्राण परित्यागः शिरसच्छेदनं वरं ॥४८॥
नत्वेवापूज्यभुञ्जीत भगवन्तन्त्रिलोचनं ॥
एवं निर्व्वहते यस्तु यावज्जीवं प्रतिज्ञया ॥४९॥
मानुष्ये चर्म्मणावद्धः स रुद्रो नात्र संशयः ॥
न हि लिङ्गार्च्चनात्पुण्यमस्ति चाभ्यधिकं क्वचित् ॥५०॥

इति विज्ञाय यत्नेन पूजनीयः सदाशिवः ॥
महेश्वरपरं सर्व्वं त्रैलोक्यं सचराचरं ॥५१॥
तस्मात्सर्वेषु भूतेषु गतिर्देवो महेश्वरः ॥
तस्मात्सर्व्व प्रयत्नेन शिवमेव समाश्रयेत् ॥५२॥
सागराणां क्षयोप्यस्ति क्षीयते हिमवानपि ॥
रुद्रलोके क्षयो नास्ति शङ्करे शरणङ्गते ॥५३॥
एष्टव्याः वहवः पुत्राः शिवतन्त्रानुसारिणः ॥
समुद्धरन्ति ते गोत्रं रज्जुकुपे यथाघटं ॥५४॥
समुद्धृत्य तथाप्येते कुलानामेकविंशतिं ॥
शिवत्वं यान्ति वै क्षिप्रंधर्म्माधर्म्म विवर्जितः ॥५५॥
लिङ्गद्वयं समाख्यातं सचराचरमेव च ॥
चरं प्राणेति विख्यातमचरं पार्थिवादिषु ॥५६॥
चरे सदा वसत्येव प्रीतियुक्तो महेश्वरः ॥
अचरोयत्तु संस्कारो द्वयं नित्यं सदाशिवं ॥५७॥
जङ्गमस्यापमानेन स्थावरो निष्फलो भवेत् ॥
तस्माल्लिङ्गद्वयं प्राज्ञो नावमन्येत जातुचित् ॥५८॥
लिङ्गमित्थं प्रतिष्ठाप्य सर्व यत्नैर्व्विधानतः ॥
यत्पुण्यं फलमाप्नोति तदेकाग्रमनाः श्रृणु ॥५९॥
सर्वयज्ञतपोदान वेदतीर्थेषु यत्फलं ॥
तत्फलं कोटिगुणितं स्थाप्यलिङ्गं लभेन्नरः ॥६०॥
यो लिङ्गं स्थापयेदेकं विधिपूर्व्वं सदक्षिणं ॥
सर्व्वागमोदितं पुण्यं कोटि कोटि गुणं लभेत् ॥६१॥
मातृजं पितृजञ्चैव यांश्चैवोद्वहते स्त्रियं ॥
कुलैकविंशमुत्तार्य्य रुद्रलोके महीयते ॥६२॥
भुक्त्वाच विपुलान्भोगान् प्रलये समुपस्थिते ॥
ज्ञानयोगं समासाद्य स तत्रैव विमुञ्चति ॥६३॥
अथवा राज्यमाकांक्षेज्जायते स भवान्तरे ॥
सप्तद्वीप समुद्रायाः क्षितेरधिपतिर्व्वशी ॥६४॥
यः कृत्वा पार्थिवं लिङ्गमर्च्चयीत सुरेश्वरं ॥
इहैव धनवान् श्रीमान् सोऽन्तेरुद्रश्च जायते ॥६५॥
त्रिसन्ध्यमर्च्चयेल्लिङ्गं कृत्वाविम्बेन पार्थिवं ॥
शतैकादशिकायां तु तस्य पुण्यफलं श्रृणु ॥६६॥
अनेनैव सदेहेन रुद्रः सन्तिष्ठते क्षितौ ॥
पापहा सर्व्वमर्त्यानां दर्शनस्पर्शनादिभिः ॥६७॥

उद्धृत्य दिवि संस्थाप्य कुलानामेकविंशतिं ॥
सहायैः सहितो नित्यं मोदते दिवि रुद्रवत् ॥६८॥
शालिपिष्टमयं लिङ्गं सर्व्वगन्धोपशोभितं ॥
कुसुमैः सुसुगन्धैश्च फलैश्च विविधैस्तथा ॥६९॥
भक्षभोज्यैरशेषैश्च घृतदीपैश्च संयुतं ॥
तस्य दक्षिणपार्श्वेतु विन्यसेदगुरुं वुधः ॥७०॥
तस्यपश्चिम भागे तु शोभनास्तु मनच्छिलां ॥
उत्तरे चन्दनन्दद्याद्धरितालन्तु पूर्व्वतः ॥७१॥
एवं वित्तानुसारेण विधिं कृत्वा सुविस्तरं ॥
कृष्णपक्षे चर्तुद्दस्यां शिवाय विनिवेदयेत् ॥७२॥
क्रीडन्नेव च यः कुर्य्याल्लिङ्गं कश्चिचद्द्विजोत्तमः ॥
यत्फलं हि भवेत्तस्य तन्मेनिगदितं श्रृणु ॥७३॥
सर्व्वपापैर्व्विनिर्म्मक्तः सर्व्वदुष्टविवर्जितः ॥
निष्कलः सर्व्वगोभूत्वा प्रविशेच्छिवमव्ययं ॥७४॥
अप्यङ्गुलकमात्रंवा लिङ्गं कृत्वा यः पूजयेत् ॥
यन्मयन्तन्मयंवापि शिवलोके महीयते ॥७५॥
पुण्यक्षयात्क्षितिं प्राप्य राजाभवतिधार्मिकः ॥
वेदवेदाङ्गतत्वज्ञो ब्राह्मणोपि स जायते ॥७६॥
मृद्भस्मगो सकृत्पिण्डं तथा वालुकयाऽ पि वा ॥
कृत्वालिङ्गं सुसंपूज्य मोदते दिवि रुद्रवत् ॥७७॥
कुशाप्सु तरुकुड्ये वा अप्यङ्गुल्योऽ पि योलिखेत् ॥
क्रीडयासायुतं कल्पं भवेत्सोपि गणेश्वरः ॥७८॥
पांशुना क्रीडमानोपि लिङ्गं कुर्यात्तु यो नरः ॥
प्रत्यन्ते लभते राज्यमसपत्नमकण्टकं ॥७९॥
सूक्ष्मेनापि प्रयोगेनाप्रमेयं पुण्यसञ्चयं ॥
शिवमर्च्चयतो यस्मात्तस्मान्नित्यन्तमर्च्चयेत् ॥८०॥
हीनवंशेषु ये याताः पापिष्टा येऽपि मानवः ॥
भवभाव प्रपन्नास्ते मुच्यन्ते नात्र संशयः ॥८१॥
अलिङ्गीलिङ्ग रूपेण यो लिङ्गमुपजीवति ॥
पच्यते स महाघोरे नरके कालमक्षयं ॥८२॥
ॐ नमः शिवाय शान्ताय कारणत्रय हेतवे ॥
निवेदयामि चात्मानं त्वङ्गतिः परमेश्वर ! ॥८३॥
अनादि देव देवेश विश्वेश्वर महेश्वर ॥
सर्वज्ञ ज्ञान विज्ञान प्रदानैक नमोस्तुते ॥८४॥

अनन्त कान्ति सम्पन्न अनन्तासनसंस्थितः ॥
अनन्त शक्ति संभोगः परमेश नमोस्तुते ॥८५॥
परात्पर परातीत उत्पत्तिस्थिति कारिणे ॥
सर्व्वार्थसाधनोपाय विश्वेश्वर नमोस्तुते ॥८६॥
बहुरूप महारूप सर्वरूपोत्तमोत्तमः ॥
पशुपाशार्णवातीत वरप्रद नमोस्तुते ॥८७॥
स्वभाव निर्मलाभोग सर्वव्यापि सदाशिवे ॥
योग योगि महायोगिन् योगेश्वर नमोस्तुते ॥८८॥
निरञ्जन निराकार संसार निरयप्लवे ॥
प्रसन्नपरमेशान योगेश्वर नमोस्तुते ॥८९॥
जित्वा चपलभावेन खोदतोऽ सि हि यन्मया ॥
तत्क्षन्तव्यमनौपम्य कस्त्वां स्तोति गुणार्णवं ॥९०॥
तस्मात्सर्वप्रयत्नेन श्रृणुयाद्भावितो नरः ॥
पापकञ्चुकमुत्सृज्य प्राप्नोति परमं पदम् ॥९१॥
लिङ्गोत्पत्तिं महापुण्यं यः श्रृणोति नरःसदा ॥
नोत्पद्यते स संसारे स्थानं प्राप्नोति शाश्वतं ॥९२॥
इति शिवधर्म्म शास्त्रे नन्दिकेश्वर प्रोक्तायां
संहितायां लिङ्गोत्पत्तिर्नाम तृतीयोऽध्यायः ॥३॥

अथ पशपतिमते शिवधर्मे शास्त्रे नन्दिकेश्वर प्रोक्तायां संहिताया शिवालय निर्माणन्नाम

चतुर्थोऽध्यायः ॥

ॐ नमः शिवाय ।

॥नन्दिकेश्वर उवाच ॥१॥

शिवभक्तामहोत्साहाः शिवधर्म परायणाः ॥
संयता धर्म्मसम्पन्नासर्व्वार्थान्साधयन्ति ते ॥२॥
सर्वद्वन्दविनिर्म्मुक्ताः नित्यमुद्युक्तचेतसः ॥
परोपकारनिरताः गुरुशुश्रूषणे रताः ॥३॥
आर्ज्जवा मृदवः स्वस्था अनुकूलाः प्रियम्वदाः ॥
अमानिनो वुद्धिमन्तस्त्यक्तस्पर्धागत स्पृहाः ॥४॥
शान्ता स्मितमुखाभद्राः नित्यं स्वागतवादिकाः ॥
अल्पवाचोल्पवक्तारः शूराः त्यागविशारदाः ॥५॥

शौचाचारेण सम्पन्नाः दयादाक्षिण्यतत्पराः ॥
दम्भमात्सर्यनिर्म्मुक्ता याथातथ्य प्रभाषिणः ॥६॥
संविभागपरः प्राज्ञा अशठाञ्चाप्य कुत्सिताः ॥
विषयेष्वपि निर्लेपाः पद्मपत्रमिवाम्भसा ॥७॥
न दीना नापिमलिना न च रोगवशानुगाः ॥
भवन्ति भवितात्मानः श्रद्धाः साधुनिषेविताः ॥८॥
न पादपाणिवाक्चक्षुः श्रोतु शिश्नोदरेवुधाः ॥
चापल्यन्नैव कुर्व्वन्ति सर्व्वव्यसनवर्ज्जिताः ॥९॥
रुद्रात्मानो रुद्रपरा रुद्राशा रुद्रभावनाः ॥
इत्याचार समायुक्ताः भवन्ति भुविमानवाः ॥१०॥
एकान्त भक्तिमास्थाय गुणेष्वेतेषु वर्तताः ॥
पूजनीयः शिवोनित्यं परापर विभूतये ॥११॥
किञ्चिद्वेदमयं पात्रं किञ्चित्पात्रं तपोमयं ॥
आगमिष्यति तत्पात्रं यत्पात्रं तारयिष्यति ॥१२॥

॥नन्दिकेश्वर उवाच ॥ १३

सर्वेषामेवपात्राणामतिपात्रं महेश्वरं ॥
यजनात्त्रायते यस्मादतीव नरकार्णवात् ॥१४॥
तस्यपात्रस्य माहात्म्याद्दानंभवति चाक्षयं ॥
तस्मा त्तस्मै सदादेयमप्रमेयफलार्थिभिः ॥१५॥
शिवेदत्तं हुतं तप्तं पूजावलिनिवेदनं ॥
एकस्यानन्तफलदं तद्भवेन्नात्र संशयः ॥१६॥
भक्त्यावित्तानुसारेण कुर्य्यात्प्रासाद सञ्चयं ॥
अल्पं महति वा पुण्यं तुल्यमाढ्य दरिद्रयोः ॥१७॥
वित्तशाठ्येन यः कुर्याद्धर्ममाढ्योपि सन्नरः ॥
न तत्फलमवाप्नोति प्रलोभा क्रान्तमानसः ॥१८॥
तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयत् ॥
भागद्वयञ्च धर्म्मार्थमनित्यं जीवितं यतः ॥१९॥
भक्त्या प्रचोदितः कुर्य्यादल्पवित्तोऽपि यो नरः ॥
महाविभवसारोपि नकुर्य्याद्क्तिवर्ज्जितः ॥२०॥
सर्व्वस्वमपि यो दद्याच्छिवेभक्ति विवर्ज्जितः ॥
नासौधर्म्ममवाप्नोति भक्तिरेवात्र कारणं ॥२१॥
न च तपोभिरत्युग्रै र्न्न च सर्व्व महामखैः ॥
गच्छेच्छिव पुरं दिव्यं युक्तभक्तिर्भवात्मकः ॥२२॥

अनन्त कान्ति सम्पन्न अनन्तासनसंस्थितः ॥
अनन्त शक्ति संभोगः परमेश नमोस्तुते ॥८५॥
परात्पर परातीत उत्पत्तिस्थिति कारिणे ॥
सर्व्वार्थसाधनोपाय विश्वेश्वर नमोस्तुते ॥८६॥
बहुरूप महारूप सर्वरूपोत्तमोत्तमः ॥
पशुपाशार्णवातीत वरप्रद नमोस्तुते ॥८७॥
स्वभाव निर्मलाभोग सर्वव्यापि सदाशिवे ॥
योग योगि महायोगिन् योगेश्वर नमोस्तुते ॥८८॥
निरञ्जन निराकार संसार निरयप्लवे ॥
प्रसन्नपरमेशान योगेश्वर नमोस्तुते ॥८९॥
जित्वा चपलभावेन खोदतोऽ सि हि यन्मया ॥
तत्क्षन्तव्यमनौपम्य कस्त्वां स्तोति गुणार्णवं ॥९०॥
तस्मात्सर्वप्रयत्नेन श्रृणुयाद्भावितो नरः ॥
पापकञ्चुकमुत्सृज्य प्राप्नोति परमं पदम् ॥९१॥
लिङ्गोत्पत्तिं महापुण्यं यः श्रृणोति नरःसदा ॥
नोत्पद्यते स संसारे स्थानं प्राप्नोति शाश्वतं ॥९२॥
इति शिवधर्म्म शास्त्रे नन्दिकेश्वर प्रोक्तायां
संहितायां लिङ्गोत्पत्तिर्नाम तृतीयोऽध्यायः ॥३॥

अथ पशपतिमते शिवधर्मे शास्त्रे नन्दिकेश्वर प्रोक्तायां संहिताया शिवालय निर्माणन्नाम

चतुर्थोऽध्यायः ॥

ॐ नमः शिवाय ।

॥नन्दिकेश्वर उवाच ॥१॥

शिवभक्तामहोत्साहाः शिवधर्म परायणाः ॥
संयता धर्म्मसम्पन्नासर्व्वार्थान्साधयन्ति ते ॥२॥
सर्वद्वन्दविनिर्म्मुक्ताः नित्यमुद्युक्तचेतसः ॥
परोपकारनिरताः गुरुशुश्रूषणे रताः ॥३॥
आर्ज्जवा मृदवः स्वस्था अनुकूलाः प्रियम्वदाः ॥
अमानिनो वुद्धिमन्तस्त्यक्तस्पर्धागत स्पृहाः ॥४॥
शान्ता स्मितमुखाभद्राः नित्यं स्वागतवादिकाः ॥
अल्पवाचोल्पवक्तारः शूराः त्यागविशारदाः ॥५॥

शौचाचारेण सम्पन्नाः दयादाक्षिण्यतत्पराः ॥
दम्भमात्सर्यनिर्म्मुक्ता याथातथ्य प्रभाषिणः ॥६॥
संविभागपरः प्राज्ञा अशठाञ्चाप्य कुत्सिताः ॥
विषयेष्वपि निर्लेपाः पद्मपत्रमिवाम्भसा ॥७॥
न दीना नापिमलिना न च रोगवशानुगाः ॥
भवन्ति भवितात्मानः श्रद्धाः साधुनिषेविताः ॥८॥
न पादपाणिवाक्चक्षुः श्रोतु शिश्नोदरेवुधाः ॥
चापल्यन्नैव कुर्व्वन्ति सर्व्वव्यसनवर्ज्जिताः ॥९॥
रुद्रात्मानो रुद्रपरा रुद्राशा रुद्रभावनाः ॥
इत्याचार समायुक्ताः भवन्ति भुविमानवाः ॥१०॥
एकान्त भक्तिमास्थाय गुणेष्वेतेषु वर्तताः ॥
पूजनीयः शिवोनित्यं परापर विभूतये ॥११॥
किञ्चिद्वेदमयं पात्रं किञ्चित्पात्रं तपोमयं ॥
आगमिष्यति तत्पात्रं यत्पात्रं तारयिष्यति ॥१२॥

॥नन्दिकेश्वर उवाच ॥ १३

सर्वेषामेवपात्राणामतिपात्रं महेश्वरं ॥
यजनात्त्रायते यस्मादतीव नरकार्णवात् ॥१४॥
तस्यपात्रस्य माहात्म्याद्दानंभवति चाक्षयं ॥
तस्मा त्तस्मै सदादेयमप्रमेयफलार्थिभिः ॥१५॥
शिवेदत्तं हुतं तप्तं पूजावलिनिवेदनं ॥
एकस्यानन्तफलदं तद्भवेन्नात्र संशयः ॥१६॥
भक्त्यावित्तानुसारेण कुर्य्यात्प्रासाद सञ्चयं ॥
अल्पं महति वा पुण्यं तुल्यमाढ्य दरिद्रयोः ॥१७॥
वित्तशाठ्येन यः कुर्याद्धर्ममाढ्योपि सन्नरः ॥
न तत्फलमवाप्नोति प्रलोभा क्रान्तमानसः ॥१८॥
तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयत् ॥
भागद्वयञ्च धर्म्मार्थमनित्यं जीवितं यतः ॥१९॥
भक्त्या प्रचोदितः कुर्य्यादल्पवित्तोऽपि यो नरः ॥
महाविभवसारोपि नकुर्य्याद्क्तिवर्ज्जितः ॥२०॥
सर्व्वस्वमपि यो दद्याच्छिवेभक्ति विवर्ज्जितः ॥
नासौधर्म्ममवाप्नोति भक्तिरेवात्र कारणं ॥२१॥
न च तपोभिरत्युग्रै र्न्न च सर्व्व महामखैः ॥
गच्छेच्छिव पुरं दिव्यं युक्तभक्तिर्भवात्मकः ॥२२॥

मृन्मयैष्टक शैलम्वा यश्च कुर्य्याच्छिवालये ॥
त्रिसप्तकुल संयुक्तो रुद्रलोके महीयते ॥२३॥
मृण्मयात्कोटि गुणितं पुण्यं स्याद्दारुभिः कृते ॥
कोटि कोटि गुणं पुण्यं दारवोदिष्ट कामये ॥२४॥
ऐष्टकाद्विगुणंपुण्यं शैलजे स्याच्छिवालये ॥
मृच्छैलयोः समंज्ञेयं पुण्यमाढ्य दरिद्रयोः ॥२५॥
यत्रतत्र यतः कुर्य्यात्कर्तुः पुण्यं शिलेष्टयोः ॥
नवं पुराणे रहितं तस्मात्कुर्याच्छिवालयं ॥२६॥
अष्टोष्ट कालमायुक्तं यः प्रकुर्याच्छिवालयं ॥
विधूय पापसंघातं सोपि गच्छेच्छिवालयं ॥२७॥
रुद्रलोके लभेत्सोपि विमानं सर्व्वकामिकं ॥२८॥
पुष्पमाला परिक्षिप्तं दिव्यगन्धोपशोभितं ॥
दोलाविक्षेप संयुक्तं घण्टाचामरभूषितम् ॥२९॥
मुक्तादामवितानेन शोभितं सूर्यसम्प्रभं ॥
अप्सरोगणसङ्कीर्णं सर्व्वकाम सुखप्रदं ॥३०॥
तत्रोषित्वा महाभोगैः कोटिकोट्ययुतं सुखी ॥
क्रमादागत्यलोकेस्मिन्राजा भवति धार्मिकः ॥३१॥
दृष्ट्वा परिहरेज्जन्तुन् मार्ज्जन्या मृदुसूक्ष्मया ॥
शनैः सन्मार्ज्जनं कुर्वन् चान्द्रायण फलं लभेत् ॥३२॥
नाहारप्रतिजीर्णाया बन्ध्यायाः क्षीणवत्सयोः ॥
रोगार्त्तायाः प्रसूताया गोश्च गोमयमाहरेत् ॥३३॥
खसंस्थङ्गोमयं ग्राह्यं स्थानेवा पतितं शुभे ॥
उपर्य्यधस्तात्संत्यज्य प्रत्यग्रं जन्तुवर्ज्जितं ॥३४॥
वस्त्रपूतेन तोयेन यः कुर्य्यादुपलेपनं ॥
पश्यन् परिहरन् जन्तून् चान्द्रायण फलं लभेत् ॥३५॥
यः कुर्य्यात्सर्व्व कार्य्याणि वस्त्र पूतेन वारिणा ॥
स मुनिः स महासाधुः स योगी स शिवं व्रजेत् ॥३६॥
क्षरन्ति सर्व्वदानानि यज्ञहोमवलिक्रियाः ।
नक्षरन्ते महादानमभयं सर्व्वदो हि मां ॥३७॥
नैरन्तर्य्येण य कुर्य्यात्पक्षं सम्मार्ज्जनार्च्चनं ॥
युगकोटिशतं दिव्यं शिवलोके महीयते ॥३८॥
तस्यान्ते स चर्तुव्वेद, सुरूपः प्रियदर्शनः ॥
आद्यः सर्व्वगुणोपेतो राजाभवति धार्मिकः ॥३९॥

सम्पर्केणापि यः कुर्यान्नरः कुम्भं शिवालये ॥
सोपि देहक्षये ज्ञानं प्राप्य शान्तिमवाप्नुयात् ॥४०॥
रुद्रदेव निकायेषु कश्चिज्ज्ञानमवाप्नुयात् ॥
कश्चिदेवात्र मेदिन्यालब्ध्वा ज्ञानं विमुच्यते ॥४१॥
तावद्भ्रमन्ति संसारे दुःखशोकपरिप्लुताः ॥
नभवन्ति शिवे भक्ता यावत्सर्व्वेपि देहिनः ॥४२॥
समासक्तं यथा चित्तं जन्तो र्विषयगोचरे ॥
यदि नाम शिवेप्येवं को न मुच्येत वन्धनात् ॥
य कुर्यात्कुट्टिमां भूमिं दर्पणोदरसन्निभां ॥
नानावर्णविचित्राम्वा विचित्र कुसुमाकुलां ॥४३॥
क्वचित्कलशं विन्यासां पंङ्कजै रुपशोभितां ॥
मनोभिरम्या सौम्याश्च शिवायतन संसदि ॥४४॥
यावद्दण्डा भवेभूमिः समन्ताच्च सुशोभना ॥
तावद्युग सहस्राणि रुद्रलोके महीयते ॥४५॥
सुधा प्रलिप्तं यः कुर्यात्सर्वयत्नैः शिवालयं ॥
तावत्पुण्यं लभेत्सोपि यावदायतने कृते ॥४६॥
प्रत्यन्तं यः प्रकुर्व्वीत शम्भोरायतनं वुधः ॥
धवलं क्षीरसुधया यथाशोभिश्च वर्णकैः ॥४७॥
यावत्यहानि कुरुतेधवलं तच्छिवालयं ॥
तावद्युग सहस्राणि रुद्रलोके महीयते ॥४८॥
कारयेच्चित्रशास्त्रज्ञैः यत्नाच्चित्रं शिवालये ॥
रुद्रावतारक्रीडाद्यैः प्रयोगैरागमोदितै ॥४९॥
यावत्स रुद्ररूपाणि सुरूपाणि तु लेपयत् ॥
तावद्युग सहस्राणि रुद्रलोके महियते ॥५०॥
खाण्डस्फटित संस्कारं यः कुर्य्यात्तु शिवालये ॥
आरामावसथाद्येषु लभते मौलिकं फलं ॥५१॥
नास्ति रुद्रसमोदेवो नास्ति रुद्र समो गुरुः ॥
नास्ति रुद्रसमं ज्ञानं नास्ति रुद्रसमन्तपः ॥५२॥
निर्धौत मलपङ्काय स्वभाव मलमूर्तये ॥
सितभस्माङ्गरागाय देवेशाय नमोस्तुते ॥५३॥
नीलकण्ठाय शर्व्वाय अजायामित मूर्त्तये ॥
बहुरूपाय शान्ताय शाश्वताय नमोस्तुते ॥५४॥
महा भोगीन्द्रहाराय पिङ्गलोचन चारवे ॥
विचित्ररचिताङ्गाय अनन्ताय नमोस्तुते ॥५५॥

परात्पर परेशाय सर्व्वगाय महात्मने ॥
अतीत गुणसंघाय विश्वेशाय नमोस्तुते ॥५६॥
सर्वप्रणतदेवायस्वयमप्रणतात्मने ॥
पूज्यानामपि पूज्याय अनाथाय नमोस्तुते ॥५७॥
ब्रह्मेन्द्रविष्णु वन्द्याय उत्पत्तिस्थिति हेतवे ॥
भुक्तिमुक्ति प्रदानाय संस्तुताय नमोस्तुते ॥५८॥
वामाय वामरूपाय वामचाराय भाविने ॥
वामकान्तार्द्ध देहाय अनन्ताय नमोस्तुते ॥५९॥
य इदं कीर्तयेन्नित्यं प्रासादाध्याय मुत्तमं ॥
सर्वपापविनिर्म्मुक्तो सगोपत्यमवाप्नुयात् ॥६०॥

इति शिवधर्म्मशास्त्रे नन्दिकेश्वर प्रोक्तायां संहितायामायतनाध्याय श्चतुर्थः ॥

अथ पशुपति मते शिवधर्म शास्त्रे शिवार्चन द्रव्य विधिर्न्नाम ॥

पञ्चमोऽध्यायः

ॐ नमः शिवाय ।

॥ नन्दिकेश्वरउवाच ॥१॥

लिङ्गमूर्तमहेशस्य शिवस्य परमेष्ठिनः ॥
स्नानकाले प्रकुर्व्वीत जय शब्दाभिमङ्गलं ॥२॥
त्रिशूलवज्रशंखाऽव श्रीवत्सस्वस्तिकादिभिः ॥
हेमरौप्यादि पात्रेषु कल्पितै र्गोमयादिभिः ॥३॥
नानावर्णकसंयुक्तै रक्षितैस्तिलतण्डुलैः ॥
भक्तैश्च दधिसंयुक्तै यथाशोभं प्रपूरितैः ॥४॥
द्रव्यैः पिष्ट प्रदीपाद्यै श्चूताश्वत्थादि पल्लवैः ॥
ओषधीभिश्च मेध्याभिः सर्व्व वीजैर्य्यवादिभिः ॥५॥
दिवसेषूत्तमेषु च ॥ पर्व्वकालेषु सर्व्वेषु ॥
अष्टम्यादिषु सर्व्वेषु पुष्प पूर्णाभिपर्व्वणि ॥६॥
शंखभेर्य्यादिनिर्घोषै र्महागेयस्वरैर्य्युतैः
कुर्य्यान्नीराजनी लिङ्गं शिवमुद्दिश्य मङ्गलैः ॥७॥
यावत्पर्व्वाणिविधिना कुर्यान्नीराजनं शिवे ॥
तावद्युग सहस्राणि रुद्रलोके महीयते ॥८॥
स्नानकाले त्रिसन्ध्या श्च यः कुर्य्याद्गेयवादिनः ॥
नृत्यं वा मुखवाद्यं वा तस्य पुण्य फलं श्रृणु ॥९॥

यावन्त्यहानि कुरुते गेयनृत्यादि वादितं ॥
तावद्वर्ष सहस्राणि रुद्रलोके महीयते ॥१०॥
कपिलापञ्चगव्येन कुशवारि प्लुतेन च ॥
स्नापयेन्मन्त्रपूतेन ब्रह्मस्नानं हि तत्स्मृतं ॥११॥
एकाहमपि प्योलिङ्गे ब्रह्मस्नानं समाचरेत् ॥
विधूय सर्व्वपापानि शिवलोके महीयते ॥१२॥
कपिला पञ्चगव्येन दधि क्षीर प्लुतेन च ॥
स्नानं शतगुणं ज्ञेयं तरुस्नानान्न संशयः ॥१३॥
देवाग्निकार्य्यमुद्दिश्य देह शुद्धिंश्च शाश्वतीं ॥
कपिलामा हरेत्तस्मान्मुनिदेवादि निर्म्मितां ॥१४॥
कापिल्यं यः पिवेच्छूद्रः शिवसंस्कार वर्ज्जितः ॥
पच्यते स महाघोरे सुचिरं नरकार्णवे ॥१५॥
वर्षकोटि सहस्रेषु यत्पापं समुपार्ज्जितं ॥
घृताभ्यङ्गेन लिङ्गस्य दहेत्सर्वन्न संशयः ॥१६॥
कल्पकोटि सहस्रेण यत्पापं समुपार्ज्जितं ॥
घृतस्नानेन तर्त्सर्व्वंदहत्यग्निरिवेन्धनं ॥१७॥
कृष्णाष्टम्यां घृतस्नानं कृत्वालिङ्गे सकृन्नरः ।
कुलैकविंशमुद्धृत्य शिवलोके महीयते ॥१८॥
अयुतं यो गवान्दद्याद्दोग्ध्रीणं वेदपारगे ॥
वस्त्रहेमादि युक्तानां क्षीरस्नानेन तत्फलं ॥१९॥
सकृदाढकेन पयसा यो लिङ्गं स्नापयेन्नरः ॥
राजतेन विमानेन सोमलोकं स गच्छति ॥२०॥
दध्नातु स्नापयेल्लिङ्गं सकृद्भक्त्या च यो नरः ॥
सर्वपापविर्निम्मुक्तो विष्णुलोके महीयते ॥२१॥
मधुना स्नापयेल्लिङ्गं सकृद्भक्त्यापि यो नरः ॥
सर्वपापविर्निमुक्तो बन्हिलोके महीयते ॥२२॥
स्नापये त्तिलतैलेन हस्तयस्त्रोद्भवेन च ॥
श्वेतपीतक पुष्पैर्व्वा वायुलोके महीयते ॥२३॥
स्नानमिक्षुरसेनापि यो लिङ्गं सकृदाचरेत् ॥
लभेद्वैद्याधरं लोकं सर्व्व कामसमन्वितं ॥२४॥
फलोदकेन यो लिङ्गं सकृत्स्नापयते नरः ॥
उत्सृज्य पाप कलिलं पितृलोके महीयते ॥२५॥
सितेनभस्मनास्नाप्य सकृल्लिङ्गं प्रमोदते ॥
चन्द्रांशु निर्म्मलः शुद्धः शिववत्सोम मण्डलं ॥२६॥

वस्त्रपूतेन तोयेन यो लिङ्गं स्नापयेन्नरः ॥
सर्व्व कामसु तृप्तात्मा वारुणं लोकमाप्नुयात् ॥२७॥
कुशोदकेन यो लिङ्गं सकृत्स्नापयते नरः ॥
काञ्चनेन विमानेन ब्रह्मलोके महीयते ॥२८॥
गन्धचन्दनतोयेन स्नापयेत्सकृदीश्वरं ॥
गान्धर्वलोकमाप्नोति गन्धर्वैश्च स पूज्यते ॥२९॥
पुष्पोदकेन सावित्रं कौवेरं हेमवारिणा ॥
रत्नोदकेन चाप्यैन्द्रं लोकं प्राप्य स मोदते ॥३०॥
पाटलोत्पलखण्डानि करवीराणि सर्वदा ॥
स्नानकालेषु योज्यानि स्थिराणि सुरभीणि च ॥३१॥
एषामेकतमं स्नानं कृत्वातु भक्तितः शिवे ॥
विधूय पापकलिलं शिवलोके महीयते ॥३२॥
कर्प्पूरागरुतोयेन यो लिङ्गं स्नापयेन्नरः ॥
सर्व्वपापविनिर्म्मुक्तः शिवलोके महीयते ॥३३॥
मन्त्रांष्टशतजप्तेन विमलेनाम्भसा शिवं ॥
स्नापयित्वा सकृद्भक्त्या शिवलोकमवाप्नुयात् ॥३४॥
स्नाप्य लिङ्गं सकृद्दध्ना कृष्णाष्टम्यामुपोषितः ॥
कुल सप्तकमुद्धृत्य शिवलोके महीयते ॥३५॥
पितृनुद्दिश्य यो लिङ्गं स्नापयेच्छीत वारिणा ॥
तृप्ताः स्वर्ग्गं गमिष्यन्ति पितरो नरकादपि ॥३६॥
लिङ्गं शीताम्वुनास्नाप्य धारोष्णपयसाततः ॥
स्नाप्य पश्चात् घृतस्नानं तत एव विशिष्यते ॥३७॥
एवं स्नान त्रयं कृत्वा पूजयित्वातु भक्तितः ॥
अश्वमेध सहस्रस्य फलमाप्नोति मानवः ॥३८॥
मृत्कुम्भात्ताम्रजैः कुम्भैः स्नानं शतगुणोत्तरं ॥
रौप्यैर्ल्लक्षोत्तरं पुण्यहैमैः कोट्यधिकं भवेत् ॥३९॥
लिङ्गस्य दर्शनं पुण्यं दर्शनात्स्पर्शनं शुभं ॥
स्पर्शनादर्च्चनं श्रेष्ठं घृतस्नानमतः परं ॥४०॥
इहामुत्र कृतं पापं घृतस्नानेन देहिनां ॥
क्षमते शंकरोयस्मात्तस्मात्स्नानं समाचरेत् ॥४१॥
दशापराधं तोयेन क्षीरेण तु शतं क्षयेत् ॥
नैरन्तर्येण यो मासं घृतस्नानं समाचरेत् ॥
एकविंशः कुलोपेतः क्रीडते दिवि रुद्रवत् ॥
स्नानं पलशतं ज्ञेयमभ्यङ्गं पञ्चविंशतिः ॥४२॥

पलानां द्वि सहस्राणां महास्नानं प्रकीर्त्तितं ॥
घृताभ्यङ्गे. घृतस्नाने यत्नाल्लिङ्गं विरुक्षयेत् ॥४३॥
ये न गोधूमजैश्चूर्णैः कषायैर्गन्धयोजितैः ॥
सुखोष्णेनाम्भसा वापि स्नापयेत्तदनन्तरं ॥४४॥
घर्षयेद्विल्वपत्रैश्च तत्पीठञ्च विशोधयेत् ॥
दशधेनु सहस्राणि यद्दत्वा लभते फलं ॥४५॥
तत्फलं लभते सर्व्वं लिङ्गस्योद्वर्त्तने कृते ॥
अर्घ्यं पुष्पजलोपेतं यः शिवाय निवेदयेत् ॥४६॥
स पूज्यते सर्वलोकैः शिववन्मोदते चिरं ॥
गन्धोदकेन सन्मिश्रमुदकार्घंशतोत्तरं ॥४७॥
पञ्चगव्यसमायुक्तमर्घं लक्षगुणोत्तरं ॥
यो ऽष्टाङ्गमर्घं संपूर्णं शिवमूर्ध्नि निवेदयेत् ॥५०॥
दशवर्ष सहस्राणि रुद्रलोके महीयते ॥
आपः क्षीरकुशाग्राणि दधिसर्प्पिस्सतण्डुलं ॥
तिलाः सिद्धार्थकाश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः ॥५१॥
दारवेणार्घ पात्रेण दत्वार्घ्यं यत्फलं भवेत् ॥
तस्माद्दशगुणं पुण्यं मृत्पात्रेण प्रकीर्त्तितं ॥५२॥
ताम्रपात्रार्घदानेन पुण्यं शतगुणोत्तरं ॥
पलाशताम्रपात्राभ्यां ताम्रपात्र समंभवेत् ॥५३॥
रूप्यपात्रेण विज्ञेयमर्घं शतगुणोत्तरं ॥
सुवर्णपात्रविन्यस्तमर्घं कोटिगुणोत्तरं ॥५४॥
एवंस्नानार्घनैवेद्य वलिधूपादिषु क्रमात् ॥
पात्रान्तर विशेषेण तत्फलञ्चोत्तरोत्तरं ॥५५॥
रौप्यपात्र प्रदानेन यत्पुण्यं वेदपारगे ॥
तस्माच्छतंगुणं पुण्यं शिवे मृत्पात्र दानतः ॥५६॥
हेमपात्राणि यद्दत्वा पुण्यंस्याद्वेगपारगे ॥
लाम्रपात्र प्रदानेन तस्माच्छतगुणं भवेत् ॥५७॥
पलकोटि सुवर्णस्य यो दद्याद्वेदपारगे ॥
शिवाय रौप्यपात्रेण त्यस्य पुण्यं ततोधिकं ॥५८॥
हेमपात्राणि यो भक्त्या शिवाय विनिवेदयेत् ॥
नशक्यं तत्फलं वक्तुं पुण्यानन्त्यादशेषतः ॥५९॥
तुल्यमेवफलं प्रोक्तं शिवेनाढ्यदरिद्रयोः ॥
तयोरप्यधिकं पुण्यं यः शिवे भावना धिकः ॥६०॥

विभवेसति यो मोहात् नकुर्याद्विधिविस्तरं ॥
न तत्फलमवाप्नोति प्रलोभाक्रान्त मानसः ॥६१॥
तस्मात्पत्रैः फलैः पुष्पै र्नैवेद्याद्यैस्तु यत्फलं ॥
तदनन्तफलं ज्ञेयंभक्तिरेवात्र कारणं ॥६२॥
लिङ्गस्य लेपनं कुर्य्याद्दिव्यगन्धैः सुगन्धिभिः ॥
वर्षकोटिशतं दिव्यं शिवलोके महीयते ॥६३॥
गन्धानुलेपनात्पुण्यं द्विगुणश्चन्दनस्य तु ॥
चन्दनादगुरोर्ज्ञेयं पुण्यमष्टगुणाधिकं ॥६४॥
कृष्णागुरोर्व्विशेषेण द्विगुणं फलमिष्यते ॥
तस्माच्छतगुणं पुण्यं कुङ्कुमस्य विशेषतः ॥६५॥
चन्दनागुरु कर्पूरैः प्लक्षपिष्टैः सकुङ्कुमैः ॥
लिङ्गं पर्य्याप्तमालिप्य कल्पकोटिशतं दिवि ॥६६॥
संविज्यतालवृन्तेन लिङ्गमेभिः प्रलेपितं ॥
दशवर्षसहस्राणि वायुलोके महीयते ॥६७॥
भक्त्यानिवेद्य रुद्राय तालवृन्तं सुशोभनं ॥
दशवर्षसहस्राणि लभते परमं पदं ॥६८॥
मायूरव्यजनन्दत्वा शिवायातीव शोभनं ॥
वर्षकोटिशतं दिव्यं शिवलोके महीयते ॥६९॥
दत्वा शिवाय चमरं मणिदण्डविभूषितं ॥
हेम रौप्यादि दण्डम्वा तस्य पुण्यफलं श्रृणु ॥७०॥
चामराशक्त हस्ताभि र्द्दिव्यस्त्रीपरिचारितः ॥
महाभोग विमानेन चिरं शिवपुरे वसेत् ॥७१॥
पुष्पैरारण्यसंभूतैः पवित्रैर्ग्गिरिसम्भवैः ॥
अपर्य्युषितनिच्छिद्रैः प्रोक्षितैर्ज्जन्तुवर्ज्जितैः ॥७२॥
आत्मारामोद्भवैर्व्वापि पुष्पैः संपूजयेच्छिवं ॥
पुष्पजातिं विशेषेण भवेत्पुण्यं विशेषतः ॥७३॥
तपः शीलगुणोपेतं पात्रे वेदस्यपारगे ॥
दशदत्वा सुवर्णानि यत्फलन्तदवाप्नुयात् ॥७४॥
अर्कस्य पुष्पमेकञ्च यः शिवाय निवेदयेत् ॥
दशदत्वा सुवर्णानि यत्फलन्तदवाप्नुयात् ॥
एवं पुष्पविशेषेण फलं तदधिकं भवेत् ॥
ज्ञेयं पुष्पान्तरन्तेन यथास्यान्तन्निवोधतः ॥७५॥
अर्क्कपुष्पसहस्रेभ्यः करवीरं विशिष्यते ॥
करवीरसहस्रेभ्यो विल्वपत्रं विशिष्यते ॥७६॥

विल्वपत्रसहस्रेभ्यो वकपुष्पं विशिष्यते ॥
वकपुष्पसहस्रेभ्यो एकं धतुरकम्परम् ॥७७॥
धत्तुरकसहस्रेभ्यो वृहत्पुष्पं विशिष्यते ॥
वृहत्पुष्पसहस्रेभ्यो द्रोणपुष्पं विशिष्यते ॥७८॥
द्रोणपुष्पसहस्रेभ्यो अपामार्गो विशिष्यते ॥
अपामार्गसहस्रेभ्यः कुशपुष्पं विशिष्यते ॥७९॥
कुशपुष्पसहस्रेभ्यः शमी पुष्पं विशिष्यते ॥
शमीपुष्पसहस्रेभ्यः श्रीमन्निलोत्पलं परं ॥८०॥
सर्व्वेषामेव पुष्पाणां प्रवरन्नीलमुत्पलं ॥
नीलोत्पलसहस्रेण यो मालां सम्प्रयच्छति ॥८१॥
शिवाय विधिवद्भक्त्या तस्य पुण्यफलं श्रृणु ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥८२॥
वसेच्छिवपुरे नित्यं शिवतुल्य पराक्रमः ॥
शेषानां पुष्पजातीनां यत्फलं परिकीर्तितं ॥८३॥
स तत्फलानुसारेण शिवलोके महीयते ॥
शमीपुष्पवृहत्याञ्च कुसुमं तुल्यमुच्यते ॥८४॥
करवीरसमा ज्ञेया जातीविजयपाटला ॥
श्वेतमन्दारकुसुमं शितपद्मेन तत्समं ॥८५॥
नागचम्पकपुन्नागधत्तूरकसमाः स्मृताः ॥
केतकञ्चांति मुक्ताञ्च कुन्दयूथीमदन्तिक ॥८६॥
शिरीष सर्ज्जवन्धूककुसुमानि विवर्ज्जयेत् ॥
गन्धहीनमपि ग्राह्यं पवित्रं यत्कुशादिकं ॥८७॥
सात्विकं तद्धि कुसुमपवित्रञ्च तासमं ॥
कनकानिकदम्वानि रात्रौ देयानि शङ्करे ॥८८॥
दिवा शेषाणि पुष्पाणि अर्धरात्रौ च मल्लिका ॥
प्रहरं तिष्ठते जाती करवीरमहर्न्निशं ॥८९॥
कीटकेशापवित्राणि शीर्ण पर्य्युषितानि च ॥
स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ॥९०॥
मुकुलैर्न्नार्च्चयेद्देवमपक्वन्न निवेदयेत् ॥
फलंक्वथितमिच्छन्ति यत्नात्पक्वमपि त्यजेत् ॥९१॥
अलाभेन तु पुष्पाणां पत्राण्यपि निवेदयेत् ॥
पत्राणामप्यलाभेन फलान्यपि निवेदयेत् ॥९२॥
फलानामप्यलाभेन तृणगुल्मौषधीरपि ॥
ओषधीनामलाभेन भक्त्या भवति पूजितः ॥९३॥

प्रत्येकमुक्तं पुष्पाणां दानात्सौवर्णिकं फलं ॥
सुनिवद्धेषु तेष्वेव द्विगुणं फलमिष्यते ॥९४॥
यः सुगन्धैर्म्मुक्तपुष्पैः सम्यग्लिङ्गं प्रपूजयेत् ॥
सर्व्वपापविनिर्मुक्तः शिवलोके महीयते ॥९५॥
मालाभि र्वा सुगन्धीभिर्य्यो लिङ्गं पूजयेन्नरः ॥
सवेदिकविशेषेण सोऽनन्तफल मश्नुते ॥९६॥
विल्वपत्रैरखण्डैश्च सकृल्लिङ्गं प्रपूजयेत् ॥
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥९७॥
धत्तूरकैश्च यो लिङ्गं सकृत्पूजयते नरः ॥
स गो लक्ष फलं प्राप्य लभते परमं पदं ॥९८॥
वृहस्तीकुसुमैर्भक्त्या यो लिङ्गं सकृदर्च्चयेत् ॥
गवामयुत दानस्य फलं प्राप्य शिवं व्रजेत् ॥९९॥
मल्लिकोत्पलपत्राणि जाती पुन्नाग चम्पकैः ॥
अशोकश्वेतमन्दारकर्णिकारवकानि च ॥१००॥
करवीरार्क्कमन्दारशमीनागरकेशया ॥
कुशापामार्ग्ग कुमुदवन्धूकपुष्पजैरपि ॥१०१॥
पुष्पैरेतैर्य्यथालाभै र्यो नरः पूजयेच्छिवं ॥
स यत्फलमवाप्नोति तदेकाग्रमना श्रृणु ॥१०२॥
सूर्यकोटिप्रतीकाशै र्व्विमानैः सार्व्वकामिकैः ॥
पुष्पमाला परिक्षिप्तैर्ग्गीतवादित्रनिश्वनै : ॥१०३॥
तन्त्रीमधुरवाद्यैश्च स्वच्छन्दं गगनालये ॥
रुद्रकन्या समाकीर्णै र्द्देवदानवदुर्ल्लभैः ॥१०४॥
उद्धूयमानश्चमरैः स्तूयमानः सुरासुरैः ॥
स गच्छति पुरं दिव्यं यत्र वारुचिरम्भवेत् ॥१०५॥
यैस्तथापीह कुसुमै र्ज्जलस्थलरुहैः शिवं ॥
संपूज्यप्रोक्षितैर्ब्भक्त्या शिवलोके महीयते ॥१०६॥
शिवस्योपरि यः कुर्य्यात्सघनं पुष्पमण्डलम् ॥
शोभितं पुष्पस्रग्दामैरापीठान्तप्रलम्बिभिः ॥१०७॥
अत्याश्चर्यै र्म्महायानैः दिव्यपुष्पोपशोभितैः ॥
सर्व्वैः परिचरैः श्रीमानास्ते शिवपुरे सुखी ॥१०८॥
अनेकाकारसंयुक्तं यः शिवे कुसुमं गृहं ॥
कुर्व्वीत पर्व्व कालेषु विचित्रकुसुमोज्वलं ॥१०९॥
स पुष्पक विमानेन सहस्रपरिवारितः ॥
दिव्य स्त्रीसुखसम्भोगः क्रीडारतिसमन्वितः ॥११०॥

अक्षयं मोदतेकालमतिरस्कृतशासनः ॥
शिवादि सर्व्वलोकेषु यत्रेष्टं तत्र याति सः ॥१११॥
पूजादि भक्तिविन्यास रचनादिषु सर्व्वतः ॥
फलमेवं समासेन ज्ञेयं वित्तानुसारतः ॥११२॥
मालाभिर्व्वेष्टयेद्वेदिं लिङ्गं सम्पूज्य यत्नतः ॥
शिवं दद्यात्सपुत्रः स्यात्तदभ्यासेन मोदतेः ॥११३॥
लिङ्गं वेदी भवेद्देवि लिङ्गं साक्षान्महेश्वरः ॥
भवेत्संपूजनात्तयोर्द्देवी देवश्च पूजितः ॥११४॥
स्वयमुत्पाद्य पुष्पाणि यः स्वयं पूजयेच्छिवं ॥
तानि साक्षात्प्रगृह्णाति भक्तितः सततं शिवः ॥११५॥
यः प्रकुर्याच्छिवाराममाम्रविल्वादि शोभितं ॥
जातीविजयराजार्ककरवीराव्जकुङ्कुमैः ॥११६॥
पुन्नागनागवकुलैरशोकोत्पलचम्पकैः ॥
कदली हेमपुष्पाद्यै स्तस्य पुण्य फलं श्रृणुः ॥११७॥
यावत्तत्पत्र कुसुमं वीजमूलफलानि च ॥
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥११८॥
लाक्षा प्राण्यङ्ग निर्म्मुक्तं धूपं दत्वा सकृच्छिवे ॥
चतुर्व्वेदगृहे जन्म प्राप्नोति सततं सुखी ॥११९॥
कृष्णागुरुश्च कर्प्पूरं धूपं दद्यान्महेश्वरी ॥
नैरन्तर्येण मासार्द्धं तस्य पुण्यफलं श्रृणुः ॥१२०॥
कल्पकोटिसहस्राणि कल्प कोटि श तानि च ॥
भुक्त्वा शिवपुरे भोगान्तस्यान्ते तु महीपतिः ॥१२१॥
गुग्गुलुं घृतसंयुक्तं साक्षाद्गृह्णाति शङ्करः ॥
मासार्द्धं मात्र दानेन शिवलोके महीयतेः ॥१२२॥
शिवे कृष्णचतुर्दश्यां यामार्द्धं गुग्गुलं दहेत् ॥
अपराध सहस्रैकमिहामुत्र कृतं क्षयेत् ॥१२३॥
देवदारुन्नमेरुश्च सर्ज्जश्रीवास कुन्दरं ॥
श्रीफलं चाज्य संयुक्तं दग्ध्वाप्नोति परांगतिं ॥१२४॥
एभ्यः सुगन्धिकं धूपं षट्सहस्रगुणोत्तरं ॥
अगुरोर्द्दशसाहस्रं द्विगुणस्वासितागुरोः ॥१२५॥
गुग्गुलोः शतसाहस्रं सघृतं द्विगुणं भवेत् ॥
प्रियश्चगुग्गुलोर्धूप आज्ययुक्तो विशेषतः ॥१२६॥
पलानान्तु महिषाक्षस्यद्धि गुग्गुलोः ॥
दग्धत्वेनाज्यमिश्रस्य शिवतुल्यः प्रजायते ॥१२७॥

नमेरुं घृतसंयुक्तन्दग्ध्वा विल्वमथापि वा ॥
अग्निष्टोमस्य यागस्य फलं प्राप्नोति मानवः ॥१२८॥
शोधयेत्पाप संयुक्तं पुरुषन्नात्र संशयः ॥
कृष्णागुरोस्तु यो धूपै स्तुषाग्निरिव काञ्चनं ॥१२९॥
योऽन्तः शिवगृहङ्गन्धैः सुगन्धैश्च प्रलेपयेत् ॥
कपाटद्वारमुद्घाट्य तिर्यगूर्ध्वं स वेदिकं ॥१३०॥
वासयेत्पुष्पमालाभिः धूपैश्चापि सुगन्धिभिः ॥
यः कुर्यात्सकृदप्येवं पुण्यन्तस्यावधारयः ॥१३१॥
सर्वकाम सुसंपूर्णै र्म्महायानैः सहस्रशः ॥
आपूरयन्दिशः सर्व्वा आमोदैश्च सुगन्धिभिः ॥१३२॥
कल्पकोटिशतन्दिव्यं शिवलोके महीयते ॥
तस्यान्ते धर्म्मशेषेण त्रैलोक्या ऽधिपतिर्भवेत् ॥१३३॥
वातावृत्तौ तु यः कुर्यदिवंगन्धैः शिवालयं ॥
स समस्त कुलोपेतः शिवतुल्य बलो भवेत् ॥१३४॥
त्रिवृच्छुक्लं सुपीतं वा पद्मसूत्रादिनिर्म्मितं ॥
गन्धोपवीतं रुद्राय दत्वा वेदान्तगो भवेत् ॥१३५॥
वासांसि सुविचित्राणि सुरभीणि मृदुनिचः ॥
धूपितानिशिवेदद्यादक्लेश्यानि नवानि चः ॥१३६॥
यावन्तद्वस्त्रतन्तूनां परिमाणं विधीयते ॥
तावद्वर्षसहस्राणि शिवलोके महीयते ॥१३७॥
त्रुटिमात्रन्तु यो दद्याद्धेमं लिङ्गस्य मूर्द्धनि ॥
इन्द्रस्यार्द्धासने तिष्ठेद्यावदिन्द्राश्चतुर्दश ॥ १३८॥
एवमेवानुसारेण फलंज्ञेयं समासतः ॥
सर्व्वेषामेव हेमानां मुकुटानाञ्च सर्व्वशः ॥१३९॥
योर्क्कपर्णपुटम्पूर्णां घृतेनमधुनासह ॥
निवेदयीत शर्व्वाय सोश्वमेधफलंलभेत् ॥१४०॥
शालितण्डुल प्रस्थेन शूर्पादिनासुसंस्कृतं ॥
शिवाय तच्चरुदद्यात चतुर्दश्यां विशेषतः ॥१४१॥
हरिद्रां कृसरां शुक्लां पायसं यावसं तथा ॥
गुडखाण्डाज्यसम्मिश्रमेवमन्नं प्रकल्पयेत् ॥१४२॥
यावन्तस्तण्डुला तस्मिन्नैवेद्ये परिसंख्ययो ॥
तावद्वर्षसहस्राणि रुद्रलोके महीयतो ॥१४३॥
गुडखण्डकृतानाञ्च भक्ष्याणां विनिवेदने ॥
घृतेन पाचितानां याद्दत्वा दशगुणं फलं ॥१४४॥

भर्ज्जितायान्नकादीनां भक्ष्यार्द्धं फलमिष्यते ॥
तदर्द्धं सलिलस्यापि वासितस्य निवेदने ॥१४५॥
मातुलुङ्गफलादीनि सुपक्वानि निवेदयेत् ॥
शिवाय तत्फलं तस्य भक्षाणां विनिवेदयत् ॥१४६॥
घृतप्रदीपदानेन शिवाय शत योजनं ॥
अलंघित्वातमोगच्छेद्विमानैः सूर्यसप्रभैः ॥१४७॥
यः कुर्यात्कार्तिकेमासि शोभनान्दीप मालिकां ॥
घृतेन च चतुर्दश्या ममावास्यामथापिवा ॥१४८॥
सूर्यायुतप्रतिकाशस्तेजसा भास यन्दिशः ॥
तेजोराशि विमानस्थः कुलमुद्योत्यसर्व्वतः ॥१४९॥
यावत्प्रदिपसंख्यानं घृतेनापूर्य वोधितं ॥
तावद्युग सहस्राणि रुद्रलोके महीयते ॥१५०॥
दीपवृक्षं सुसमृद्धं शर्व्वस्यायतनं शुभं ॥
पूर्व्वस्माद द्विगुणं पुण्यं लभते नात्र संशयः ॥१५१॥
दीप वृक्षं सुसमृद्धं शोभयुच्च शिवालये ॥
दत्वा कल्पायुतं साग्रं शिवलोके महीयते ॥१५२॥
शिरसा धारयेद्दीपं सर्व्वरात्रं शिवालये ॥
ललाटे वापि हस्ताभ्यामुद्युक्तश्च तथोरसि ॥१५३॥
सूर्यकोटि प्रतीकाशैर्व्विमानैः सार्व्वकामिकैः ॥
कल्पायुत सहस्राणि शिवलोके महीयते ॥१५४॥
शिवस्यपुरतो दद्याद्दर्प्पणञ्चापिनिर्म्मलं ॥
पर्यन्तशोभितं कृत्वा श्वेतमाल्यैः सचन्दनैः ॥१५५॥
चन्द्रांसु निर्म्मलः श्रीमत्सुभगः कामरूपधृक् ॥
कल्पायुत सहस्राणि शिवलोके महीयते ॥१५६॥
कृत्वा प्रदक्षिणा भक्त्या शिवस्यैवं यथाविधि ॥
सर्व्वयज्ञोपवासेषु सर्वयज्ञेषु यत्फलं ॥१५७॥
अश्वमेधसहस्रस्य सुखेन लभते फलं ॥
नमस्कारः स्मृतोयज्ञः सर्व्वयज्ञोत्तमोत्तमः ॥१५८॥
नमस्कृत्वा महादेवमश्वमेधफलं लभेत् ॥
प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत् ॥१५९॥
स याङ्गतिमवाप्नोति नतां यज्ञशतैरपि ॥
सर्वयज्ञोपवासेषु सर्व्व तीर्थेषु यत्फलं ॥१६०॥
स्तुतिजप्योपहारेण सर्व्वन्तत्फलमाप्नुयात् ॥
श्वेतं महाध्वजं दत्वा कृत्वा वासश्च रङ्गिकं ॥१६१॥

किङ्किणीरुतसम्पन्न मयूरछत्रभूषितं ॥
एतेनैव विमानेन सर्व्वदेवोपरिस्थितं ॥१६२॥
सम्वत्सरसहस्रैकं मोदते दिवि रुद्रवत् ॥
ध्वजमालाकुलं कुर्य्यात् यथा प्रोक्तं शिवालयं ॥१६३॥
महाध्वजाष्टकं वापि दिग्विदिक्षु निवेदयेत् ॥
स विमानसहस्रेण दिव्यध्वजसुशोभिना ॥१६४॥
कल्पायुतसहस्राग्रं मोदते दिवि रुद्रवत् ॥
शरच्चन्द्रांशुविमलं मुक्तादामोपशोभितं ॥१६५॥
मणिदण्डमयंछत्रंदद्याद्वा कान्चनान्वितं ॥
स छत्रेण विमानेन धार्य्यमाणेन शोभिना ॥१६६॥
विमानशतसम्भोगैश्चिरं शिवपुरे वसेत् ॥
यदि वा राज्यमाकांक्षेत्सदेहो कालपर्य्ययात् ॥१६७॥
भुंक्ते समुद्रपर्य्यन्तामेकछत्रा वसुन्धरां ॥
श्रृङ्खलाभिः समायुक्तां महाघण्टां महास्वनां ॥१६८॥
कांस्यलोहमयी वापि निवध्नीयाच्छिवालये ॥
घण्टाकर्णगणः श्रीमान् शिवस्यातीववल्लभः ॥१६९॥
शिवतुल्य वलोभूत्वा शिवलोके वसेच्चिरं ॥
भेरीमृदङ्गमुरुजन्तिमिलं पटहादिकं ॥१७०॥
वंशकांश्यादि वादित्रं शिवाय विनिवेदयेत् ॥
सविमानैर्म्महाभोगैर्व्वंशवीणा कृतस्वनैः ॥१७१॥
युगायुतशतं दिव्यं शिवलोके महीयते ॥
स्त्रिसङ्गीतकदानेन सनाट्येन विशेषतः ॥१७२॥
यथेष्टमैश्वरे लोके मोदते कालमक्षयं ॥
महन्महास्वनं दद्याच्छङ्खयुग्म शिवालये ॥१७३॥
युगकोटि महाभोगैः शिवलोके महीयते ॥
विमानं सितपद्माभं मध्ये पद्मविभूषितं ॥
विचित्रमेकवर्णम्वा नववस्त्रोपशोभितं ॥
किङ्किणीरवकोपेतं चन्द्रकैश्चोपशोभितं ॥१७४॥
लम्वकैः सूत्रदामैश्च घण्टारुतविभूषितं ॥
शिवस्योपरि यो दद्यात्पुरतो वापि कल्पयेत् ॥१७५॥
रुद्रवत्सर्व्वलोकेषु युगकोटि स मोदते ॥
शिवस्योपरिं यो दद्यात् सर्व्व रत्नोपशोभितं ॥१७६॥
मण्डपं मौक्तिकं श्रीमान्तस्य पुण्यफलं श्रृणु ॥
कोटि कोटि विमानैस्तु सर्व्वकामसमन्वितः ॥१७७॥

आभूत संप्लवं यावदास्ते शिवपुरे सुखी ॥
शर्व्वस्यायतने कुर्य्याद्वस्त्रपूतांसुशोभनां ॥१७८॥
दुकूल पट्ट देवाङ्गैः सुवस्त्रैः वर्णकान्चितैः ॥
पट्टाविवस्त्रतन्तूनां परिसंख्या तु यावती ॥१७९॥
तावद्युग सहस्राणि रुद्रलोके महीयते ॥
शिवभक्त्या जगत्कृत्स्नं दृष्टिद्वारेण धार्य्यते ॥१८०॥
यत्संधार्य्यं जगत्पुण्यमग्निकार्येण तद्भवेत् ॥
य कुर्यादिष्टकागारं रुद्राग्नेरतिशोभनं ॥१८१॥
तत्र कृत्वाग्निकार्यञ्च शिबलोके महीयते
शिवाग्निकार्यं यःकुर्यादायुषश्चापि चात्मनः ॥१८२॥
मुच्यते दशभिर्पापैः सितेनशिव भष्मना ॥
कृत्वा शिवालयं प्रान्ते दशमण्डलकानितु ॥१८३॥
सर्वाग्रपाकसंयुक्तं तत्र नित्यं वलिंहरेत् ॥
पुष्पधूपजलोपेतं ताम्रपात्रे प्रकल्पयेत् ॥१८४॥
रुद्रमातृगणादीनां दिव्यतीनाञ्च सर्व्वतः ॥
यः कुर्य्यात्सकृदप्येवं दशदिक्षु वलिक्रियां ॥१८५॥
दशवर्षसहस्राणि रुद्रलोके महीयते ॥
रुद्रसन्ध्यावलिन्दत्वा नित्यशर्व्वाश्रमे निशि ॥१८६॥
कल्पायुतसहस्राणि शिवलोके महीयते ॥
दधिभक्तमयं लिङ्गं हेमपात्रादिषु स्थितं ॥१८७॥
पुष्पधूपार्च्चितं कृत्वा दिव्यमाल्योपशोभितं ॥
शिरसा धारयेत्पात्रं शनैः कुर्यात्प्रदक्षिणं ॥१८८॥
शिवायतनपर्य्यन्तं शंखभेर्य्यादि निस्वनैः ॥
दर्पणध्वजमालाभि सर्व्वं कुर्यात्सुशोभनं ॥१८९॥
छत्रचामरधूपाद्यैर्य्यष्टिदीपादिभिस्तथा ॥
तच्छेष दधिभक्तेन लिङ्गस्य पुरतः स्थितः ॥१९०॥
पुष्पाक्षतादिसन्मिश्रन् सर्वदिक्षु वलिंक्षिपेत् ॥
एतेन मातरो रौद्रा शिवोमाषण्मुखादयः ॥१९१॥
शान्तिं कुर्व्वन्ति सुप्रीता रौद्रेणवलिना तदा ॥
शिव माल्योपनयनं पूजान्तेसु प्रमार्ज्जनं ॥१९२॥
एकैकमेवतुल्यंस्या च्चान्द्रायणफलेन तु ॥
शिवमण्डलकं वृत्तं हस्तमात्रं शिवाग्रतः ॥१९३॥
अवकीर्याक्षतैः पुष्पैः पत्रैर्व्वाप्यथकोमलैः ॥
सुरूपः सुभगः श्रीमान्तेजस्वी वेदवित्सुखी ॥१९४॥

चतुर्वेदगृहे जन्म स कृत्वा लभते नरः ॥
एवं स्वस्तिकपद्माद्यैर्भूरि शोभां शिवालये ॥१९५॥
कृत्वा वर्णकपिष्टाद्यैः तस्माच्छत गुणं लभेत् ॥
शिवयज्ञोपकरणं कृत्वाल्पं यदि वा वहुः ॥१९६॥
भावं वित्तानुसारेण शिवलोके महीयते ॥
शिवमुद्यिश्य यद्दत्तं तत्सर्वं मुक्तिकारणं ॥१९७॥
तदनन्तफलंदातुं भवतीति किमद्भुतं ॥
यदिष्टञ्च विशिष्टञ्च न्यायेन च यदागतं ॥१९८॥
तच्छिवाय निवेद्यं स्याद्भक्त्यानन्तफलार्थिभिः ॥
कर्म्मशाठ्येन यः कुर्य्यान्मूलेनापि शिवालये ॥१९९॥
तेपि शठा दिवं यान्ति कर्म्मणा पाप वर्ज्जिताः ॥
कूपारामादिवाप्याद्यैः शिवायतनकर्म्मणि ॥२००॥
उपयुक्तानि भूतानि खननोत्पाटनादिषु ॥
अकामतोऽपि सर्व्वाणि चराणि स्थावराणि च ॥२०१॥
दिवं यान्ति न सन्देहः प्रभावात्परमेष्ठिनः ॥
लिङ्गाद्धस्तशतसाग्रं शिवक्षेत्रं समन्ततः ॥२०२॥
देहिनां तत्रपञ्चत्वं शिवसायुज्य कारणं ॥
मनुजैः स्थापिते लिङ्गे क्षत्रमानमिदं भवेत् ॥२०३॥
स्वायंभुव सहस्रंस्यादार्षेचैवं तदर्द्धिकं ॥
पापाचारोऽपि यस्तस्मिन्नायाच्छिव पुरंस्मृतः ॥२०४॥
तष्मादावसथं कुर्य्याच्छिव क्षेत्र समीपतः ॥
शिवक्षेत्र समीपस्थं यत्तोयं पुरतः स्थितं ॥२०५॥
शिवगङ्गेति विज्ञेयं तत्र स्नात्वा शिवं व्रजेत् ॥
ग्रामे वा यदरण्ये वा यत्रदेवोमहेश्वरः ॥२०६॥
तत्र तत्र कुरुक्षेत्रं नैमिषं वापि पुष्करं ॥
यः कुर्य्याद्दीर्घिकाम्वापि कूपं चापि शिवालये ॥२०७॥
त्रिसप्तकुल संयुक्तः शिवलोके महीयते ॥
सर्व्वमन्यत्परित्यज्य शिवैकाहित मानसः ॥२०८॥
शिवपूजाविधिं कुर्य्याद्यदिच्छेच्छुभमात्मनः ॥
त्वरितं जीवितं याति त्वरितं याति यौवनं ॥२०९॥
त्वरितं व्याधिरभ्येति संपूज्यो भगवान्शिवः ॥
यावन्नायातिमरणं यावन्नाक्रमते जरा ॥२१०॥
यावन्नेन्द्रियवैकल्यं तावत्पूजय शङ्करं ॥
न शिवार्च्चनतुल्योस्ति धर्म्मोऽत्र भुवनत्रये ॥२११॥

इति विज्ञाय यत्नेन पूजनीयः सदाशिवः ॥
ये भक्त्या देव देवेशे शिवे शान्ते अजे विभौ ॥२१२॥
न्यायार्ज्जितानि द्रव्याणि अर्पयन्ति स्व शक्तितः ॥
इह लोके सुखं प्राप्य ते यान्ति परमं पदं ॥
संपूज्यो पशु भर्त्तारं प्रहृष्टेनान्तरात्मना ॥२१३॥
कृताञ्जलिपुटो भूत्वा भक्त्यास्तोत्रमुदीरयेत् ॥
शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमं ॥२१४॥
शिवमार्ग्ग प्रणेतारं प्रणमामि सदा शिवं ॥
शाश्वतं शोभनं शुद्धं शासकं दोषशोषकं ॥२१५॥
विश्वं विश्वेश्वरं देवं शङ्करं प्रणमाम्यहं ॥
सर्वपापहरन्नाथं सर्व्व दोषहरं परं ॥२१६॥
सर्व्वव्याधिहरन्नित्यं नमाम्यार्तिहरं परं ॥
अस्थानं स्थान सत्थानं संस्थितं स्थिति भावनं ॥२१७॥
स्थिरमात्मस्थयोगस्थं स्थाण्वीशंप्रणमाम्यहं ॥
इशानं वरदं देवमीशानं मन्त्र नायकं ॥२१८॥
इशानं सर्व्वभूतानामीशानं प्रणमाम्यहं ॥
इयंपूजा विधिं पुण्यं यः श्रृणोति सकृन्नरः ॥२१९॥
समुक्तः सर्वपापैस्तु शिवलोकमवाप्नुयात् ॥२२०॥

इति शिवधर्म्मे शिवार्च्चनद्रव्यविधिः पञ्चमोध्यायः ॥५॥

अथ पशुपति मते शिवधर्मशास्त्रे नन्दिकेश्वर प्रणीते शान्त्याध्यायो नाम

षष्ठोऽध्यायः ॥

ॐ नमः शिवाय ॥
॥नन्दिकेश्वर उवाच॥१॥

अतः परमिदं गुह्यं रुद्राद्गीतं महोदयं ॥
महाविघ्नप्रशमनं महाशान्तिकरं शुभं ॥२॥
अकालमृत्युशमनं सर्व्वव्याधि निवारणं ॥
परचक्र प्रथमनं सर्वदा जयवर्द्धनं ॥३॥
सर्वदेव ग्रहानीकं समभीष्ट फलप्रदं ॥
सर्व्व शान्त्यधिकाराख्यं धर्म्मं वक्षामि शाश्वतं ॥४॥

शशाङ्कार्द्ध धरस्त्र्यक्षो नागयज्ञोपवीतकः
चतुर्म्मुखश्चतुर्व्वाहु सितभस्मावगुण्ठितः ॥५॥
वरो वरेण्यो वरदो देवदेवो महेश्वरः ॥
त्रैलोक्ये नमितः श्रीमान् शान्तिमाशु करोतु मे ॥६॥
सर्व्वावयवपूर्णेन गात्रेण तनुमध्यमा ॥
पीतश्यामाति सौम्येन स्निग्धवर्णेन शोभना ॥७॥
ललाटे तिलकोपेता चन्द्ररेखार्द्धधारिणी ॥
चित्राम्वर धरादेवी सर्व्वाभरणभूषिता ॥८॥
वरस्त्रीमयरूपेण शोभागुणमहास्पदा ॥
भावनामात्र संतुष्टा उमादेवि वरप्रदा ॥९॥
साक्षादागत्यरूपेण शान्तेनामिततेजसा ॥
शान्तिं करोतुमेप्रीता भक्तानां भक्तवत्सला ॥१०॥
पद्मरागद्युतिः सौम्यो रक्तमाल्यानुलेपनः ॥
अवालो वालरूपेण षड्वक्त्रः शिखिवाहन ॥११॥
पूर्णेन्दुवदनः सौम्यस्त्रिशिखः शक्तिसंयुतः ॥
कृत्तिकोमाग्निरुद्रांशसमुद्भूतः सुरार्च्चिकः ॥१२॥
कार्तिकेयो महातेजो वरदानैकतत्परः ॥
शान्तिं करोतुमे नित्यं वलं सौख्यञ्च मे सदा ॥१३॥
स्वेत वस्त्रपरीधानस्त्र्यक्षः कनकसुप्रभः ॥
शूलपाणि महाप्राज्ञो नन्दीशः शिवभावितः ॥१४॥
शिर्वाच्चनपरोनित्यं शिवध्यानैकतत्परः ॥
शान्तिं करोतु मे शान्तो धर्म्मे च मतिमुत्तमं ॥१५॥
महोदरो महाकायः स्निग्धाञ्जनचयच्छविः ॥
एक दंष्ट्रोत्कटोदेवो गजवक्त्रो महावलः ॥१६॥
नागयज्ञोपवीति च नानाभरणभूषितः ॥
सव्वार्थ संपदाधारो गणाध्यक्षो वरप्रदः ॥१७॥
रुद्रस्यतनयो देवो नायकोऽथ विनायकः ॥
करोतुमेमहाशान्तिं कर्मसिद्धिञ्च सर्व्वदा ॥१८॥
इन्द्रनील निभस्त्र्यक्षो दीप्तशूलायुधोद्यतः ॥
रक्ताम्वरधरः श्रीमान् कृष्णाङ्गो नागभूषणः ॥१९॥
पापापनोदनमलमलक्ष्मीमलनाशनं ॥
करोतुमे महाशान्तिं महाकालो महावलः ॥२०॥
पीतवस्त्रपरीधाना कन्यारूपास्वलंङ्कृता ॥
गणमाताम्विका स्त्र्यक्षा पुण्या गौरीश्वरेश्वरी ॥२१॥

सर्व्वसिद्धिकरी देवी प्रसाद परमापरा ॥
शान्तिं करोतु मे माता सिद्धिश्चानुप्रयच्छतु ॥२२॥
स्निग्धश्यामेन वर्णेन महामहिषमर्द्दनं ॥
धनुश्चक्रप्रहरणा खड्गपट्टिस धारिणी ॥२३॥
आतर्ज्जन्युद्यतकरा सर्व्वोपद्रव नाशनी ॥
सर्व्वमङ्गल माता मे शिवमाचरतु ध्रुवं ॥२४॥
निर्म्मांसेन शरीरेण स्नाय्वस्थि सुनिवन्धनः ॥
अति सूक्ष्मोतिविक्रान्त स्त्र्यक्षोभृङ्गि रितिर्म्महान् ॥२५॥
रुद्रात्मजो महावीरो रुद्रैकाहित मानसः ॥
सोपि मे शान्तभावेन शान्तिमाशु प्रयच्छतु ॥२६॥
प्रचण्डगणसैन्येशो महाटंकाक्षधारकः ॥
अक्षमालार्प्पितकर त्र्यक्षश्चण्डेश्वरोवरः ॥२७॥
चण्डपापापहरणो ब्रह्महत्यादिशोधनः ॥
करोतु मे महायोगी कल्याणानाम्परम्परां ॥२८॥
शङ्खकुन्देन्दुतुल्याभः कण्ठें मरकतप्रभः ॥
अक्षमाली शिवाग्रस्थः स्वयंज्ञान व्यवस्थितः ॥२९॥
चतुर्म्मुखश्चतुः पादस्त्रिनेत्रः सर्वदोज्ज्वलः ॥
क्षितिपतिर्वृषो देवो धर्म्मो धर्म्मतमोत्तमः ॥३०॥
ईशम्वहति पृष्ठेन तस्माद्धर्मो जगत्प्रभुः ॥
वृषो वृषवरः श्रीमान् करोतु मम शान्तिकं ॥३१॥
पद्मासनः पद्मनिभः चतुर्व्वदन पङ्कजः ॥
कमण्डलुधरः श्रीमान् देव गन्धर्व पूजितः ॥३२॥
शिवेध्यानैक परमः शिवसद्भाव भावितः ॥
ब्रह्मशब्देन दिव्येन ब्रह्मशान्तिं करोतु मे ॥३३॥
तार्क्षासनश्चतुर्व्वाहुः शङ्खचक्रगदाधरः ॥
श्यामः पीताम्बरधरो महावलपराक्रमः ॥३४॥
यज्ञदेहोत्तमोदेवो माधवो मधुसूदनः ॥
शिवप्रसादसम्पन्नः शिवध्यानपरायणः ॥३५॥
सर्वपापप्रशमकः सर्व्वासुरनिकृन्तकः ॥
सर्व्वदा शान्तभावेन विष्णुः शान्तिं करोतु मे ॥३६॥
आर्हन्तः शान्तचेतष्कविश्वात्मन् विश्वयातितः ॥
दिग्वासामलपङ्कश्च सौम्यचित्त समाहितः ॥३७॥
सम्वर्तलोचनः शान्तः शिवज्ञानैकचिन्तकः ॥
शान्तिं करोतु मे शान्तः शिवयोगेन भावितः ॥३८॥

जितेन्द्रियः समाधिस्थः पात्रचीवर भेषितः ॥
वरदाभयपाणिश्च ज्ञानध्यानरतः सदा ॥३९॥
योगदृष्टिः सदायुक्त : शिवज्ञानेन भावितः ॥
शान्तिङ्करोतु मे देव सर्व्वसत्वहितेरतः ॥४०॥
पीतवर्णेन देहेन हारेण सुविचित्रिणा ॥
सर्व्वाङ्गसुन्दरी देवि विजया जय कारिणी ॥४१॥
शिवार्च्चनरतानित्यं शिवजाप्यपरायणा ॥
धरित्री लोकमाता च नित्यं रक्षाङ्करोतु मे ॥४२॥
क्षीरोदादुत्थितो गावो लोकानां हितकाम्यया ॥
प्रीणयन्ति सदा देवान् विप्राँश्चैव विशेषतः ॥४३॥
नित्यन्तु देवतात्मानः कुर्व्वन्तु मम शान्तिकं ॥
पद्मरागप्रभादेवि चतुर्व्वदनपङ्कजा ॥४४॥
अक्षमालार्प्पितकरा कमण्डलुधरा शुभा ॥
ब्रह्माणि सौम्यवदना शिवपूजापरायणा ॥४५॥
शान्तिङ्करोतु मे प्रीता ब्रह्मशब्देन सर्व्वदा ॥
हिमशैलनिभा देवि महावृषभवाहना ॥४६॥
त्रिशूलहस्ता वरदा नागाभरणभूषिता ॥
चतुर्ब्भुजा चतुर्व्वक्त्रा त्रिनेत्रा पापहारिणी ॥४७॥
आर्त्तिहरतु मे प्रीता रुद्राणी नित्यमुज्वला ॥
मयूरवाहना देवि सिन्दूरारूणविग्रहा ॥४८॥
शक्तिहस्ता महारूपा सर्वालङ्कारभूषिता ॥
रुद्रभक्ता महावीर्यारुद्रार्च्चनरता सदा ॥४९॥
कौमारी वरदा देवि शान्तिमाशु ददातु मे ॥
शंखचक्रगदाहस्ता श्यामापीताम्वरप्रिया ॥५०॥
चतुर्भुजातार्क्षयाना वैष्णवी सुरपूजिता ॥
शिवार्च्चनरता नित्यं शिवैकाहितमानसा ॥५१॥
शान्तिकरोतु मे नित्यं सर्व्वासुरविमर्दिनी ॥
ऐरावतं गजारूढ वज्रहस्ता महावला ॥५२॥
नेत्राणान्तु सहस्रेण भूषिता कनकप्रभा ॥
सिद्धगन्धर्वनमिता सर्व्वालङ्कारभूषिता ॥५३॥
ऐन्द्री देवी सदाकालं शान्तिमाशु करोतु मे ॥
वराहघोणा विकटा वराह वरवाहना ॥५४॥
श्यामावदाता विपुला शंखचक्रगदायुधा ॥
तर्ज्जयन्ती सदा विघ्नानर्च्चयन्ती सदा शिवं ॥५५॥

वाराही वरदा देवि क्षमारोग्यं ददातु मे ॥
अर्द्धकेशाकोटराक्षा निर्म्मांसा स्नायुवन्धना ॥५६॥
करालवदना घोरा खड्गकट्टारकोद्यता ॥
कपालमालिनी क्रुद्धा खट्वाङ्गवरधारिणी ॥५७॥
आरक्तपिङ्गनयना गजचर्म्मावगुण्ठिता ॥
नाना नागोपवीताङ्गी प्रेतस्थान निवासिनी ॥५८॥
शिवा रूपेण घोरेण शिवाराव भयङ्करा ॥
चामुण्डा चण्डरूपेण महारक्षां करोतु मे ॥५९॥
अपीतेन शरीरेण नानाभरण भूषिता ॥
आतर्ज्जयन्ती विघ्नानि ज्वलत्खट्वाङ्गधारिणी ॥६०॥
ध्वांक्षासना महावीरा सर्वपापप्रणाशनी ॥
लम्वौष्ठि वरदादेवी शान्तिमाशु करोतु मे ॥६१॥
आकाशमातरोदिव्या स्तथान्यालोकमातरः ॥
सर्व्वमातृमहादेव्यः स्सायुधव्यग्रपाणयः ॥६२॥
जगद्व्याप्यावतिष्ठन्ते वलिकामा महोदया ॥
रुद्रभक्त्या महाबीर्य्या रुद्रार्च्चा हितमानसा ॥६३॥
शान्तिं कुर्वन्तु मे नित्यं मातरः सुरपूजिताः ॥
ये रूद्रा रौद्रकर्म्माणो रुद्रस्थाननिवासिनः ॥६४॥
सौम्याश्चैव तु ये केचित् स्थाणुस्थान निवासिनः ॥
मातरो रुद्ररूपाश्च गणानामधिपाश्च ये ॥६५॥
विघ्नभूतास्तथाचान्ये दिग्विदिक्षु समाश्रिताः ॥
सर्व्वेसु प्रीतमनसः प्रतिगृह्णन्तु मे वलिं ॥६६॥
सिद्धिमाशु प्रयच्छन्तु भयेभ्यः पान्तुमां सदा ॥
ऐन्द्र्यां दिशि गणा ये तु वज्रहस्ता महावलाः ॥६७॥
सुश्वेताक्षाः श्वेतनिभास्तथा वै श्वेतलोहिताः ॥
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ॥६८॥
रुद्रप्रणामसमनसः शान्तिं कुर्वन्तु मे सदा ॥
याम्यान्दिशि गणा ये तु सततं दण्डपाणयः ॥६९॥
कृष्णः कृष्णनिभाः क्रुद्धास्तथा वै कृष्णलोहिताः ॥
दिव्यान्तरीक्ष भौमाश्च पातालतल वासिनः ॥७०॥
रुद्रैकाहित चेतस्का शान्तिं कुर्व्वन्तु मे सदा ॥
नैर्ऋत्यान्तु गणाः क्रूराराक्षसा मृत्यु रूपिणः ॥७१॥
सुनीलाक्षा नीलनिभास्तथा वै नीललोहिताः ॥
दिव्यान्तरीक्षभौमाश्च पातालतल वासिनः ॥७२॥

रुद्रस्यध्याननिरताः शान्तिं कुर्वन्तु मे सदा ॥
वारूण्यां वै गणा ये तु सततं पाशपाणयः ॥७३॥
सुश्यामाक्षाः श्यामनिभास्तथा वै श्यामलोहिताः ॥
दिव्यन्तरीक्षभौमाश्च पातालतलवासिनः ॥७४॥
शिवभक्तिपराः सर्वे कुर्वन्तु मम शान्तिकं ॥
वायव्यान्तु गणा ये तु सततं ध्वजपाणयः ॥७५॥
सुपीताक्षाः पीतनिभास्तथा वै पीतलोहिताः ॥
दिव्यन्तरीक्षभौमाश्च पातालतलवासिनः ॥७६॥
शिवभक्तिपराः सर्व्वे क्षमं कुर्व्वन्तु मे सदा ॥
उत्तरस्यां गणा ये तु सततं निधिपाणयः ॥७७॥
शवलाक्षाः शवलनिभास्तथा वै शवल लोहिताः ॥
दिव्यन्तरीक्ष भौमाश्च पातालतलवासिनः ॥७८॥
शिवपूजा समुद्युक्ता क्षेमं कुर्व्वन्तु मे सदा ॥
ऐशान्यास्वै गणा ये तु प्रशान्ताः शूलपाणयः ॥७९॥
सूक्ष्माः सुसूक्ष्म सदृशा स्तथा वै सूक्ष्म लोहिताः ॥
दिव्यन्तरीक्षभौमाश्च पातालतलवासिनः ॥८०॥
शिवपूजा समुद्युक्ता क्षेमं कुर्व्वन्तु मे सदा ॥
अधोभागे गणा ये तु सततं शूलपाणयः ॥८१॥
धूम्रा धूम्रनिभास्सर्व्वे तथा वै धूम्रलोहिताः ॥
दिव्यन्तरीक्ष भौमाश्च पातालतलवासिनः ॥८२॥
शिवं कुर्व्वन्तु मे नित्यमलक्ष्मीमलनाशनं ॥
अर्द्धभागे गणा ये तु महावलपराक्रमाः ॥८३॥
सुसूक्ष्माक्षाः सूक्ष्मनिभास्तथा वै सूक्ष्मलोहिताः ॥
दिव्यन्तरीक्षभौमाश्च पातालतलवासिनः ॥८४॥
शिवपूजा समाद्युक्त अशुभं नाशयन्तु मे ॥
एतेगणाः महात्मानो महावलपराक्रमाः ॥८५॥
शिवं संपूज्य यत्नेन वलिन्तेषां विनिक्षिपेत् ॥
ततः सुप्रीत मनसः शान्तिं कुर्वन्तु मे सदा ॥८६॥
अमरावती नामपुरी पूर्वभागे व्यवस्थिता ॥
विद्याधरसमाकिर्णा सिद्धगन्धर्वसेविता ॥८७॥
रत्नप्राकार रुचिरा सर्वरत्नोपशोभिता ॥
तत्र देवपतिः श्रीमान् वज्रपाणिर्महावलः ॥८८॥
नेत्राणान्तु सहस्रेण शोभतेन विराजते ॥
ऐरावतगजारूढो हेमवर्णमहाद्युतिः ॥८९॥

देवेन्द्रःसततं हृष्टः परमेशार्च्चनेरतः ॥
शिव ध्यानेन संपन्नः शिवभक्ति समन्वितः ॥९०॥
शिवप्रणामपरमः करोतु मम शान्तिकं ॥
आग्नेयेदिग्विभागे तु पुरी तेजोवती शुभा ॥९१॥
नानादेवसमाकीर्णा रत्नज्वालासमुज्ज्वला ॥
तत्रज्वालापरीताङ्गो दीप्ताङ्गारसमद्युतिः ॥९२॥
भूतिकृद्देहिनां देवो ज्वलनः पापनाशनः ॥
शिवपूजा जपोद्युक्तः शिवस्मरणभावितः ॥९३॥
शान्तिं करोतु मे देवस्तथा पापपरिक्षयं ॥
वैवस्वतीनामपुरी दक्षिणेन व्यवस्थिता ॥९४॥
सुरासुरशतानीक पितृरक्षोरगालयाः ॥
तत्रेन्द्रनीलसंकाशो रक्तआयतलोचनः ॥९५॥
महामहिषमारूढः कृष्णस्रग्वस्त्रभूषणः ॥
अन्तकोऽथ महातेजः शिवधर्म्म परायणः ९६॥
शिवपूजासमुद्युक्तः क्षेमारोग्यं ददातु मे ॥
नैर्ऋते तु दिशो भागे पुरा कृष्णेति विश्रुताः ॥९७॥
महारक्षोगणाकीर्णा पिशाचभूतसंकुला ॥
तत्र जीमूतसंकाशो रक्तस्रग्वस्त्रभूषणः ॥९८॥
खड्गपाणिर्म्महातेजाः करालवदनोज्वलाः ॥
रक्षेन्द्रो नैर्ऋतिर्नित्यं शिवार्च्चनरतः सदा ॥९९॥
करोतु मे महाशान्तिं शिवभक्ति समुत्सुकः ॥
पश्चिमे तु दिशोभागे पुरी शुद्धावती शुभा ॥१००॥
नानागणसमाकीर्णा नानाकिन्नरशोभिता॥
तत्रमौक्तिकसंकाशः परिपिङ्गललोचनः ॥१०१॥
पटव्याप्तान्तरा लीनो ध्वजछत्रायुधोद्यतः ॥
शुक्लबस्त्रपरीधानः पाशहस्तो महावलः ॥१०२॥
वरुणः परयाभक्त्या शिवैकाहितमानसः ॥
रोगशोकार्त्तिसन्तापन्नित्यं निर्ण्णाशयन्तु मे ॥१०३॥
वायव्येदिग्विभागेतु पुरीगन्धवती शुभा ॥
ऋषिसिद्धगणाध्युष्टा हेमप्राकारतोरणाः ॥१०४॥
तिष्ठन्ताम्रेण देहेन कृष्णपिङ्गललोचनः ॥
पवनः परसोदेवः परमेश्वर भावितः ॥१०५॥
क्षमारोग्यं वलं शान्तिं करोतु सततं मम ॥
महोदयानामपुरी उत्तरेणमहोज्ज्वला ॥१०५॥

अनेकयक्षसंकिर्णा नानारत्नोपशोभिता ॥
तत्र देवोगदाहस्तश्चित्रस्रग्वस्त्रभूषणः ॥१०६॥
ह्स्ववाहुर्म्महातेजाः परिपिङ्गल लोचनः ॥
कुवेरो वरदः श्रीमान् हरपादार्च्चने रतः ॥१०७॥
शान्तिं करोतु मे शान्तः प्रीत प्रीतेनतेजसा ॥
यशोवति पुरीरम्या इशानीन्दिशमाश्रिता ॥१०८॥
नानागणसमाकीर्णा नानासुरकृतालया ॥
तेजः प्राकारपर्य्यन्ता निरौपम्या महोदया ॥१०९॥
यत्र मौक्तिकसंकाशः शशाङ्ककृतभूषणः ॥
त्रिनेत्रशान्तरूपात्मा अक्षमालाधरोहरः ॥११०॥
ईशानः परमोदेवः सर्व्वदेवोत्तमोत्तमः ॥
सोऽपि सर्व्वात्मभावेन शान्तिमाशुप्रयच्छतु ॥१११॥
भूर्ल्लोकेऽथ भुवर्लोके स्वर्लोके निवसन्ति ये ॥
देवतादिव्यसंयुक्ताः शान्तिं कुर्वन्तु मे सदा ॥११२॥
महर्ल्लोके जनोलोके तपोलोके स्थिताश्च ये ॥
तेऽपि प्रमुदितादेवाः शिवं कुर्व्वन्तु मे सदा ॥११३॥
सत्यलोके च ये देवाः प्रभाजोज्ज्वल विग्रहाः ॥
शिवभक्ताः सुमनसो भयं निर्ण्णा शयन्तु मे ॥११४॥
गिरिकन्दरदुर्ग्गेषु वरेषु निवसन्ति ये ॥
रुद्रार्च्चनपरादेवा रक्षां कुर्वन्तु मे सदा ॥११५॥
महातले च सन्तिस्म रसातलेषु संस्थिताः ॥
तलातले च ये सन्ति ये सन्तिं सुतलेजनाः ॥११६॥
नितले संस्थिता भूत्वा वितले निवसन्ति ये ॥
तले च निलयाये च रक्षां कुर्वन्तु सर्व्वदा ॥११७॥
शरच्चन्द्रांशुगौरेण देहेनामलतेजसा ॥
सरस्वती शिवेभक्ता शान्तिमाशुकरोतु मे ॥११८॥
चारु चामीकरहस्ता सरोजोत्पलपल्लवा ॥
शिवभक्ता तु श्री देवी श्रीमद्भूतिं ददातु मे ॥११९॥
चारुणा मुखचन्द्रेण विचित्रकुसुमोज्ज्वला ॥
जयादेवी शिवे भक्ता सर्व्वकामन्ददातु मे ॥१२०॥
हारेण सुविचित्रेण भास्करोज्ज्वलतेजसा ॥
रुद्रसुताऽपराजिता करो तु विजयं मम ॥१२१॥
सिन्दूरराजरत्नेन कर्णान्तायतलोचनः ॥
किरणद्वयसंयुक्तः सप्तसप्तिकवाहनः ॥१२२॥

गभस्तिमाली भगवन् शिवपूजार्च्चने रतः ॥
करोतु मे महाशान्तिं ग्रहपीडानिवारणी ॥१२३॥
जगदाप्यायनकर अमृताधारशीतलः ॥
सोमः सौम्येन भावेन ग्रहपीडां व्यपोहतु ॥१२४॥
पद्मरागनिभाङ्गेन देहेन पिङ्गलोचना ॥
अङ्गारकन्तु मे नित्यं ग्रहपीडां व्यपोहतु ॥१२५॥
कुङ्कुमच्छविदेहेन चापोद्यत करः सदा ॥
शिवभक्तो वुधः श्रीमान् ग्रहपीडां व्यपोहतु ॥१२६॥
धातुचामीकरच्छाः सर्व्वज्ञानकृतालयः ॥
वृहस्पतिः सदाकालमीशानार्च्चन तत्परः ॥१२७॥
साऽपि मे शान्तचित्तेन परमेनसमाहितः ॥
ग्रहपीडां विनिर्ज्जित्य करोतु विजयं सदा ॥१२८॥
हिमकुन्देन्दुतुल्याभः सुरदैत्येन्द्रपूजितः ॥
शुक्रः शिवार्च्चनरतो ग्रहपीडां व्यपोहतु ॥१२९॥
भिन्नाञ्जनचयच्छायः सरक्त नयनद्युतिः ॥
शनैश्चर शिवे भक्तो ग्रहपीडां व्यपोहतु ॥१३०॥
निलाञ्जननिभः श्रीमान् सैम्हिकेयोमहावलः ॥
शिवपूजापरो राहुर्ग्रहपीडां व्यपोहतु ॥१३१॥
धूमाकारोग्रहः केतुरैशान्यांदिशि संस्थितः ॥
वर्त्तुलातीव विस्तीर्णेलोचनेश्च सुभीषणः ॥१३२॥
पलालधूमसंकाशो ग्रहपीडापहारकः ॥
घोरद्रंष्ट्रो करालश्च करोतु विजयं मम ॥१३३॥
खङ्गस्फटिक हस्ता च वरेण्यो वरदः शुभः ॥
शिवभक्तश्च जन्माच ग्रहपीडां व्यपोहतु ॥१३४॥
एतेग्रहामहात्मानो महेशार्च्चन भाविताः ॥२८॥
शान्तिं कुर्वन्तु मे हृष्टाः सदाकालं हितैषिणः ॥
मुखेयस्य स्थितोमृत्युः वृष्टिर्न्नाम महावला ॥२९॥
षण्मुखाविघ्नकारी च पुच्छे च विजयं करी ॥
तृतीया सप्तमी चैव दशमी तु चतुर्दशी ॥३०॥
चतुर्थी चाष्टमी चैव एकादशी तु पूर्णिमा ॥
एतेषु विघ्न पात्रेषु कृष्णे शुक्ले समावहा ॥३१॥
कुर्वन्तु मे लब्धवराः शान्तिश्च परमिप्सितम् ॥
अमावासी महापुण्या पितृदेव समन्विता ॥३२॥

शान्तिश्चपरमां पुण्यां शिवस्य परमात्मनः ॥
शिवतेजः समायुक्ताः करोतु मम शान्तिकं ॥३३॥
प्रतिपच्च महाशान्ता द्वितीया च मनोहरा ॥
तृतीया च तिथिः श्रीमान् चतुर्थी च महायशाः ॥३४॥
पञ्चमी नाम शान्तात्मा षष्ठी च तिथिरुत्तमा ॥
सप्तमी च तिथिः पुण्या अष्टमी च महावला ॥३५॥
तिथिः शूल भृतश्चैषा पापहा परमा स्मृता ॥
नवमी तिथिरत्युग्रा दुर्ग्ग्राह्या परिकीर्तिताः ॥३६॥
दशमी शोभना चैव तिथि एकादशी तथा ॥
द्वादशी चैव शान्तात्मा तथा तिथि त्रयोदशी ॥३७॥
चर्तुद्दशी महावीर्य्यातिथि शङ्करजात्मजा ॥
पूर्णमास्या परिपूर्णात्मा तिथयःसततोज्ज्वला ॥३८॥
सततन्तु शुभात्मानस्तिथयेश्च क्रमेणतु ॥
पक्षद्वये सदाह्येते चन्द्रगत्यानुगामिनः ॥३९॥
शान्तिं कुर्व्वन्तु मे नित्यं शिवाज्ञानुविधायिनः ॥
विष्कुम्भः प्रीतिरायुष्मान्सौभाग्यशोभनस्तथा ॥४०॥
अतिगण्डः सुकर्म्मा च धृतिः शूलस्तथैव च ॥
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षण स्तथा ॥४१॥
वज्रः सिद्धिर्व्यतीपातो वरियान् परिघः शिवः ॥
सिद्धिः साध्यः शुभः शुक्लो ब्रह्म ऐन्द्रश्च वैधृति ॥४२॥
चन्द्रस्य भानोश्चोत्पन्ना योगाश्चैते महाबलाः ॥
शिवभक्तिं पराः सर्व्वे शिवाज्ञानुविधायिनः ॥४३॥
शान्तिं कुर्व्वन्तु मे नित्यं तथा किल्विषनाशनं ॥
कृत्तिका परमा देवी रोहिणीरुचिरानना ॥४४॥
श्रीमन्मृगशिराभद्रा आर्द्रा च पमोज्ज्वला ॥
पुनर्व्वसुस्तथा पुष्या अश्लेषाऽथ महावला ॥४५॥
नक्षत्रमातरो ह्येताः प्रभामाला विभूषिताः ॥
महादेवार्च्चनेसक्ता महादेवानुभाविताः ॥४६॥
पूर्वभागेस्थिता ह्येताः शान्तिं कुर्वन्तु मे सदा ॥
मघा सर्व्वगुणोपेता पूर्वा चैवतु फाल्गुणी ॥४७॥
उत्तराफाल्गुणी श्रेष्ठा हस्ताचित्रातथोत्तमा ॥
स्वातिर्व्विशाखा वरदा दक्षिणस्थानसंश्रिता ॥४८॥
अर्चयन्ति महाकालं देवं त्रिभुवनेश्वरं ॥
नक्षत्रमातरो ह्येतास्तेजसा परिभूषिताः ॥४९॥

ममापि शान्तिकं नित्यं कुर्व्वन्तु शिवचोदिता: ॥
अनुराधा तथा ज्येष्ठा मूल ऋद्धिवलान्विता ॥५०॥
पूर्व्वाषाढा महावीर्य्या आषाढा चोत्तराशुभा ॥
अभिजिन्नात्मन क्षेत्रं श्रवणा परमोज्ज्वला ॥५१॥
एतापश्चिमतो दीप्ता राजन्ते राजमूर्तय: ॥
इशानं पूजयन्त्येता: सर्व्वकालं सुभाविता: ॥५२॥
मम शान्तिं प्रकुर्व्वन्तु विभूतिभि: समन्विता ॥
धनिष्ठा शतभिषा च पूर्वभाद्रपदास्तथा ॥५३॥
उत्तराभाद्ररेवत्यौ अश्विनीच महर्द्धिका: ॥
भरणी च महावीर्य्या नित्यमुन्तरत: स्थिता: ॥५४॥
शिवार्चनपरानित्यं शिवध्यानैक मानसा : ॥
शान्तिं करोतु मे नित्यं सर्व्वकालशुभोदयां ॥५५॥
मेषो महाहिक: सिंहो धनु र्द्दीप्तिमताम्वरा: ॥
पूर्वेण भाषयन्त्येते शिवपूजा परायणा: ॥५६॥
शान्तिं कुर्व्वन्तु मे नित्यं शिवभक्ति परायणा: ॥
कन्याच वृषभ: श्रीमान् मकरश्चापि ऋद्धिमान् ॥५७॥
एते दक्षिणभागे तु पूजयन्त: सदाशिवं ॥
भक्त्यापरमया नित्यं शान्तिं मे कुरुतां सदा ॥५८॥
मिथुनश्चतुलाकुम्भ: पश्चिमेन व्यवस्थिता ॥
शिवपूजार्च्चनपरा: क्षमंकुर्वन्तु मे सदा ॥५९॥
कर्क्कटो वृश्चिको मीन एते ह्युत्तरत: स्थिता: ॥
पूजयन्ति सदाकालं रुद्रं भुवननायकं ॥६०॥
शान्तिं कुर्व्वन्तु मे नित्यं शिवाज्ञानुविधायिन: ॥
ऋषय: सप्तविख्याता ध्रुवान्ता: परमोज्ज्वला: ॥६१॥
शिवप्रसादसम्पन्ना: शान्तिं कुर्व्वन्तु मे सदा ॥
कश्यपो गालवो गार्ग्यो विश्वामित्रो महामुनि: ॥६२॥
मनुर्द्दक्षो वशिष्ठोऽथ मार्कण्ड: पुलह: क्रतु: ॥
नारदो भृगुरात्रेयो भरद्वाजोङ्गिरामुनि ॥६३॥
वाल्मीकि कौशिक: कण्व: शाकल्योऽथ पुर्नर्व्वशु ॥
शाकल्यायन इत्यादा ऋषयोथ महाव्रता: ॥६४॥
शिवध्यानार्च्चने द्युक्ता: शान्तिं कुर्व्वन्तु मे सदा ॥
ऋषिपत्न्या महापुण्या ऋषिकन्या कुमारिका: ॥६५॥
शिवार्च्चन परान्नित्यं शान्तिं कुर्व्वन्तु मे सदा ॥
सिद्धा: संसिद्धतपसा गणो विद्याधराग्रहा: ॥६६॥

महात्मानो महोत्साह गरुडाश्च महर्द्धिका ॥
महेश्वरपरा ह्येते महेशपादपूजकाः ॥६७॥
सिद्धिमाशु प्रयच्छन्तु आशिर्वाद परायणाः ॥
नमुचिर्दैत्यराजेन्द्रः शंकुकर्णो महावलः ॥६८॥
महादानोथ विख्याता दैत्यः परमवीर्य्यवान् ॥
हाटकेश्वरदेवस्य नित्यपूजापरायणः ॥६९॥
वरंवीर्य्यञ्च मे नित्यं प्रयच्छन्तु महर्द्धिकाः ॥
महाजम्भो हयग्रीवः प्रह्लादो व्यक्त ह्लादकः ॥७०॥
तारकोग्निमुखो दैत्यः कालनेमिर्म्महोत्कटः ॥
एतेदैत्याः महात्मानः शिवसद्भाव भाविताः ॥७१॥
पुष्टिं वलन्तथा वीर्य्यं प्रयच्छन्तु सुखोदयं ॥
विलोचनो हिरण्याक्षः सुपर्व्वाश्च सुलोमकः ॥७२॥
मुचुकुन्दो सुकुन्दश्च दैत्यो रेवतक स्तथा ॥
भावेणच परेणाशु यजन्ते सर्व्वदा शिवं ॥७३॥
सततश्च शुभात्मानः पुष्टिं कुर्व्वन्तु मे सदा ॥
दैत्यपत्न्या महाभागा दैत्यानां कन्यकाः शुभाः ॥७४॥
कुमाराश्चैव दैत्यानां शान्तिं कुर्व्वन्तु मे सदा ॥
आरक्तेन शरीरेण रक्तान्तायतलोचनः ॥७५॥
महाभोगकृताटोपः शंखाव्ज कृतलाञ्छनः ॥
अनन्तों नागराजेन्द्र शिवपादार्च्चने रतः ॥७६॥
महापाप विषंहत्वा शान्तिमाशुकरोतु मे ॥
सुश्वेतेन तु देहेन सुश्वेतोत्पल शेखरा ॥७७॥
चारु भोगो कृताटोपो हारचारु विभूषणः ॥
वासुकिर्न्नाम राजेन्द्रो रुद्रपूजा परोमहान् ॥७८॥
महापापं विषं हत्वा शान्तिमाशु करो तुमे ॥
अतिपीतेन देहेन विस्फुरद्भोगसम्पदा ॥७९॥
तेजसा चातिदिप्तेन कृत स्वस्तिक लाञ्छनः ॥
नागराड्रक्षकः श्रीमान्नागकोट्यसमन्विताः ॥८०॥
करोतु मे महाशान्तिं सर्व्वदोष विषापहान् ॥
अति कृष्णेन वर्णेन स्फीत विकट मस्तकः ॥८१॥
कण्ठे रेखात्रयोपेता घोरदंष्ट्रा युधाद्यतः ॥
कर्कोटको महानागो विषदर्प्पवलान्विताः ॥८२॥
विषशस्त्राग्निसन्तापं हत्वाशान्तिं करोतु मे ॥

पद्मवर्णेन देहेन चारुपद्मायतेक्षणः ॥
ख्यातः पद्मो महानागो हरपादार्च्चने रतः ॥८४॥
करोतु मे महाशान्तिमहापापविषक्षयं ॥
पुण्डरीकनिभेनापि देहेनामिततेजसा ॥८५॥
शंखंशूलाब्जरुचिरै भूषितो मूर्ध्नि सर्व्वदा ॥
महापद्मो महानागो नित्यं पशुपतेर्न्नतः ॥८६॥
विनिष्कृत्य विषं घोरं शान्तिमाशुकरोतु मे ॥
श्यामेनदेहभारेण श्रीमत्कमललोचनः ॥८७॥
विषदर्पावलोन्मत्तो ग्रीवायामेकरेखया ॥
शंखपालः श्रियादीप्तः शिवपादाब्जपूजकः ॥८८॥
महाविषंमहापापं हत्वा शान्तिं करोतु मे ॥
अतिघोरेण देहेन चन्द्रार्द्धकृतमस्तकः ॥८९॥
दीप्तभोगकृताटोपः शुभलक्षणलक्षितः ॥
कुलिके नागराजेशो नित्यं हरपरायणः ॥९०॥
अपहृत्य विषं घोरं करोतु मम शान्तिकं ॥
अन्तरीक्षे च ये नागा ये नागाः स्वर्ग्गसंस्थिताः ॥९१॥
गिरिकन्दरदुर्ग्गेषु ये नागाभुविसंस्थिताः ॥
पाताले ये स्थितानागाः सर्व्वेऽप्यत्र समाहिताः ॥९२॥
रुद्रपादार्च्चने शक्ताः कुर्व्वन्तु मम शान्तिकं ॥
नागिन्यो नागकन्यांश्च तथा नागकुमारिकाः ॥९३॥
शिवभक्ताः सुमनसः शान्तिं कुर्व्वन्तु मे सदा ॥
य इदन्नागसंस्थानं कीर्तयेच्छृणुयादपि ॥९४॥
न तस्य सर्प्पाहिंसन्ति न विषं क्रमते सदा ॥
गङ्गापुण्या महादेवी यमुनानर्म्मदा नदी ॥९५॥
गोमती तापिकावेरी वरुणा देविका तथा ॥
सर्वभूतपतिं देवं परमेशं महेश्वरं ॥९६॥
पूजयन्ति महानद्यः शिवसद्भाव भाविता ॥
शान्तिं कुर्व्वन्तु मे नित्यं तथा पापपरिक्षयः ॥९७॥
सिद्धिमाशु प्रयच्छन्तु सर्व्वविघ्नविवर्ज्जिताः ॥
चन्द्रभागा महापुण्या नदी गोदावरी शुभा ॥९८॥
शरयूगण्डकी श्रेष्ठा कौशिकी च सरस्वती ॥
एतानद्यो महाभागाः शिवपादार्च्चने रताः ॥९९॥
शान्तिं कुर्व्वन्तु मे प्रीताः शिवध्यानैकमानसा : ॥
नैराञ्जनानामनदी शोणश्चापि महानदः ॥१००॥

मन्दाकिनी च परमा तथा सन्निहिता शुभा ॥
एताश्चान्याश्च वहवो भुविदिव्यान्तरीक्षुगाः ॥१०१॥
रुद्रार्चनपरा नद्यः कुर्वन्तु मम शान्तिकं ॥
महावैश्रवणो देवो यक्ष राजो महर्द्धिकः ॥१०२॥
यक्षकोटिपरीवारो यक्षसंघेन संयुतः ॥
महाविभव संपन्नो हरपादार्च्चने रतोः ॥१०३॥
हरध्यानैकपरमो हरपादनतोत्तमः ॥
शान्तिं करोतु मे प्रीत : पद्मपत्रायतेक्षणः ॥१०४ ॥
मणिभद्रो महायक्षो मणिरत्नविभूषितः ॥
मनोरहेण हारेण कण्ठलग्नेन राजते ॥१०५॥
यक्षिणी यक्षकन्याभिः परिवारितविग्रहः ॥
रुद्रार्च्चनपरोयुक्तः करोतु मम शान्तिकं ॥१०६॥
सुविरोमोथ यक्षेन्द्रो मणिकुण्डलभूषितः ॥
ललाटे हेमपट्टेन शोभनेन विराजते ॥१०७॥
वहुयक्षासमाकीर्णो यक्षैर्न्नमित विग्रहः ॥
शिवपूजा परोभक्तः करोतु मम शान्तिकं ॥१०८॥
श्रीमान् विभाण्डको यक्षो नानारत्नविभूषितः ॥
चारुणा कुण्डलेन्द्रेण कर्णे नित्यं विराजते ॥१०९॥
यक्षेश्वरो यक्षपतिर्य्यक्षसेनापति र्ध्रुवः ॥
हरपादार्च्चकः श्रीमान् करोतु मम शान्तिकं ॥११०॥
धृतराष्ट्रोमहाराजो यक्षो यक्षाधिपः प्रभुः ॥
दिव्यपद्माङ्कुकच्छन्नो मणिकाञ्चनभूषितः ॥१११॥
शिवभक्तः शिवध्यानशिवपूजापरायणः ॥
शिवप्रसादसम्पन्नः करोतु मम शान्तिकं ॥११२॥
पूर्णभद्रो महायक्षः सर्व्वालङ्कारभूषितः ॥
रत्नप्रदीप्ततप्तेन हेम्नातीव विराजते ॥११३॥
यक्षकोटिसहस्रेण परिवारेण संयुतः ॥
रुद्रप्रणामपरमो रुद्रभक्तियुतः पुनः ॥११४॥
रुद्रार्च्चनसमायुक्तः करोतु मम शान्तिकं ॥
विरूपाक्षश्च यक्षेन्द्रः श्वेतवासो महाद्युतिः ॥११५॥
चारुकाञ्चनवर्णाभिः किङ्किणीभिः समन्वितः ॥
भूषितश्च सदाकालवरदानैक तत्परः ॥११६॥
रुद्रपूजापरोभक्तः करोतु मम शान्तिकं ॥
अन्तरीक्षगतायक्षा ये यक्षाः स्वर्गवासिनः ॥११७॥

गिरीकन्दरदुर्गेषु ये यक्षा भूनिवासिनः ॥
अन्तरीक्षे च ये यक्षाः पातालतल वासिनः॥११८॥
नानारूपायुधायक्षा नानावेशधरास्तथा ॥
शिवभक्ताः सुमनसः शिवपूजासमुत्सुकाः ॥११९॥
शान्तिं कुर्व्वन्तु मेहृष्टाः शान्ताः शान्तिपरायणाः ॥
यक्षकन्यामहाभागाः शिवपूजार्च्चने रताः ॥
शान्तिं स्वस्त्ययनं क्षेमं वलं कल्याणमुत्तमं ॥१२१॥
सिद्धिञ्चासु प्रयच्छन्तु नित्यमेव समाहिताः ॥
मेरूमन्दर कैलाशो मलयो गन्धमादनः ॥१२२॥
श्रीपर्वतोमहेन्द्रश्च हिमकूट स्तथैव च ॥
पर्व्वताः सर्व्वदा सर्व्वपर्व्वताश्च महर्द्धिकाः ॥१२३॥
शिवभक्ताः सदाकालं क्षेमं कुर्व्वन्तु मे सदा ।
जंवूद्वीपः प्लक्षद्वीपः शाल्मलिः कुशद्वीपकं ॥१२४॥
क्रौञ्च द्वीपः शाक द्वीपः गोमध्ये द्वीपकोमहान् ॥
पुष्करन्तुमहाद्वीपमेतद्द्वीपामहात्मनाः ॥१२५॥
रुद्रभक्तिरताः सर्व्वे शान्तिं कुर्व्वन्तु मे सदा ॥
क्षारोदः क्षीरोदश्चैव दध्नो घृतोद एव च ॥१२६॥
सुरोदः स्वादुदकश्चइक्षुस्वादस्तथैव च ॥
सप्तसमुद्रनामानः कुर्व्वन्तु मम शान्तिकं ॥१२७॥
सागराः सर्व्वतः सर्व्वे सागराः सर्व्वतः स्थिताः ॥
रुद्रयज्ञपरा नित्यं कुर्व्वन्तु मम शान्तिकं ॥१२८॥
राक्षसाः सर्व्वतः सर्व्वे राक्षसाघोररूपिणः ॥
राक्षसा ये महावीर्य्या राक्षसाश्चमहावलाः ॥१२९॥
स्थलस्थाराक्षसा ये तु अन्तरीक्षे तु राक्षसाः ॥
पाताले भूतले ये नित्यं रुद्र परायणाः ॥१३०॥
शान्तिं कुर्व्वन्तु मे नित्यं सततं शिवभावितः ॥
भैरवं यस्य रूपन्तु प्रेतभस्मावगुण्ठितं ॥१३१॥
तेजसा तस्य देवस्य शान्तिं कुर्व्वन्तु मे सदा ॥
नित्यमुज्ज्वलवेशेन योगिन्योथ महावला ॥१३२॥
रूपिण्यो विविधाकारो डाकिन्याश्चमहर्द्धिकाः ॥
रुद्रप्रणामनिरता रुद्रपूजार्च्चने रताः ॥१३३॥
रुद्रैकाहितचेतस्काः कुर्व्वन्तु मम शान्तिकं ॥
अन्तरीक्षगतायाश्च डाकिन्यः स्वर्गसंस्थिताः ॥१३४॥

पाताले यास्तुडाकिन्या गिरिदुर्ग्गषु याः स्थिताः ॥
तृतीयलोचनं यस्य त्रिशूलं भस्मभासुरं ॥१३५॥
तेजसा तस्य देवस्य शान्तिं कुर्व्वन्तु मे सदा ॥
सर्व्वभूता महारूपाः सर्व्व भूता महोज्वलाः ॥१३६॥
सर्व्वभूताः स्थिताः सौम्या स्सर्व्वे भूतमनोज्वला : ॥
अन्तरीक्षे च ये भूता ये भूता दिक्षुसंस्थिताः ॥१३७॥
पाताले भूतले ये तु भूता भूति विधायिकाः ॥
खट्वाङ्गाम्विमलं यस्य त्रिशूलं भस्मभासुरं ॥१३८॥
तेजसा तस्य देवस्य शान्तिं कुर्व्वन्तु मे सदा ॥
प्रेताः प्रेतगणाः सर्व्वे ये प्रेताः सर्व्वदिङ्मुखाः ॥१३९॥
अतिदीप्ताश्च ये प्रेता ये प्रेता रुधिराशनाः ॥
अन्तरीक्षे च ये प्रेताः ये प्रेताः स्वर्ग्गवासिनः ॥१४०॥
पाताले भूत प्रेता ये ये प्रेताः कामरूपिणः ॥
श्मशाने निलयोयस्य वृषभो यस्य वाहनः ॥१४१॥
तेजसा तस्य देवस्य शान्तिं कुर्व्वन्तु मे सदा ॥
ये पिशाचा महावीर्य्या ऋद्धिमन्तो महावलाः ॥१४२॥
नानारूपधराः सर्व्वे सर्व्वे च गुणवत्तराः ॥
अन्तरीक्षे पिशाचा ये स्वर्ग्गे ये च पिशाचकाः ॥१४३॥
भूपाताले पिशाचाश्च वहुरूपामनोजवाः ॥
चन्द्रार्द्धं मस्तके यस्य गङ्गा येन जटाधृता ॥१४४॥
तेजसा तस्य देवस्य शान्तिं कुर्व्वन्तु मे सदा ॥
अपस्मार ग्रहाः सर्व्वे सर्व्वे चापि ज्वरग्रहाः ॥१४५॥
गर्भवाल ग्रहा ये तु नानारोगग्रहाश्च ये ॥
अन्तरीक्षे ग्रहा ये तु स्वर्ग्गे ये तु ग्रहोत्तमाः ॥१४६॥
भूपाताले ग्रहा ये तु ये ग्रहाः सर्व्वतो दिशः ॥
कण्ठे यस्य महानीलं भूषणं यस्य पन्नगः ॥१४७॥
तेजसा तस्य देवस्य शान्तिं कुर्व्वन्तु मे सदा ॥
इति देवादयः सर्व्वे शिवाज्ञानुविधायिनः ॥१४८॥
कुर्व्वन्तु जगतः शान्तिं शिवभक्तेषु सर्व्वदा ॥
जयात्मयोगसंस्थाय जय संशुद्ध चेतसे ॥१४९॥
जय दानैकशूलाय जलेशाय नमोस्तुते ॥
जयोत्तमाय देवाय जय कल्याण कारिणे ॥१५०॥
जय प्रकटदेहाय जय जप्यायते नमः ॥
जयलक्ष्मी धनाध्यक्ष जयकान्तिविधायिने ॥१५१॥

जय वाक्य विशुद्धाय अजिताय नमोनमः ॥
जय त्रिशूलहस्ताय जय खट्वाङ्ग धारिणे ॥१५२॥
जय निर्ज्जितलोकाय जयरूपायते नमः ॥
जय कान्तार्द्धदेहाय जय चन्द्रार्द्धधारिणे ॥१५३॥
जय देवातिदेवाय जय रुद्रायते नमः ॥
जय त्रिभुवनेशाय जय विख्यातकीर्त्तये ॥१५४॥
जय धाराय सर्व्वाय जय कर्त्रे नमोनमः ॥
जय मोक्षप्रदाताय सृष्टि संहार कारिणे ॥१५५॥
ब्रह्मविष्ण्वीन्द्रवन्द्याय शिवशान्ताय ते नमः ॥
इत्येवं शान्तिकाध्यायं य पठेच्छृणुयादपि ॥१५६॥
सुविधूयाशुपापानि शिवलोके महीयते ॥
कन्यार्थी लभते कन्यां जयकामो जयं लभेत् ॥१५७॥
अर्थकामोलभेदर्थान् पुत्रकामः सुतावहून् ॥
विद्यार्थीलभते विद्यां योगार्थी योगमाप्नुयात् ॥१५८॥
यद्यत्प्रार्थयते कामान् मानवः श्रवणादिह ॥
तत् सर्व्वं शीघ्रमाप्नोति देवानाञ्च प्रियो भवेत् ॥१५९॥
शान्त्याध्यायं पठन् यस्तु संग्रामे प्रविशेन्नरः ॥
स निर्ज्जित्याहवे शत्रून् कल्पाशैः परिपूज्यते ॥१६०॥
अन्तरं मोदते कालमतिरस्कृतशासनः ॥
व्याधिभिर्न्नाभि भूयेत पुत्रपौत्र प्रतिष्ठितः ॥१६१॥
पाठ्यमानमिदं पुण्यं यमुद्दिश्य च पठ्यते ॥
न तस्य रोगा वाधन्ते वातपित्तादि संभवाः ॥१६२॥
नाकालमरणन्तस्य न सर्प्पैश्चापि दंश्यते ॥
न विषं क्रमते देहे न जडान्धत्वमूकता ॥१६३॥
नोपसर्ग्गभयन्तस्य नोत्पातस्य भयं भवेत् ॥
नाभिचारकृतैर्द्दोषैर्ल्लिप्यते स कदाचन ॥१६४॥
यत् पुण्यं सर्व्वतीर्थानां गङ्गादीनां विशेषतः ॥
तत् पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिह ॥१६५॥
दशानां राजसूयानामग्निष्टोमशतस्य च ॥
श्रवणात्फलमाप्नोति कोटी कोटी गुणोत्तरं ॥१६६॥
अवध्यः सर्व्व भूतानामन्येषाञ्च विशेषतः ॥
जीवेद्वर्षशतं साग्रं सर्व्व व्याधिविवर्ज्जितः ॥१६७॥
गोघ्नश्चैव कृतघ्नश्च ब्रह्महा गुरुतल्पगः ॥
शरणागतघाती च मित्र विश्रम्भ घातकः ॥१६८॥

दुष्टपाप समाचारो मातृहा पितृहा तथा ॥
श्रवणादस्य भावेन मुच्यते सर्व्वपातकैः ॥१६९॥
शान्त्याध्याय मिदं पुण्यं नदेयं यस्य कस्यचित् ॥
शिवभक्ताय दातव्यं शिवेन कथितं पुरा ॥१७०॥

इति शिवधर्म्म शास्त्रे नन्दिकेश्वर प्रणिते शान्त्याध्यायो नाम षष्ठोऽध्यायः ॥६॥

अथ पशुपतिमते शिवधर्मशास्त्रे नन्दिकेश्वर प्रोक्तायां शिवार्चन फलकथनं नाम

सप्तमोऽध्यायः ॥

ॐ नमः शिवाय

॥नन्दिकेश्वर उवाच ॥

ये स्मरन्ति सदाकालमीशानं पूजयन्ति वा ॥
रुद्रलोक परिभ्रष्टा विज्ञेयास्ते गणेश्वरः ॥२॥
अग्निहोत्राश्च वेदाश्च यज्ञाश्च वहुदक्षिणा ॥
शिवलिङ्गार्च्चनस्यैते कोट्यंशेनापि नो समाः ॥३॥
सदा जयन्ति यज्ञेन सदा दानं प्रयच्छति ॥
सदासज्ज्ञानदक्षश्च यः सदार्च्चयते शिवं ॥४॥
य शिवंपूजयेन्नित्यं प्रणमेद्वापि भक्तितः ॥
तस्य योगञ्च मोक्षञ्च शिवः प्रीतः प्रयच्छति ॥५॥
यः कुर्य्यादर्च्चनं मासमेकाहारो जितेन्द्रियः ॥
स यत्फलमवाप्नोति न तत्सर्व्वैर्म्महामखैः ॥६॥
पौर्णमास्याममावास्याञ्चतुर्द्दश्याष्टमीषु च ॥
स्नापयित्वाम्भसा लिङ्गं सर्वयज्ञ फलं लभेत् ॥७॥
कृष्णपक्षे त्रयोदश्यामुपोष्य परमेश्वरं ॥
प्रातर्म्मध्यान्ह यः पूजां चतुर्द्दश्यां समाचरेत् ॥८॥
पञ्चगव्यं स पीत्वादौ हविर्भूञ्जीत वाग्यतः ॥
दशानां सोश्वमेधानां फलं प्राप्नोति मानवः ॥९॥
उपोष्य च कृष्णा ष्टम्यामर्च्चयित्वा तु शंकरं ॥
प्राप्नोति परमं स्थानं यत्रदेवो महेश्वरः ॥१०॥
ब्रह्मचारी शुचिर्ब्भूत्वा त्रिसन्ध्यां पूजयेच्छिवं ॥
कुलसप्तकमुद्धृत्य शिवलोके महीयते ॥११॥

दानोपवासनियमैः पूजा जागर भोजनैः ॥
महास्नानादिविधिना शिवं पर्व्वसु पूजयत् ॥१२॥
यावत्सु पर्व्वकालेषु यावदर्च्चयते शिवं ॥
यावत् कालार्च्चनात्पुण्यं तावत्पर्व्वार्च्चनाल्लभेत् ॥१३॥
तस्मात् सर्व्व प्रयत्नेन यथा विभवविस्तरैः ॥
पूजनीयः शिवोनित्यं महापुण्य जीगीषयाः ॥१४॥
नैरतर्य्येण षण्मासान् विधिना पूजयेच्छिवं ॥
पुण्यन्तदेव सकलं लभते विषुवार्च्चने ॥१५॥
एवमेव विधिर्ज्ञेयं ग्रहणे चोत्तरायणे ॥
संक्रान्तिदिनच्छिद्रेषु षडशीतिमुखेषु च ॥१६॥
मासैश्चतुर्भिर्य्यत्पुण्यं विधिना पूज्यशंकरं ॥
तत्कार्त्तिक्यां लभेत्पुण्यं पौर्णमास्यां शिवार्चने ॥१७॥
पुण्यमेव च फाल्गुण्यामाषाढ्यान्च विशेषतः ॥
चतुर्मास्यार्च्चनं ह्येतत्महापुण्यफलप्रदं ॥१८॥
माघेमासे समुद्युक्तस्त्रिसन्ध्यं योर्च्चयेच्छिवं ॥
षण्मासिकं कृतंपुण्यं मासेनैव न संशयः ॥१९॥
यथामाघे तथाषाढे मासे चैव तु कार्तिके ॥
त्रिषुपुण्यं समं ज्ञेयं मासेष्वेतेषु यत्कृतं ॥२०॥
चतुर्मासार्च्चनात्पुण्यं पौषमासार्च्चनाल्लभेत् ॥
चैत्र फाल्गुणयोः पुण्यं द्विमासजनितं लभेत् ॥२१॥
चतुर्द्दश्याममावाश्यां पौर्णमास्यान्च पाक्षिकं ॥
पुण्यमष्टगुणं ज्ञेयमष्टम्यां योऽर्च्चयेच्छिवं ॥२२॥
प्रदद्याद्योगवाँल्लक्षं दोग्ध्रीणां वेदपारगे ॥
एकान्हमर्च्चयेल्लिङ्गं तस्य पुण्यं ततोऽधिकं ॥२३॥
मासि मासि तु योऽश्नीयाद्यावज्जीवं द्विजोत्तमः ॥
यश्चार्च्चयेत्सकृल्लिङ्गं सममेतन्नसंशयः ॥२४॥
अनेन क्रमयोगेन पुण्यवृद्धिर्द्दिनेदिने ॥
ज्ञेया संवत्सरस्यापि यावत्कालं तमर्च्चयेत् ॥२५॥
य पुनः सङ्गमुत्सृज्य शिव मब्दं प्रपूजयेत् ॥
अनन्तराच्छतगुणं पुण्यं तस्य प्रवर्तते ॥२६॥
पन्चाशद्गुणितं पुण्यमब्दार्द्धं योर्च्चयेच्छिवं ॥
ऋतावृतौ तदर्द्धस्यान्मासे चापि तदर्द्धकं ॥२७॥
मासार्द्धमपि यो लिङ्गं नैरन्तर्येण पूजयेत् ॥
पुरुषोत्तमः सविज्ञेया नैरन्तर्य्य हिदुष्करं ॥२८॥

प्रातरुत्थाप्यो लिङ्गं भक्त्या पूजयते सदा ॥
कपिलानां शतं दत्वा यत्पुण्य न्तदवाप्नुयात् ॥२९॥
मध्यं दिनकरे प्राप्ते यो लिङ्गं संप्रपूज्यते ॥
संपूर्णापृथिवीन्दत्वा यत्फलं तदवाप्नुयात् ॥३०॥
वारुणीमाश्रिते सूर्य्ये यः शिवंसम्प गर्चयेत ॥
गवांशतसहस्रस्य दन्तस्य फल माप्नुयात् ॥३१॥
यो लिङ्गमर्द्ध रात्रेतु शुचि र्भूत्वाप्रपूजयेत् ॥
सम्यगष्टशतन्तेन यज्ञानं लभ्यते फलं ॥३२॥
एवं वेलासु सर्व्वासु अवेलास्वपि शंकरं ॥
भक्त्यापूजयते नित्यं सर्व्व काममवाप्नुयात् ॥३३॥
शिवलिङ्गं महापुण्यं सर्व्वदेवनमस्कृतं ॥
य स्पृशेदपि हस्ताभ्यां न सपापैः प्रलिप्यते ॥३४॥
नतेभूयः प्रयास्यन्ति योनिसंसार संकटं ॥
क्रमात्मोक्षगमिष्यांन्ति ये नरालिङ्गमाश्रिताः ॥३५॥
मेरुमन्दर मात्रोपि राशीः पापस्य कर्म्मणः ॥
इश्वरवैद्यमासाद्य नश्यते दुष्टरोगवत् ॥३६॥
लिङ्गार्च्चनरतोनित्यं महापातकसम्भवैः ॥
दोषै कृतैर्न्न लिप्येत पद्म पत्र मिवास्मसा ॥३७॥
छित्वा भित्वातु भूतानि हत्वासर्व्वमिदं जगत् ॥
यजेदेकं विरूपाक्षं न स पापेन लिष्यते ॥३८॥
अपवित्र पवित्रोवा सर्व्वावस्थागतोपिवा ॥
शिवमिष्टवा नरः सोपि प्रयातिपरमाङ्गतिं ॥३९॥
अयं विनैव मन्त्रेण पुष्पराशीः प्रकीर्तितः ॥
स्यादिदं मन्त्र संयुक्तपुण्यं शत गुणाधिकं ॥४०॥
तस्मात्मन्त्रेण शर्व्वाय स्नानंगन्ध जलादिकं ॥
क्षितिं ग्रामञ्च रत्नञ्च वस्त्रं हेमं निवेदयेत् ॥४१॥
ज्ञेयोनमः शिवायेति मन्त्रः सर्व्वार्थसाधकः ॥
सर्व्वमन्त्राधिकश्चायमोङ्काराद्यः षडक्षरः ॥४२॥
शिवेनान्तर्व्वहिर्यस्मात्सर्व्वमेव चराचरं ॥
जगदोमश्च कुरुते तस्मादोमिति संस्मृतः ॥४३॥
अयमर्द्धचतसृभिर्म्मात्राभिः परिगीयते ॥
रुद्रो ब्रह्मा हरिश्चैव मात्रातिस्र प्रकीर्तिताः ॥४४॥
दक्षिणाङ्गे भवेद्ब्रह्मा हरिर्व्वामाङ्गसम्नवः ॥
हृदयान्निर्र्गतोरुद्रो ब्रह्म विष्णु प्रवोधकः ॥

जगत्सृष्टिकरो ब्रह्माविष्णुर्ल्लोकविमोहकः ॥
अनुग्रहकरोनित्यं लीनोरुद्रः शिवात्मकः ॥४६॥
त्रिभिरेतैर्ज्जगद्व्याप्तं कारणैरात्मकर्म्मभिः ॥
तिस्रोमात्राः शिवस्यैताः सर्व्वलोकप्रपूजिता ॥४७॥
एता एव त्रयोलोकास्त्रयोदेवास्त्रयोग्नयः ॥
त्रयोगुणास्त्रिवर्गाश्च यच्चान्यज्जगतिस्थितं ॥४८॥
अर्धमात्रात्परो रुद्रः शिवः परमकारणः ॥
तस्मादेतत्समुत्पन्नं जगतः कारणत्रयं ॥४९॥
सर्व्वज्ञान परः शुद्धो नमस्कारो महेश्वरः ॥
नमस्कारात्मयज्ञेन तस्मात्संपूजयेच्छिवं ॥५०॥
अज्ञानमशिवत्वंस्यात् सर्व्व दुःखालयं महत् ॥
स्वभावात्तदवाप्तंहि तस्माद्रुद्रोदितः शिवः ॥५१॥
नमः शिवाय शान्ताय कारणत्रय हेतवे ॥
निवेदयामिचात्मानं मन्त्रैवं मनसाधुना ॥५२॥
कृत्वौन्नमः शिवायेति मुच्यते सर्व्व पातकैः ॥
यस्मात्तस्मात् सदा मन्त्रमोङ्काराद्यमनुस्मरेत् ॥५३॥
सर्वदा सर्व्वकार्य्येषु श्रुतनिष्ठीवनादिषु ॥
जन्तुर्न्नमः शिवायेति शिवमुक्त्वा शिवं व्रजेत् ॥५४॥
यः स्वयं प्रतिवुद्धस्तु प्राणान्ते च सकृन्स्मरेत् ॥
यदोन्नमः शिवायेति स गच्छेत्परमं पदं ॥५५॥
शाठ्येनापि नमस्कारः प्रयुक्तः शूलपाणये ॥
संसारस्थूलवन्धानसुंच्छेदनकरो भवेत् ॥
अपवित्रः पवित्रो वा सर्व्वावस्थांगतोपि वा ॥
यः स्मरेत् सततं रुद्रं न स पापेन लिप्यते ॥५७॥
स्मरणादेवरुद्रस्य पापसंघातपञ्जरं ॥
शतधाभेदमायाति गिरिव्वज्राहतो यथा ॥५८॥
सर्व्वेषांशिवभक्तानामशेषार्थ प्रसिद्धये ॥
मन्त्रमाह शिवः सारमशेषार्थ प्रवन्धनम् ॥५९॥
सवीजं सर्व्वविद्यानामाद्यं ब्रह्मपरात्परं ॥
सर्व्वार्थसाधकं मन्त्रं शिवसूत्रं षडक्षरं ॥६०॥
भाष्यमस्यैवसूत्रस्य सर्वज्ञेन स्वयंभुवा ॥
पश्चात्परापराणीहव्यक्तार्थगदितानि तु ॥६१॥
तस्मादनेन मन्त्रेण प्रकुर्व्वीत शिवार्च्चनं ॥
सन्ध्यायाञ्च जपेदेनं सर्व्वपापविशुद्धये ॥६२॥

गृहाच्छत गुणं पुण्यं सन्ध्यायाञ्च जलाश्रये ॥
शिवदक्षिणमूर्त्तौच तत्पुण्यमयुताधिकं ॥६३॥
तस्माच्छिवालये सन्ध्यामाचरेच्छान्तमानसः ॥
शिवमन्त्रेण सततं सर्व्वकामप्रसिद्धये ॥६४॥
जितेन्द्रियः शान्तमनाः शिवमन्त्रेण यो ऽर्चयेत् ॥
न तस्य शक्यते वक्तुं पुण्यं वर्षशतैरपि ॥६५॥
एतावच्छक्यते वक्तुं यस्मिन्देशेवसेदसौ ॥
सोऽपि देशो भवेत्पूतः किं पुनस्तस्य वान्धवाः ॥६६॥
येषामन्नं समस्नाति ये चास्य परिचारकाः ॥
ते ऽपि निहतपापाः स्युस्तैर्व्विना न शिवार्च्चनं ॥६७॥
न तत्र देशे दुर्भिक्षं न च मारी प्रवर्त्तते ॥
नाकाले म्रियते राजा पूज्यते यत्र शंकरः ॥६८॥
यः शिवं पूजयेन्नित्यं मनुजोऽपि जितेन्द्रियः ॥
भावाभावसमायुक्तः स गच्छेत्परमाङ्गतिं ॥६९॥
ब्रह्मचारीसहस्रेभ्यो वेदाध्यायीविशिष्यते ॥
वेदाध्यायीसहस्रेभ्यो ह्यग्निहोत्र विशिष्यते ॥७०॥
अग्निहोत्रिसहस्रेभ्यो यज्ञयाजी विशिष्यते ॥
यज्ञयाजिसहस्रेभ्यः सत्रयाजी विशिष्यते ॥७१॥
सत्रयाजिसहस्रेभ्यः सर्व विद्यान्तपारगः ॥
सर्व्वविद्याविद्कोटिभ्यः शिवभक्तो विशिष्यते ॥७२॥
यस्मादेवं शिवं तस्मादर्च्चयेच्छान्तमानसः ॥
मैत्रीकारुणिकोऽ जस्रं प्राप्नोति सततं शिवं ॥७३॥
क्षणार्द्धेनापि यत्पुण्यं कुर्य्यात्मैत्रीं सुभावितः ॥
न तद्वर्षशतेनापि तपोयज्ञशतैरपि ॥७४॥
सर्व्व प्राणिषु कारुण्यं दीनानाथेषु सेवनं ॥
सुखप्राप्तिश्च मैत्रीश्च मुदितां पुण्यशीलतां ॥७५॥
आत्मवच्च ततोप्रेक्षसर्वेषाञ्च वदेच्छिवं ॥
इत्येवं पञ्चधाचित्तं भावयित्वा यजेच्छिवं ॥७६॥
इष्ट्या तु परयाभक्त्या भगवन्तं महेश्वरं ॥
कृताञ्जलि पुटोर्भूत्वा स्तोत्रमेतदुदीरयेत् ॥७७॥
नमस्ते ज्ञानरूपाय सर्व्वज्ञानैक हेतवे ॥
ज्ञानज्ञानाय शुद्धाय नित्यज्ञानाय ते नमः ॥७८॥
सूक्ष्माय सूक्ष्मसूक्ष्माय सूक्ष्मज्ञानैक हेतवे ॥
सूक्ष्माणामपि सूक्ष्माय नमः सूक्ष्मतमाय ते ॥७९॥

ॐ

ॐ 卐 गौः श्रीः शिवौ वेदाः

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवोपनिषदि मुक्तिनिर्द्देशाय

प्रथमोऽध्यायः

शिवोपनिषद्

(शिवको रहस्यमय कल्याणकारी उपदेश)

श्रीगणेशाय नमः
ॐ नमः शिवाय

शिवोपनिषदव्यया शिवमुखोद्गता शाश्वती
मतं पशुपतेरिदं हि शिवधर्मशास्त्रं महत् ।
अनूदितमिहादरान्नृहरिणा मुदा योगिना
सदा पठतु मानवो भवतु मोक्षलक्षाग्रणीः ॥
शके शरदि दिग्गजग्रहगजेन्दुयुक्ते क्रम
ऋतौ शरदि शारदाप्तविजयादशम्या दिने ।
ध्रुवाध्युषितकाष्ठमण्डपपुरे कृतो वन्दिना
दिनैर्दशभिरासने प्रहरपञ्चकस्थायिना ॥

ॐका वाच्य कल्याणमय शिवलाई नमस्कार । शिवाशिवसुत विद्या र बुद्धिका अधिष्ठाता गणेशलाई नमस्कार सरस्वतीलाई नमस्कार ।

कैलासशिखरासीनमशेषामरपूजितं ॥
कालघ्नं श्रीमहाकालमीश्वरं ज्ञानपारगं ॥ १॥
सम्पूज्य विधिवद् भक्त्या कृष्णात्रेयः सुसंयतः ॥
सर्व्वभूतहितार्थाय पप्रच्छेदम्महामुनिः ॥ २ ॥

पशुपतिनाथका परम भक्त पुष्पदन्त गन्धर्वराजले शिव महिम्नः स्तोत्रमा–

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥

इत्यादि भनियेको यो पशुपतिमत शिवधर्म महाशास्त्र शिवोपनिषद् आदि शिवको उपदेश (पशुपतिनाथको मत = धर्म) हो र शिवका मुखारविन्दवाट शिवा (पार्वती) स्कन्द. नन्दी. गणेश महाकाल. भैरव आदि रुद्रगण, प्रमथगण, सिद्धगण, ऋषिगण, मुनिगण, देवगण तथा दानवगण र मानवगणले समय-समयमा सुनेका छन् । तेसै प्रसङ्गमा एक समय विश्व भरिका पर्वतहरूमध्ये सर्वोच्च र उज्याला हिमालका पनि मुकुट भयेका मानसरोवरका वायव्य कोणमा उभियेका कैलासकूट माथि विराजमान भयेका, अशेष (यौटा शेष न रही ३३ कोटि) देवताहरुद्वारा पूजियेका, समस्त ज्ञान (वेदादि परा र अपरा विद्या) का पारङ्गत, समग्र ज्ञानका राशि, कालघ्न (मृत्युको पनि मृत्यु गर्ने) श्रीमहाकाल (महामृत्युञ्जय शिव पशुपतिनाथ) ईश्वरको श्रद्धा भक्ति साथ, विधिवद् पूजा र स्तुति गरेर राम्रैसंग यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान, समाधिका अष्टाङ्ग योगले युक्त भयेका महामुनि कृष्ण आत्रेय (अत्रि ऋषिका सन्तान) ले संसारका समस्त जीवजातिको हित होस् भन्ने हेतुले भगवान् शिव (महाकाल) सित यस्तो प्रश्न सोधे :–

ज्ञानयोगं न विन्दन्ति ये नरा मन्दबुद्धयः ॥
ते मुच्यन्ते कथं घोराद् भगवन् ! भवसागरात् ॥३॥
एवं पृष्टः प्रसन्नात्मा कृष्णात्रेयेण धीमता ॥
मन्दबुद्धिविमुक्त्यर्थं महाकालः प्रभाषते ॥४॥

हे भगवन् ! तपाई भगवान् हुनुहुन्छ । भगवान्मा, अणिमा, महिमा, लघिमा, गरिमा, प्राप्ति प्राकाम्य, ईशित्व, वशित्व आदि ईश्वरीय गुण, धर्म, यश, कीर्ति, श्री (शोभा), ज्ञान, वैराग प्रमुख निखिल कुरा छन् । सर्वज्ञ हुनुहुन्छ र अन्तर्यामी हुनुहुन्छ अनि आशुतोष र भक्तवत्स हुनुहुन्छ । तसर्थ कर जोरी विन्ति गर्छु जो मन्दमति मान्छे तपाईको ज्ञानयोग जान्दैनन बुझ्दैनन् र योगाभ्यास गर्दैनन्, तिनीहरू घोर भवसागरवाट कसरी मुक्त हुनन् ? हे शिव भन्नु होस् ? भनेर अत्रिगोत्रका बुद्धिमान ऋषि कृष्णले सोधेपछि प्रसन्न भयेर भगवा महाकाल, मन्दमति प्राणीहरुको मुक्ति गर्ना निम्ति शिवोपनिषद्को उपदेश दिनुहुन्छ :–

॥ महाकाल उवाच ॥

पुरा रुद्रेण गदिता शिवधर्म्माः सनातनाः ॥
देव्याः सर्वगणानाञ्च संक्षेपाद् ग्रन्थकोटिभिः ॥५॥
आयुः प्रज्ञान्तथा शक्तिं प्रसमीक्ष्य नृणामिह ॥
तापत्रयप्रपीडाश्च भोगतृष्णाञ्च मोहिनीं ॥६॥
ते धर्म्माः स्कन्दनन्दिभ्यामन्यैश्च मुनिसत्तमैः ॥
सारमादाय निर्दिष्टाः पृथक् प्रकरणान्तरैः ॥७॥
सारादपि महासारं शिवोपनिषदं परं ॥
अल्पग्रन्थम्महार्थञ्च प्रवक्ष्यामि जगद्धितं ॥८॥

भगवान् महाकाल पशुपतिनाथ शिवले भन्नुभयो :- अघि पनि रुद्ररूपले भनेका सदा शास्वत रहने सनातन शिव धर्म संक्षेपले भन्दा पनि विषय वस्तुका गौरवले गर्दा करोडौं ग्रन्थ (श्लोक) हुन गये र ती सवै धर्म देवी (गौरी देवी पार्वती) ले, सवै गण (माथि भनियेका नन्दी स्कन्द कुमार गणेश आदि प्रमथगण र अन्य सवै देवदेवीगण सिद्धर्षिगण) ले सुनेका छन् । तेसपछि युगानुसार मनुष्यादि प्राणिहरूका आयु, बुद्धि, शक्ति आध्यात्मिक, आधिदैविक, आधिभौतिक पीडा, मोहिनी भोगतृष्णा इत्यादिको विवेक विचार राखेर यथोचित ती धर्म स्कन्द नन्दी तथा अन्य मुनि सन्तहरूले पृथक् पृथक् प्रकरण गरेर सार झिकेर निर्देश गरेका छन् । अव म पुनः सारको पनि महासार परम कल्याणकारी शिवोपनिषद् (शिव कल्याण गर्ने, शिवा र शिवको उपदेश) अल्पग्रन्थ (श्लोक शब्द थोरै भयेको) तर महार्थ (महान् अर्थ ज्ञान) भयेको र समग्र जगत्को हित गर्ने गरी भन्नेछु :-

शिवः शिव इति शान्तन्नाम चाद्यम्मुहुर्म्मुहुः ॥
उच्चारयन्ति तद्भक्त्या ते शिवा नात्र संशयः ॥ ९॥
अशिवाः पाप संयुक्ताः पशवः सर्व्वचेतनाः ॥
यस्माद्धि लक्षणात्तेषान्तस्मादीशः शिवः स्मृतः ॥१०॥

शिव ! शिव ! यति यो भगवान् पशुपतिनाथको पहिलो शान्त (कल्याणमय शान्तिदायक) नाम शिवका भक्तिले युक्त भयेर जो जीव सर्वदा उच्चारण गर्छन्, ती पनि शिवै हुन् (अथवा यसै जन्ममा शिवसायुज्य मुक्ति प्राप्त गर्छन्) यसमा कुनै संशय छैन । सवै चेतनाधारी चराचर प्राणिमात्र पाप संयुक्त हुनाले पशु (पश्यन्ति शुभाशुभकर्मफलानीति पशवो जीवाः आफूले जन्मजन्मान्तरमा गरेका नाना प्रकारका शुभ र अशुभ कर्मका फल भोग्ने मनुष्यादि सवै प्राणी पशु भनिञ्छन्) अत एव ती अशिव (शिवदेखि , कल्याणदेखि भिन्न) भनिञ्छन् । जुन लक्षणले ती पशु भनिये र ईश्वर (ती पशुहरूका ईश्वर) शिव (पशुपतिनाथ) सम्झियेका छन् । अथवा पशु (पश्यन्ति शुभाशुभं येन सर्वे तत् पशु ज्ञानं. वेदादि ज्ञान राशिः पशोः पतिः पशुपतिनाथः । अर्थात् पशु भनेको ज्ञान हो र पशुका पति पशुपतिनाथ हुन्) गाइ गोरु आदि चौपाया पशुका मात्र पति होइनन्, अपितु अज्ञानी, ज्ञानी र ज्ञानका पति शिवको नाम पशुपतिनाथ हो । शिवोपनिषद्को मुख्य रहस्य यै हो । अचेल जो पशुपतिको सोज्झै अर्कै अर्थ गर्छन्, त्यो होइन, यो हो ।

गुणा बुद्धिरहङ्कारस्तन्मात्राणीन्द्रियाणि च ॥
भूतानि च चतुर्व्विंशदिति पाशाः प्रकीर्त्तिताः ॥११॥
पञ्चविंशकमज्ञानं सहजं सर्व्वदेहिनां ॥
पाशजालस्य तन्मूलं प्रकृतेः कारणं यतः ॥१२॥

गुण (सत्वगुण १, रजोगुण २, तमोगुण ३) बुद्धि ४, अहङ्कार ५, मन ६, तन्मात्रा (शब्द ७, स्पर्श ८, रूप ९, रस १०, गन्ध ११) इन्द्रिय (५ कर्मेन्द्रिय) वाक् १२, पाणि १३, पाद १४, पायु १५, उपस्थ १६ तथा ५ ज्ञानेन्द्रिय श्रोत्र १७, नेत्र १८, नाक १९, जिब्रो २०, चर्म २१) भूत (५

महाभूत आकाश २२, वायु २३, तेज २४, जल २५ पृथ्वी २६ मन ज्ञानकर्मोभयात्मक छोडेर २४ ई चौवीसवटा पाशा अज्ञानी जीवका बन्धन (आत्मज्ञान न भयेका जीवरूपी पशुका गलामा लागेका पाशा जस्ता दामला भनियेका छन् र पच्चिसौं सवै प्राणिका साथै जन्मेका सहज अज्ञान त्यस पासाका जालको मूल प्रकृति (सवै भौतिकादि जगत्को कारण) ई पच्चीस तत्त्व हुन् ।

सत्यज्ञा न निबध्यन्ते पुरुषाः पाशबन्धनैः ॥
तदभावाद् विमुच्यन्ते ज्ञानिनः पाशपञ्जरात् ॥१३॥
षड्विंशकश्च पुरुषः पशुरज्ञः शिवागमे ॥
सप्तविंशतिमः प्रोक्तः शिवः सर्व्वजगत्पतिः ॥१४॥
यस्माच्छवः सुसम्पूज्यः सर्व्वज्ञः सर्व्वगः प्रभुः ॥
तस्मात् स पाशरहितः स विशुद्धः स्वभावतः ॥१५॥
पशुपाशपरः शान्तः परमज्ञानदेशकः (शिकः) ॥
शिवः शिवाय भूतानां तं विज्ञाय विमुच्यते ॥१६॥

सत्यज्ञ (सत्य स्वरूप शिवको ज्ञान भयेका ज्ञानी योगीहरु) र सवै ज्ञानीजनहरु ती पाशका बन्धनमा पर्दैनन् । पाशका अभावले ज्ञानी जन (नर नारीहरु) प्राकृतिक पाशाका पिँजरावाट मुक्त हुञ्छन् (जसरी पिँजराको ढोका खोल्दा सुगा उड्छ) । शिवोपनिषद् आदि शिवागममा अज्ञानी जीवलाई पशु भनियेको छ र त्यो छब्विसौं तत्त्व हो । सत्ताइसौं तत्त्व शिव (पशुपतिनाथ) सवै जगत्का पति (पालक पोषक) छन् । यसैले शिव सर्वत्र सवैका सर्वदा सर्वथा पूजनीय छन् । सर्वज्ञ छन्, सर्वव्यापक छन्, अन्तर्यामी छन् , कर्तुं, अकर्तुं अन्यथा कर्तुं समर्थ छन्, सवै काम (सृष्टि, स्थिति, प्रलय) गर्न सक्तछन् र बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः । प्रबलतमसे तत्संहारे हराय नमो नमः । जनसुखकृते सत्वोद्रिक्तौ मृडाय नमो नमः । प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः । भनिञ्छ (तस्मात् ती शिव प्रकृतिका ती पाशादेखि रहित छन् : विशुद्ध छन्, स्वभावतः (आदि देखि नै आफै आफ्ना अनादि सत्ता काल देखि नै स्वयं शुद्ध बुद्ध मुक्त छन्) पशुहरूका ती पाशा देखि प...र...छन्, कुनै प्रकारको क्षोभ न भएका शान्त छन्, परम ज्ञान (आत्माको योगज्ञान) दिने देशक वा देशिक (सद्गुरु) छन् कल्याणरूपी शिव सवै प्राणीका सिवाय (कल्याणका लागि) छन् । यस्ता शिव (पशुपतिनाथ) लाइ जसले जान्दछ, त्यो मुक्त हुञ्छ । शिवलाइ जानेर नै जीव मुक्त हुञ्छ (शिवमा मिल्छ) यस्मा संशय छैन ।

एतदेव परं ज्ञानं शिवमित्यक्षर द्वयं ॥
विचाराद् याति विस्तारं तैलबिन्दुरिवाम्भसि ॥ १७ ॥
सकृदुच्चरितं येन शिवमित्यक्षर द्वयं ॥
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ १८ ॥
द्व्यक्षरः शिवमन्त्रोऽयं शिवोपनिषदि स्मृतः ॥
एकाक्षरः पुनश्चायं ॐ इत्येव व्यवस्थितः ॥ १९ ॥

शिव ! भन्ने यै दुइ अक्षरको परम ज्ञान गडेर विचार गर्दा अनन्त विस्तारको हुन्छ, जस्तै तेलको थोपो पानीमा पर्दा साथ चारै तिर सर्र फैलिन्छ । यस्तो यो परम कल्याणकारी शिव ! यत्ति दुइ अक्षरको महामन्त्र जस्ले एक पटक मात्र पनि मुखवाट उच्चारण गऱ्यो, त्यस्ले शिवसायुज्य मोक्षलक्षमा जान कम्मर कस्यो भनि जान्नु पर्छ । शिवोपनिषद्मा यो शिव ! भन्ने दुइ अक्षरको शिव मन्त्र र यस्तै यो अर्को ॐ भन्ने एकाक्षर मन्त्र पनि शिवको वाचक व्यवस्थित छ । दुवै मिलायेर शिव ॐ अथवा ॐ शिव ! यस्तो गरे पनि हुन्छ ।

नामसङ्कीर्त्तनाद्देवि शिवस्याशेषपातकैः ॥
यतः प्रमुच्यते क्षिप्रं मन्त्रोऽयं व्यक्षरस्ततः ॥ २० ॥
यः शिवशिवमित्येवं व्यक्षरम्मन्त्रमभ्यसेत् ॥
एकाक्षरं वा सततं स याति परमम्पदं ॥ २१ ॥

शिवको नामकीर्तन गर्दा साथ क्षिप्र (शीघ्र) जन्म जन्मान्तरका अशेष पातकवाट भक्त मुक्त हुन्छ, त्यसैले यो शिव भन्ने दुइ अक्षरको मन्त्र शिवको मुख्य महामन्त्र मानियेको छ । जो भक्त (नरनारी) शिव ! शिव ! भन्ने दुइटा अक्षरका महामन्त्रको नित्य निरन्तर अभ्यास गर्छ अथवा ॐ भन्ने एकाक्षर मूल मन्त्रको अभ्यास गर्छ त्यो भक्त परम पद (शिव पद) प्राप्त गर्छ ।

मित्रःस्वजनबन्धूनां कुर्य्यान्नाम शिवात्मकं ॥
अपि तत्कीर्त्तनाद्याति पापमुक्तः शिवम्पुरं ॥ २२ ॥

त्यसैले छोरा छोरी, इष्टमित्र,स्वजन, बन्धु वर्गको नाम शिवात्मक (शिव शब्दलाइ आदिमा राखेर, जस्तै– शिवहरि, शिवराम, शिवनाथ, शिवदेव, शिवगोपाल, शिवदत्त, शिवराज, शिवप्रताप, शिवभक्त, शिवनारायण, शिवशर्मा, शिववर्मा, शिवगुप्त, शिवदास, शिवमाया, शिवप्रिया, शिवमाला, शिवंकला, शिवशोभा, शिवपूजा इत्यादि) राख्नु पर्छ र तिनको सम्बोधन गरेर डाक्ने वा प्रसङ्गवश वा कार्यवश उच्चारण गर्ने तथा पढने लेख्ने गरे पनि शिवको नाम आउने हुनाले समस्त पापवाट मुक्त भयेर शिवपुरमा जान्छ ।

विज्ञेयः स शिवः शान्तो नरस्तद्भावभावितः ॥
आस्ते सदा निरुद्विग्नः स देहान्ते विमुच्यते ॥ २३ ॥

शिवका भक्तिभावनाले भावित तन्मय (शिवमय) भक्त अतिशान्त हुन्छ र शिव जस्तै आनन्दमय हुन्छ. ब्रह्मविद् ब्रह्मैव भवति भने झैं शिवभक्त पनि शिव नै हुन्छ र सदा निरुद्विग्न निस्तरङ्ग प्रशान्त स्वच्छ राति द्वितीय प्रहरदेखि दिनका द्वितीय प्रहरपर्यन्तका मानसरोवर जस्तो सदा निर्मल र नितान्त शान्त रहन्छ ; देहान्तमा त्यो भक्त मुक्त भएर शिवमा मिल्छ शिवसायुज्य मोक्ष पाउँछ ।

हृद्यन्तःकरणं ज्ञेयं शिवस्यायतनम्परं ॥
हृत्पद्मं वेदिका तत्र लिङ्गमोङ्कारमिष्यते ॥ २४ ॥

पुरुषः स्थापको ज्ञेयः सत्यं सम्माज्र्जनं स्मृतं ॥
अहिंसा गोमयम्प्रोक्तं क्षान्तिश्च सलिलम्परं ॥ २५ ॥
कुर्यात् सम्माज्र्जनम्प्राज्ञो वैराग्यं चन्दनं स्मृतं ॥
पूजयेद् ध्यानयोगेन सन्तोषकुसुमैः सितैः ॥ २६ ॥
धूपश्च गुग्गुलुर्द्देयः प्राणायामसमुद्भवः ॥
प्रत्याहारश्च नैवेद्यमस्तेयञ्च प्रदक्षिणा ॥ २७ ॥
इति दिव्योपहारैश्च सम्पूज्य परमं शिवं ॥
जपेद् ध्यायेच्च मुक्त्यर्थं सर्व्वसङ्गविवर्ज्जितः ॥ २८ ॥

शिवको आध्यात्मिक आराधना यस प्रकार गर्नुपर्छ :- मन, बुद्धि, अहङ्कार, चित्त र चैतन्यको अन्तःकरण हृदय नै पवित्र शिवको आयतन (शिवालय शिवमन्दिर) छ । शिवायतनमा हृदय कमलको वेदिका (जलहरी) छ । वेदिकामा ॐकार नादको शिवलिङ्ग छ । पुरिततमा वास गर्ने पुरुष (नर नारी सवैको जीवात्मा) स्थापक (शिवको स्थापना गर्ने कर्त्ता यजमान) छ । सत्यको सम्मार्जन (कुचो लायेको स्वच्छता) अहिंसाको पवित्र गोवर छ । परम क्षमा नै निर्मल हिमजल छ । जीवका तीन अवस्था विश्व १ तैजस २ प्राज्ञ ३ मध्ये ऋतम्भराप्रज्ञा भयेको प्राज्ञ नै कुचो लाउने र गाइका हरिया गोवरले लिप्ने शिवसेवक पूजक छ । संसारी विषयवाट वैराग्यनै श्रीखण्ड अगर आदिको चन्दन छ । सन्तोषका सेता पुष्पहरुले ध्यान योगद्वारा पूजा गर्नु पर्छ । प्राणायामको गोकूलधूप भावनामय गोघृतमा मिसायेर नासिकाधुपौरामा सल्काउनु पर्छ । प्रत्याहारको नैवेद्य लाउनु पर्छ र अस्तेय (कुनै प्रकारको चोरी न गर्ने भावना) को प्रद्क्षिणा गर्नु पर्छ । ईश्वर प्रणिधानको प्रणाम गर्नु पर्छ । यस्ता दिव्य आध्यात्मिक उपहार (उपचार) द्वारा भक्तिभावनाले परम शिवको विधिवत् पूजा गरेर संसारका समस्त सङ्गदेखि वर्जित विरक्त भयेर मुक्तिका निम्ति माथिका १ अक्षरी २ अक्षरी वा ५ अक्षरी वा ६ अक्षरी शिवमन्त्र (ॐ,शिव, नमः शिवाय ॐ नमः शिवाय) आदि मन्त्रको जप गरोस् एवं ध्यान गरोस् । यो यौगिक पूजा हो । यो अध्यात्मवादीहरूको उपासना हो । अर्थसाध्य बाहिरिया भौतिक साधन भन्दा शुद्धतम आध्यात्मिक साधन पवित्र आराधना हो । यो सवैले गर्नु राम्रो छ ।

ज्ञानयोगविनिर्म्मुक्तः कर्म्मयोगसमावृतः ॥
वृतः शिवपुरङ्गच्छेत् स तेन शिवकर्म्मणा ॥ २९ ॥
तत्र भुक्त्वा महाभोगान् प्रलये सर्व्वदेहिनां ॥
शिवधर्म्मे शिवज्ञानं प्राप्य मुक्तिमवाप्नुयात् ॥ ३० ॥

ज्ञानयोग देखि विमुक्त छ र कर्मयोगले युक्त छ भने त्यो शिवभक्त तेसै पवित्र शिवकर्म (शिवका उपासना कर्म)ले वरण गरियेर शिवपुरमा जान्छ र शिवलोकमा त्याहाँका महासुखभोग भोगेर सवै प्राणीहरुका प्रलय कालमा शिवधर्म तथा शिवज्ञान प्राप्त गरेर मुक्ति पाउँछ ।

ज्ञानयोगेन मुच्यन्ते देहपातादनन्तरं ॥
भोगान् भुक्त्वा च मुच्यन्ते प्रलये कर्म्मयोगिनः ॥३१॥

तस्माज्ज्ञानविदो योगात् ये चाज्ञाः कर्म्मयोगिनः ॥
सर्व्व एव विमुच्यन्ते ये नराः शिवमाश्रिताः ॥ ३२ ॥

ज्ञानयोगले ज्ञानयोगीहरू देहपात पछि मुक्त हुन्छन् र कर्मयोगीहरू शिवलोकका सुख भोग भोगेर प्रलयमा मुक्त हुन्छन् । तेसैले ज्ञानविद् ज्ञानयोगीहरू र कर्मविद् कर्मयोगीहरू सवै मुक्त हुन्छन् जो मानवमात्र शिवको आश्रय लिन्छन् ती सवै मुक्त हुन्छन् यस्मा संशय छैन ।

स भोगः शिव विद्यार्थं येषां कर्म्मास्ति निर्म्मलं ॥
ते भोगान् प्राप्य मुच्यन्ते प्रलये शिवविद्यया ॥ ३३ ॥

जसको निर्मल कर्म छ, त्यो सुख भोग शिवविद्या प्राप्तिका लागि हुन्छ र ती भक्तहरू शिवपुरका दिव्य सुख भोगेर प्रलयमा शिवविद्याले गर्दा मुक्त हुन्छन् ।

विद्या सत्कीर्त्तनीयं हि येषां किञ्चिन्न विद्यते ॥
ते चावृत्य विमुच्यन्ते यावत् कर्म्म न तद्भवेत् ॥ ३४ ॥

विद्या (शिवविद्या) र उल्लेखनीय सत्कीर्तनीय कुनै कर्म जस्का छैनन्, ती शिवभक्त पनि एक पटक पुनश्च भूलोकमा आयेर शिवकर्म, शिवविद्या र शिवज्ञान पायेर मुक्त हुन्छन् जव सम्म त्यो कर्म हुदैन, तव सम्म मुक्ति हुँदैन ।

शिवज्ञानविदन्तस्मात् पूजयेद् विभवैर्ग्गुरुं ॥
विद्याऽऽदानञ्च कुर्व्वीत भोगमोक्षजिगीषया ॥ ३५॥

तस्मात् कारणात् शिवज्ञान भयेका शिवज्ञानी गुरुको विभव अनुसार सेवा गर्नु पर्छ र गुरुवाट शिवविद्या (शिवज्ञान) लिनु पर्छ । शिवविद्याले शिवलोकका दिव्य सुख पाइन्छन् र अन्तमा मोक्ष प्राप्त हुन्छ ।

शिवयोगी शिवज्ञानी शिवजापी तपोऽधिकः ॥
क्रमशः कर्म्मयोगी च पञ्चैते मुक्तिभाजनं ॥३६॥

क्रमै सँग यि पाँच जना मुक्तिका पात्र हुन् :- शिवयोगी १ शिवज्ञानी, २ शिवजापी ३ शिवतपस्वी ४ शिवकर्मयोगी ५ । अर्थात् - शिवका भक्तहरू सवै मुक्त हुन्छन् । प्रथम शिवयोगी, अनि शिवज्ञानी, अनि शिवजापी, अनि शिवतपस्वी, अनि शिवकर्मयोगी । यो क्रम छ ।

कर्म्मयोगस्य यन्मूलन्तद् वक्ष्यामि समासतः ॥
लिङ्गमायतनञ्चेति तत्र कर्म्म प्रवर्त्तते ॥ ३७ ॥

इति शिवधर्म्मे शिवोपनिषदि मुक्तिनिर्द्देशाय प्रथमोऽध्यायः ॥ १ ॥

अव अगाडि संक्षेपमा जुन कर्मयोगको मूल छ, त्यो म (महाकाल) भन्ने छु । त्यसमा शिवलिङ्ग स्थापना गर्ने शिवायतन (शिवालय बनाउने आदि कर्म प्रमुख छन् ।

यति यो शिव धर्मसा, शिवोपनिषद्मा मुक्तिको निर्देश भयेको प्रथम अध्याय सिद्धियो

(नरहरि कृतानुवादे मुक्तिनिदेशः प्रथमोऽध्यायः)

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवोपनिषदि

द्वितीयोऽध्याय:

ॐ नम: शिवाय

अथ पूर्व्वस्थिते लिङ्गे गर्ब्भस्तत्त्रिगुणो भवेत् ॥
गर्ब्भाच्चापि विभागेन स्थाप्यं लिङ्गं शिवालये ॥ ३८ ॥
यावल्लिङ्गस्य दैर्घ्यं स्यात्तावद् वेद्याश्च विस्तर: ॥
लिङ्गात् तृतीयभागेन भवेद् वेद्या: समुच्छ्रय: ॥ ३९ ॥
भागमेकं न्यसेद् भूमौ द्वितीयं वेदिमध्यत: ॥
तृतीयभागे पूजा स्यादिति लिङ्गं त्रिधा स्थितं ॥ ४० ॥
भूमिस्थं चतुरस्रं स्यादष्टास्रं वेदिमध्यत: ॥
पूजार्थं वर्त्तुलं कार्य्यं दैर्घ्यात् त्रिगुणविस्तरं ॥ ४१ ॥

ॐकारद्वारा प्रतिपाद्य कल्याणकारी कल्याणमय शिवलाइ नमस्कार छ । अव आफ्ना निवासस्थानदेखि पूर्व दिशामा शिवलिङ्ग स्थित (स्थापित, प्रतिष्ठित) गर्नु छ भने शिवालयमा गर्भ शिवलिङ्ग भन्दा तीन गुणा उच्च हुनु पर्छ । गर्भगृहका विभागले शिवलिङ्ग स्थापित गर्नु पर्छ । जति लामु शिवलिङ्ग हुन्छ तेत्ति विस्तारको वेदिका (जलहरी) हुनु पर्छ । शिवलिङ्गका उचाइ भन्दा त्रिखण्डी होचाइ भयेको वेदिका हुनु पर्छ । शिवलिङ्गको एक भाग भैँमा गाड्नु पर्छ । दोस्रो भाग वेदी (जलहरी) मा उन्नु पर्छ । तेस्रा भागमा माथि पूजा हुनुपर्छ, यति यो शिवलिङ्ग तीन भागमा विभक्त गर्नु पर्छ ।। भूमिभित्र गाडियेको शिवलिङ्गको एक भाग चारपाटे गर्नु पर्छ, वेदीमा उनेको भाग आठपाटे गर्नुपर्छ, जलहरीमाथिको एक भाग पूजा गर्न वाटुलो (गोल, बाँस जस्तो) गर्नुपर्छ, लमाइ भन्दा तीन गुणा विस्तार (मोटाइ) गर्नु पर्छ । अर्थात् शिवलिङ्ग जति लामु (तीनै भागमा) छ तेसका एक खण्डमा जति लमाइ छ तेत्ति मोटाइ माथि राखनु पर्छ । सानु ठूलो जस्तो जत्रो भये पनि यसै अनुपातमा शिवलिङ्ग र जलहरीको निर्माण गरी स्थापना गर्नु पर्छ । यो शिवलिङ्ग स्थापना गर्ने विधि हो ।

अधो भागे स्थित: स्कन्द: स्थिता देवी च मध्यत: ॥
ऊर्ध्वं रुद्र: क्रमाद्वापि ब्रह्मविष्णुमहेश्वरा: ॥४२॥

भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥
इत्थमाह जनस्तावदपश्यन् यमकिङ्करान् ॥३८॥
यदा पश्यति तान् काले मुखं व्यादाय रोदिति ॥
यस्तु मोहाद् विषं पीत्वा नावगच्छति मूढधी : ॥३९॥

स तस्य परिणामेन जानीते कर्म्मणः फलं ॥४०॥
कश्चिद्यदश्रेयसि चित्तवृत्तिमल्पामपि प्रेरयति प्रयत्नात् ॥
मद्यं पुरोडााशकृतोपदेशं पिबन्ति वै नाशकरं विशङ्काः ॥४१॥
बाल्ये बाल इतीह तेन कुशलाद्वृत्तमाचष्टते ।
तारुण्येतियुवेति दग्धहृदयः श्रोणीतटं सेवते ॥
आरूढेऽपि च यस्य जङ्गम इति स्याद् घस्मरं केवलं
कष्टं श्रेयसि बुद्धिरेव न भवेदेवं सदा देहिनां ॥४२॥
क्षिप्यते यूनि वृद्धेन यूनापि जरयाहतः ॥
धर्म्मः कन्दुकवद्याति क्षिप्यमाण इतस्ततः ॥४३॥
कश्चिद्युवा निधनमेत्यपरश्च बाल्ये कश्चिज्जराशिथिलचर्म्मकरङ्क शेषः ॥
गर्भाच्चकश्चिदपि पाटलमांसखण्ड इत्थंगतेषु किमुपेक्षत ईशसेव ॥४४॥
ताप्यन्तम्भवजैस्तिनार पिवति क्लेशैरमाहेश्वरं ॥
यः सोऽवश्यमुपैत्यिनर्थपदवीं धीरः कृयाम्रेडिताः ॥
हस्तेनोग्रतरङ्गतीव्ररया नद्योह्यमानं बलात्
क्रोशं विश्वरमच्छभल्लमवशं व्याकृष्टुमिच्छन्निव ॥४५॥
भवाम्भोमूढचेतस्का भजन्ते कोटिमापदां ॥
वडिशोत्कर्षिता मत्स्या महागाधे ह्रदे यथा ॥४६॥
प्रदोषजं दुःखमवाप्य देहिनः कृतान्तमेकं तमसा विचेष्टिताः ॥
शनैः प्रतीक्षन्त उदाररागिणो रथाङ्गनामान इवांशुमालिनं ॥४७॥

इति शिवधर्म्मसङ्ग्रहे द्वितीयोऽध्यायः ॥२॥

मातापितृसुहृज्जायापत्याभरणदुर्भिदे ॥
जनः शुक इवाक्षिप्तः संसारगृहपञ्जरे ॥४८॥
बहुभिस्तनुजैग्गारैरावेष्टः स्नेहतन्तुभिः ॥
कोषकीट इवात्मानं नयत्यापदमात्मना ॥४९॥
मातापितृमयो बाल्ये यौवने दयितामयः ॥
पुत्रपौत्रमयः शेषे मूढो नात्ममयः क्वचित् ॥५०॥
युवत्वेऽपेक्षते बालो वृद्धत्वेऽपेक्षते युवा ॥
मृत्योरुत्सङ्गमारूढः स्थविरः किमपेक्षते ॥५१॥
तामसचेतसि पुंस्युपदेशो गच्छति काण्ड इवाश्मनि मुक्तः ॥
केवलमेव मुखश्रमभागी धर्म्मकथावचसामुपदेष्टा ॥५२॥
अघगणवनदावं पावनं श (ध) र्म्मसार्ग्गं
गिरिशगदितशास्त्रं यात्यनर्थस्यकोटिं ॥
श्रवणपथमुपेत्य भ्रष्टचित्तस्य जन्तो ॥
हरिरिदि(दि)वासमुपेतं शोधनं वक्त्ररन्ध्रं ॥५३॥
भवोदभवभयभङ्क्तुरीशस्य परमात्मनः ॥
प्रपन्नशरणं शान्तं मूर्खोमूर्खनवदीक्षते ॥५४॥
धर्म्मशीलगुणोपेतं पापमित्यवगच्छति ॥
आत्मशीलप्रमाणेन पापः सर्व्वत्रशङ्कितः ॥५५॥
महानप्यल्पतां याति निर्गुणे गुणविस्तरः ॥
आधाराधेयभावेन गजेन्द्र इव दर्प्पणे ॥५६॥
कस्यचित्कुलटापत्यमिति चालिङ्ग्यते मुखे ॥
तथापि ज्ञायते सदिम्राक्रोशात्परमात्मनां ॥५७॥
किमु मूढं मनः कृत्वा मन्यते सुखमासितुं ॥
व्यधयाति भवन्त्येव परेतमिव वायसा ः ॥५८॥
अशेषकुशलोद्योगा रोगालीढस्य देहिनः ॥
निर्व्विकारा निवर्त्तन्ते सग्रहेन्दोः करा इव ॥५९॥
द्विपञ्चाशन्महाघोरैर्म्मृताः संसर्गसम्भवैः ॥

चतुर्भिर्म्मांससम्भूतैरष्टभिर्व्वाभिघातजै : ॥६०॥
पञ्चाशदनिलचजलजै रक्तविकारैश्च दशभिरुद्धततरैः ॥
कफजैश्च पञ्चनवकैरष्टत्रिशद्भिरद्यते पित्तसम्भवैः ॥६१॥
शस्त्रक्षारानलासह्या निरयव्यसनोपमाः ॥
गमयन्त्यातुरान् कृच्छ्रं चिकित्सोपक्रमक्रियाः ॥६२॥
लावण्येन मनोहरेण वपुषा योऽधश्चकार स्मरं ।
कस्तस्यापदि नीयमानमवशं तीव्रव्यथैर्व्याधिभिः ॥
किञ्चिच्छ्वासपवित्रमस्थिनिवहं दृद्व तमेव क्षणात् ॥
चेतः प्रीतिपरिग्रहं वितनुते कस्यात्र सच्चेतसः ॥६३॥
इत्थं बहुविधै रोगै पीड्यमानस्य देहिनः ॥
गलत्यायुरधीरेण द्रुतं व्यसनमाव्रजेत् ॥६४॥
क्षुधार्त्तितृष्णाप्रसलोय आसीत् त्यागेन कार्प्पण्यकलङ्कबुद्धेः ॥
सोऽपि स्वधैर्य्यपरिहार्य्य कान्तङ्ग्रासं परान् मार्गयतीवभूतः ॥६५॥
गृहेऽपि यस्यापिं नरैर्न्निरुद्धे न दृक्पथं गच्छति कुट्टिमेऽपि ॥
क्षणेन तत्रैव विलोक्यमाने गृहोदरे कुट्टिममेव शेषं ॥६६॥
नक्षत्रवृन्दैरिव शीतरश्मिः समावृतो भृत्यगणैः पुरा यः ॥
छायाद्वितीयो भ्रमते क्षतश्रीः प्राप्तान्यजन्मान्तरवत्स एव ॥६७॥
मत्तद्विरेफावलिनीलगण्डमातङ्गपृष्ठेन पुरागमद्यः ॥
संसारवैषम्यवशात्स एव पादेन गोरक्ष इव प्रयाति ॥६८॥
शय्याभुजङ्गाधिपभोगशल्यां पुरा प्रियाभिः सहयोऽध्यशेते ॥
महीतले रूक्षपरागगौरैः सोऽपि स्वपित्यात्मकरोपधानः ॥६९॥
कश्चिद्भृत्यैरूपेतोव्रजति मणिशिलालोकिना स्यन्दनेन
व्याधिग्रस्तोऽपि कश्चित्पुनरपि मुदितः कश्चिदुद्दामशोकः ॥
काश्चित्कान्तावियोगाद्विधुरितहृदयो निश्वन्दीर्धमुष्णं ॥
कश्चित्क्षुत्क्षामकुक्षिर्न्निविंडयति भुजो मृत्यवेनीयतेभ्यः ॥७०॥
सम्पत्तडिदिवानित्या विपत्तिरविनश्वरी ॥
यद्यदिष्टहितन्नष्टमनिष्टं सुरभायते ॥७१॥
उद्यन्त्युपद्रवा घोरा दुर्भिक्षमारिकादयः ॥
बहून्युत्पातलिङ्गानि देहनाशकराणि तु ॥७२॥
प्रयान्ति दिवसा रम्या उपसर्प्पन्ति दारुणाः ॥
अन्यायकारिणो लोकाः पृथ्वी च गतयौवना ॥७३॥
शश्वद् व्यवस्था हीयन्ते स्वप्नवद् दृष्यते जगत् ॥

सृहृन्मित्राणि नश्यन्ति सम्प्रयोगो दुरात्मभिः ॥७४॥
येन संवर्द्धितः पित्रा बाल्यप्रभृति मानवः ॥
वीक्ष्यते बाष्परुद्धाक्षस्तिरोभावेन जीवितं ॥७५॥
यया चाब्दं धृतः कुक्षौ पीतौ यस्याः पयोधरौ ॥
कालव्याघ्रमुखं यान्तीन्ताम्मृगीमिव पश्यति ॥७६॥
ययास्यास्ताद्रिवत्पूर्व्वं मध्ये नीचांशुकं स्थितं ॥
अन्तरीक्रियते कालाल्लोके यापितयौवनः ॥७७॥
विना येन सुतेनासीन्निमेषो यस्य कल्पवत् ॥
स्वप्नद्रष्टव्यतां याति सोऽपि कालवशङ्गतः ॥७८॥
न श्वो दृश्येताद्य दृष्टोजनोऽपि यः श्वो दृश्येन्नापरे दृश्यते सः ॥
इत्थं याते यो जगत्यत्र भावं कुर्य्यात्तस्माच्चित्रमन्यत्र जाते ॥७९॥
हा मातस्तात ! हा पुत्र ! हा प्रिये ! हा सृहृज्जनाः ! ॥
मामेकाकिनमुत्सृज्य तद्वहिः क्व नु गम्यते ? ॥८०॥
भवद्वित्र्योगदावाग्निज्वालालीढशरीरकः ॥
अहमप्यनुगच्छामि प्रतिपालयत क्षणं ॥८१॥
विना भवद्भिरद्यैव वियोगतमसावृतं ॥
आत्मानमवगच्छामि अन्धकूपनिमग्नवत् ॥८२॥
ईदृग्व्यसनवज्रेण हतस्य निरपेक्षया ॥
हेशूलहृदय ! ब्रुहि कथं कस्यापि नास्ति तें ॥८३॥
संस्मृत्य यानि गदितान्नि पुरा भवद्भिः सौधाक्षराणि लिखितानि च वीक्ष्य भित्तौ ॥
निर्द्दह्यमानहृदयं मम यातितूर्णं छात्कृत्य शुष्कसिकतासु यथाल्पतोयं ॥८४॥
बाष्पाम्भः शिथिलायतेक्षण्मुखीमत्रैव मा गा इति
प्रस्थानाभिमुखेमयि स्खलितया वाचा वदन्तीह मे ॥
संस्मृत्यैव सहस्रधा स्फूटति नो विश्रब्धमालम्बते
कष्टं वज्रकदम्बकेन घटितं धात्रा ममेदं मनः ॥८५॥
हाहेति करुणं क्रन्दन् पक्षां (त्नीं) विधुरवन्हिना ॥
स्फीतस्नेहरसैः सिक्तमन्तकेनाद्य ते जगत् ॥८६॥
शोकपङ्कनिमग्नोऽयमिति नापेक्षते जनः ॥
पद्मस्तुहिनवृष्ट्येव जरया नीयते दशां ॥८७॥
भ्रमद्भृङ्गावलीबृन्दकानि यच्चिकुराः पुरा ॥
शिरस्तदेव कालेन धत्तेऽलाबुफलश्रियं ॥८८॥
यदुत्पलचलच्चारूलोचनं श्रवणायतं ॥
पश्चादाश्यामतिमिरै रुध्यते पटलैरपि ॥८९॥

मयूखजालनिकरैर्य्यैर्ज्जिताः शशिरश्मयः ॥
त एव दशना कालाच्च्यूतशेषा रुजन्ति च ॥९०॥
कामिनीबाहुलतया यः कण्ठः पारिलोलितः ॥
स एव वलिजालेन तन्यते जलदुःक्षवत् ॥९१॥
महीभृत्पीवरं रम्यं मृगाक्ष्यास्तनलालितं ॥
कालेनासुगणोऽस्थित्वं शिथिल (त्व) त्कमेव च ॥९२ ॥
करङ्कपञ्जरावस्थं तिलकोपहतच्छवि ॥
वक्षोभूकिरिटस्तुल्यं जायते जरया हते ॥९३॥
परिणाहिवृत्तसुश्लिष्टौ हेमस्तम्भानुकारिणौ ॥
मृदितोत्पलनालाभावूरू स्यातां जरार्द्दिते ॥९४॥
रक्तारविन्दसदृशौ चरणौ कान्तिमत्तमौ ॥
भवतः स्फूटितौ काला स्नायुजालतानोलणौ ॥९५॥
कथञ्चिद्यष्टिमालम्ब्य यद्युद्यातुं समीहते ॥
वीक्ष्यते किन्तु पत्तानं पटलाक्रान्तलोचनः ॥९६॥
नक्तं संकुचिताम्बुजानि सवितुर्ल्लक्ष्मीं भजन्ते पुन ॥
र्म्मार्त्तण्डः शुचिलीनरश्मिरुदयोदभूयोऽपि यश्चन्द्रमाः ॥९७॥
प्रत्यानीयत एव मज्जयति तं हालाहलं विद्यया
कष्टं यौवनमेकमेति न पुनः पुंसां प्रयत्नादपि ॥९८॥
क्षतिधरसदृशान् विजत्य मल्लानरशिरस्सु निहत्य शत्रुपक्षान् ॥
अहिमकर इवोजसा य आसीत् जरसि खिलीक्रियते स एव काले ॥९९॥
ततः पुत्रकलत्रैश्च शश्वत्स परिभूयते ॥
कासश्वासार्द्दितो दुःखी तारुण्यं ललितं स्मरेत् ॥३००॥
एवञ्जीवन्तथापीतं मित्रैः कान्ताभिरेव च ॥
इत्येवं तप्यते तस्य मनो वार्द्धक्यपीडितं ॥१॥
सेवमानोऽपि भैषज्यं प्रवया निलयोरुजां ॥
द्वेष्टा शशिकलामौलेस्तपस्वीव भवापदां ॥२॥
बहुरोगघनान् घोरानविसह्य शरीरकान् ॥
जिघांसून् किङ्किरान् वीक्ष्य सस्वेदं वेपते भृशं ॥३॥
हस्तपादौ भयाद्दिक्षु क्षिपत्येणति मानवः ॥
विष्णुज्वरेण चाक्रान्तः प्राणम्मुञ्चति दुःखितः ॥४॥
तस्मिन् कुतः पिता माता कुतः पुत्रः कुतः प्रिया ॥
धर्म्म एको भवेद्बन्धुरधर्म्मश्च रिपुः स्वयं ॥५॥
एवं मतिमता ज्ञात्वा यत् क्षेमन्तदुपास्यतां ॥

मरणं प्रकृतिः पुंसां विकृतिर्ज्जीवितं स्मृतं ॥६॥
ज्ञात्वैवं तरसा कर्त्तुं युज्यते हितमात्मने ॥
तिर्य्यग्भावादतिक्रम्य यावन्मृत्युश्च नाप्यते ॥७॥
अत्रान्तराले यद्युक्तं सद्भिस्तत् क्रियतां द्रुतं ॥८॥
लोकाः कालं क्षमते न च खलहृदयः प्रजामिमां कालः ॥
एवं मत्वा नार्हत धर्म्मणि शिथिलादरं कर्त्तुम् ॥९॥
रम्या स्थली तृणवती कुसुमावतंसा रम्या नवा प्रणयिनी स्मरकोपबाष्पा ॥
रम्यं समागमसुखं विदुषामतीव रम्याणि तानि यदि न क्षणभङ्गुराणि ॥१०॥
मृत्युञ्जयजाप्यपरः सम्यग्यो वा मृत्योः परमं मित्रं ॥
श्वो मे भवितेति वचस्तेषां युक्तं गदितुं कथमन्येषां ॥११॥
छमच्छमायमानोग्रन्विताधूमाग्रधूसरे ॥
अस्थिमांसवसारुद्धे कपालशकलाकुले ॥१२॥
गृध्रध्वांक्षादिभिः कीर्णे भीषणे विस्रगन्धिभिः ॥
जम्बुचीत्कारगम्भीरै प्रेतवेतालसङ्कुले ॥१३॥
श्मशाने तं विसृज्याशु स्वगृहं यान्ति बान्धवाः ॥
अथात्र केचित् खगखवण्डितेक्षणाः करङ्कशेषा अपि शेरते शवाः ॥
विकीर्णकेशाः क्षितिरेणुधूसराः प्रभग्नजङ्घाः क्षतकुक्षयोऽपरे ॥१५॥
ये वासिता विक पुष्पकदम्बकेन भ्राम्यद्द्विरेफचयमेचककान्तिशोभाः ॥
तेऽपि प्रयान्ति वलिवातविधूयमानाः केशाः परेतवनपादपचामरत्वं ॥१६॥
यस्याः पुरा कनकतोरणमन्दिरेषु वेत्राग्रपाणिभिरलम्परिवारितेषु ॥
नो पक्षिणोऽपि निपतन्ति कुतोऽन्यपुंसस्तस्या मुखे विशति कालवशात्खगाङ्ग्रिः ॥१७॥
प्रालेयांशुकरोपहारविमले हर्म्योदरे सुन्दरी ॥
वीणापाणिसरोरुहेन (ण) मृदुना या वादयन्ती पुरा ॥
तस्या एव विभिन्नकुक्षिकुहराद्दीर्घान्त्रतन्त्री स्रज़ां
पादाग्रेण विकृष्य गृध्रकरटा धिग्वादयन्त्याननैः ॥१८॥
हर्म्ये विद्रुमकान्तिकुट्टिमभुवि प्रेष्याजनैः सादरै :
प्रोध्दूता शरदिन्दुधामधवलैर्य्या चामरैः श्रीरिव ॥
कालात्सैव सुमध्यमा क्षितिरजोरूक्षा क्षताङ्गी पुन ॥
गर्गुञ्जज्जन्तुकुलैरधीरचरितैः पुच्छेन संवीज्यते ॥१९॥
सरससरोजचारुरुचिरेण कृतादपिता जनेन पत्रनवकुङ्कुमपत्रलताः ॥
कुचकलशन्तमेव तपनीयरुचं श्वशिवारिपुमिव खण्डयन्त्यकरुणविकरालमुखाः ॥२०॥
मरुद्धतोत्पलदलचारुलोचनं मनोहरं भजनहृदयेन ताडयेत् ॥

सकृत्प्रजा इदमपि खण्डयन्त्यहो धिगस्तु भो पुनरपिधिङ्मनुष्यतां ॥२१॥
पत्रैरम्बुरुहां स चेन्दुसरसैः संवीज्यमानोऽपि यो
वक्त्रेन्दुस्मरणात्कुरङ्गकदृशो दाहंवहत्युन्मनाः ॥
कष्टं कालवशात्स एव हि युवा बाष्पाम्बुरुद्धेक्षणै ॥
ज्ज्वालाजालकलापकेशरसटामारोप्यते तैश्चितां ॥२२॥
अयम्पञ्चत्वमापन्नो ममाप्येवं न संशयः ॥
भविष्यतीति या चिन्ता सा दूरादपि शीर्य्यते ॥२३॥
जात्यादिभिर्व्यसनसन्ततिभिः परीतं ॥
संसारसागरगभीरतरं विविक्षुः ॥
उग्राशुषुक्षणिकदम्बकगाढरुद्धं
सोऽयं क्षयं क्षतमतिर्व्विविशत्यशङ्कं ॥२४॥

इति शिवधर्म्मसङ्ग्रहे तृतीयोऽध्याय : ॥३॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मसङ्ग्रहे

चतुर्थोऽध्यायः

ॐ नमः शिवाय

॥उमोवाच॥

यदा शरीरमुत्सृज्य मृत्युलोकात् प्रपद्यते ॥
कर्म्मणा केन दुःखानि लभते नरकेवथ ॥२५॥
कीदृशा नरकास्तत्र येषु पापं क्षयं व्रजेत् ॥
किं केषु नरका ह्येते बहवो येषु पापिनः ॥२६॥
पृथकर्म्मविपाकानां प्राप्नुवन्ति पृथक् फलं ॥
एतदिच्छामि विज्ञातुं भगवन् ! वक्तुमर्हसि ॥२७॥

॥ भगवानुवाच ॥

पश्यत्वन्धमुखानि बाष्पकलुषाण्यकर्णयन्त्तं रुतं
त्यक्त्वा तांश्च तनुञ्च गच्छति नरः कर्म्मानुबन्धैरितः ॥
गच्छन्दारुणपाशपीडितगलः प्राप्नोति कष्टां दशां
प्राप्नोति व्यसनान्यजस्रमवशः प्रभ्रष्टसर्व्वाश्रयः ॥२८॥
योजनानां सहस्राणि षडशीतिं महामते ॥
अन्तरन्तद्विजानीयान्नृलोकयमलोकयोः ॥२९॥
उदितादित्यवर्णेन ज्वलितायसवर्त्मना ॥
वज्रकण्टककीर्णेन यान्ति वैवस्वतालयं ॥३०॥
भुवस्तप्तायसादीप्तमार्ग्गङ्गतमहाविषाः ॥
दिवश्चण्डार्क्कवपुषा पुटपाकीव तद्व्रजेत् ॥३१॥
पश्यत्यत्र तनु व्रजन् कमलिनीन्तामेति धावंस्तृषा
यातन्तं परिकृष्य कालपुरुषाः पाशेन कण्ठे भृशं ॥
निर्भिद्योरसि तस्य कुन्तपुरुषैर्हाहारवन्तम्भयैः ॥
किन्नि ह्रांङ्कतया कृता कमलिनीयामेऽपि धावंस्तृषा ॥३२॥
भूयो दूरमुपेत्य पश्यति तरुं तं याति घंर्म्मार्द्दितः
पातुन्ते ब्रुवते विकृष्य पुरुषं घ्नन्तेऽसिभिस्त्तं रुषा ॥
किं त्वं पुत्रकृतंस्तरुहतमत्ते ये तैषितं घर्मितः
पापात्प्राप्स्यसि शाल्मलीं तरुवनं किं यासि तां सत्वरं ॥३३॥
अपि रविशशितारकाविहीनं भवति नभस्तलमेति नाशमूर्व्वी ॥
न तु विहितमते तवास्ति मोक्षो निरयशताद् द्विषतः शशाङ्कमौलिं ॥३४॥

विनाशं यान्ति कालेन पातकानि महान्त्यपि ॥
न विनश्यन्ति पापानि हरब्रह्माच्युतद्विषां ॥३५॥
इत्थमाक्रोश्यमानाश्च हन्यमानाश्च किङ्करैः ॥
गच्छन्ति केचिद् दुःखार्त्ता मुञ्चन्ति भैरवस्वरं ॥३६॥
केचिल्लब्धसुखा यान्ति विमानैः सह दैवतैः ॥
सेव्यमानाः पुरस्त्रीभिर्न्नित्यं धर्म्मरता जनाः ॥३७॥
येऽर्च्चन्ति शर्व्वमुमया विधिवत् प्रशान्ता
ये चोत्सृजन्ति वृषभन्तिलधेनुदाश्च ॥
ये स्थापयन्ति च हरं कपिलाप्रदाश्च
ते यान्ति चन्द्रसदृशैर्व्वरयानमुख्यैः ॥३८॥
केचिद्यान्तः किङ्करैस्ताड्यमाना गृध्रैः कङ्कैर्व्वायसैर्ल्लुप्यमानाः ॥
तर्षक्षमाः क्षीणमांसास्थिदेहावह्निज्वालासन्ततैर्द्दह्यमानाः ॥३९॥
विषमेषु च गर्त्तेषु पतच्छूलैर्व्विभिद्यते ॥
क्वचिच्चोपलवर्षेण महातासन्निकीर्य्यते ॥४०॥
तत्र भिन्नशिरोजानुः पाटत्वादूरबन्धनः ॥
कृष्यते यमदूतैश्च पुनः कण्टकिभिर्द्रुमैः ॥४१॥
यात्यते भिद्यते रोषा द्वलीभिरपि कृष्यते ॥
एवं वहुविधाकारैर्दुःखदैर्य्यमकिंकरैः ॥४२॥
नीयमानो वशं क्लेशैः प्राप्नोति यमसादनं ॥
स ततोयममाप्राप्य दूरादेव यमाज्ञया ॥४३॥
चित्रगुप्तमुपाम्य श्राव्यते कर्म्म यत्कृतं ॥
सोमाग्निर्व्वरुणो वायुः सूर्य्यश्चेति तद नरं ॥४४॥
साक्षिणः सर्व्वभूतानां ब्रुवते तेन यत्कृतं ॥
उक्तो विभावितश्चैव चित्रगुप्तेन चोदितः ॥४५॥
पात्यते निरये क्रन्दन्नुत्पादोऽधोमुखस्ततः ॥
ज्वलज्ज्वलनसङ्घातपरीतायसवेश्मनि ॥४६॥
प्रेतहाकारत्राङ्कारैर्म्मुखरैः श्वापदाकुले ॥
पतितो रक्तसङ्घोरैर्न्नानाशास्त्राग्रपाणिभिः ॥४७॥
भिद्यते छिद्यते रोषात् क्षिप्यते क्षारवारिणि ॥४८॥
वक्षोभ्यो लम्ब्यमानान्महिगतचरणान्तन्मुखान् क्रन्दमान
नुत्कृत्योत्कृत्य वेगात् पितृभवनमृगा भीषणा आश्वसन्ति (श्चास्वदन्ति) ॥
केषाचिच्छूलभिन्नोदरविदरमुखादन्त्रमाकृष्य रोषात्

शस्त्रैस्तक्षन्त्यभीक्ष्णन्नरपिशितभूजो वन्हिगर्भिव्यगारे ॥४९॥

॥ भगवानुवाच ॥

अष्टौ ते नरका घोरा मृत्युलोके यशस्विनि ! ॥
अवीची रौरवश्चैव कालसूत्रस्तथैव च ॥५०॥
कुम्भीपाकश्च नरकस्तथा यमलपर्व्वतौ ॥
कूटशाल्मलिवृक्षश्चत्र असिपत्राश्च पादपाः ॥५१॥
महारौख इत्येते नरकाः परिकीर्तिताः ॥
स्वकृतैः कर्म्मभिर्घोरैस्तत्र ते पुरुषाधमाः ॥५२॥
प्राप्नुवन्ति महादुःखं किम्भूयः श्रोतुमिच्छसि ॥

॥ उमोवाच ॥

केन कर्म्मविपाकेन अवीचीनरकं व्रजेत् ॥५३॥
रौश्वं वा प्रपद्यन्ते कालसूत्रमपि प्रभो ! ॥
तथावशेषान् करकांल्लभन्ते केन कर्म्मणा ॥५४॥
तानहं श्रोतुमिच्छामि नरकाननुपूर्व्वशः ॥
पृथक्कर्म्मविपाकेन नरकेषु पृथक् पृथक् ॥५५॥
यद्यत्र नरके कष्टं प्राप्तुवन्ति नराधमाः ॥
स्वयं कृतैर्म्महाघोरैर्भगवन् ! वक्तुमर्हसिः ॥५६॥

॥ भगवानुवाच ॥

विहाय मानुषं कालं स्वपापपरिवेष्टितः ॥
नीयमानः पिपासर्त्तो न पातुं लभते जलं ॥५७॥
बहुप्रकारसंयुक्ता नरकास्तत्र भामिनि ॥
अवीचीनरके देवी योजनायुतविस्तरः ॥५८॥
चतुर्द्वारश्चतुष्कोणः सुविभक्तचतुष्पथ : ॥
रौदरूपा महाघोरा निर्घृणा मृत्युकिङ्कराः ॥५९॥
द्वारपालाः स्थितास्तत्र द्वारि द्वारि महाबलाः ॥
अहन्यहनि रक्षन्ति तर्ज्जयन्तोऽसिपाणयः ॥६०॥
पापकर्म्मक्षयो येषां नरकाश्चारुहासिनि ॥
तेभ्यो द्वारं प्रयच्छन्ति सौम्यरूपा भवन्ति हि ॥६१॥
अवीचीनरकश्चैव नगरप्रतिमः पृथक् ॥
ज्वालामालासहस्रेषु तस्यं मध्ये हुताशनः ॥६३॥
हन्यन्ते पापकर्म्माणः प्रत्यहं यमकिङ्करैः ॥
हूयमानस्तथा वन्हिराज्यशुष्केन्धनैर्भृशं ॥६४॥

श्रूयतां कर्म्मणा येन तत्र गच्छन्ति मानवाः ॥
तडागान्युदपानानि ये भिन्दन्ति यशस्विनि ॥६५॥
कलत्राणि च मित्राणां धर्षयन्ति नराधमाः ॥
समर्था ये न रक्षन्ति भयाच्छरणमागतं ॥६६॥
तथैव सर्व्वसत्त्वेषु सततं निर्घृणा नराः ॥
मनसा कर्म्मणा वाचा अहन्यहनि हिंसकाः ॥६७॥
अग्निदाहकराश्चैव विषदा विषभक्षकाः ॥
गर्भपातनकाश्चैव मधुघातिन एव च ॥६८॥
उदितेषु च देशेबु भयदुर्भिक्षकारकाः ॥
ये च पूर्व्वप्रवृत्तानि नानुवर्त्तन्ति पार्थिवाः ॥६९॥
अप्रवृत्तानि कुर्व्वन्ति नृपा राष्ट्रेषु निर्घृणाः ॥
एतच्छीलसमाचारा दारुणाः पुरुषाधमाः ॥७०॥
अवीचीनरकं यान्ति मृत्युलोकमितो गताः॥
दह्यन्ते तत्र पच्यन्ते पूर्व्वद्वारमुपावृतं ॥७१॥
क्षिपन्त्यस्मात्प्रधावन्ति वन्हिज्वालाभयार्दिताः ॥
यत्र यत्र भयाद्गगच्छेत्तत्र तत्रानलो दहेत् ॥७२॥
विघाट्टिते सुविस्तीर्णे तत्र धावन्ति ते पुनः ॥
प्राप्ता द्वारं भृशं घोरर्हन्यन्ते द्वारपालकैः ॥७३॥
ततो वियुक्तास्तद्दुःखं न स्मरन्ति नराधमाः ॥
रौश्वे नरके देवी ! दारुणास्तत्र यातनाः ॥७४॥
वापीव सचतुष्कोणा योजनायुतविस्तरा ॥
करीषानलसञ्जातो निर्द्धूमः सम्प्रवर्त्तते ॥७५॥
मध्ये कृष्णायसस्तम्भो वन्हिवर्णः समुच्छ्रितः ॥
तत्र तिष्ठन्ति ते घोरा निर्घृणा मृत्युकिङ्कराः ॥७६॥
प्रक्षिपन्ति महावीर्याः प्रभ्राम्य नरके नराज् ॥
परिभ्रमन्ति तत्राग्नौ पतितास्तत्र दारुणैः ॥७७॥
व्यजनन्तालवृन्तञ्च छत्रवस्त्रमुपानहौ ॥
देवस्वं ब्राह्मणस्वं च ये हरन्ति नराधमाः ॥७८॥
ते नरा नरकं यान्ति रौरवं रोमहर्षणं ॥
पच्यन्ते नरके तत्र पापकर्मरता नराः ॥७९॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥
हरेत्कृष्णायसं यस्तु कर्म्मकोऽपरकन्नरः ॥८०॥
शिल्पिना सर्व्वसर्वेषां कर्म्मक्षेत्रोपजीविनां ॥

ये हरन्तीह भाण्डानि लोहीपाके नराधमाः ॥८१॥
तत्रतिष्ठन्ति ते घोरा निर्घुणा मृत्युकिङ्करा : ॥
घोराः सङ्गृह्य पुरुषान्नरीं वा पापकर्म्मिमां ॥८२॥
भृशं तप्तेषु लोहेषु क्षिपन्त्यकरुणा रुषा ॥
पापकर्म्मक्षयात्तेषां कुम्भीपाके सुदारुणे ॥८३॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥
मुसलोलूखलश्चैव कर्षकोपस्करन्तथा ॥८४॥
शयनाशनपानानि यच्चान्यद् द्रव्यसम्भवं ॥
ये हरन्ति वरारोहे नरा नरकनिर्भयाः ॥८५॥
ते नरा नरकं यान्ति कालसूत्रमतः श्रृणु ॥
तत्र तिष्ठन्ति ते रौद्रा निर्घृणा मृत्युकिङ्कराः ॥८६॥
शस्त्रैर्निशितधारैश्च तांस्तक्षन्ति महाबलाः ॥
यथा दारु वरारोहे कुठारैः शिल्पिनो नराः ॥८७॥
तक्षन्ति सूत्रमार्गेण तथा तक्षन्ति ते नराः ॥
तेषाञ्च तक्षमाणानां पापकर्म्मक्षयो यदा ॥८८॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥
यमला यत्र जायन्ते भवेदण्डचितं गृहं ॥८९॥
न तत्र दैवपित्रो वा होमगन्तु क्रतुक्रियाः ॥
वलिभिक्षा न कर्त्तव्या कश्मलोपहते गृहे ॥९०॥
स्नापनन्तत्र कर्त्तव्यं दम्पत्योश्चारुहासिनि ॥
ततः स्नातौ द्विजान्देवि भक्ष्यभोज्येन तर्पयेत् ॥९१॥
उपवेश्यात्र यमलौ दद्याद्विप्रेषु दक्षिणां ॥
तेषां पुण्याहिशब्देन शुद्धं भवति तद्गृहं ॥९२॥
अशुद्धे तु गृहे मोहाद्दैवं पिण्डं करोति यः ॥
ददाति बलिभिक्षां चा श्रूयतां तस्य या गतिः ॥९३॥
तेन ते नरकं यान्ति नरा यमलपर्व्वतौ ॥
यत्रातिष्ठन्ति ते देवि निर्घृणा घोरकर्मिणः ॥९४॥
उद्यताग्रायुधकरैः पर्व्वताभ्यां स पीड्यते ॥
अयोरसं द्रवीभूतमग्निवर्णे स पाच्यते ॥९५॥
तेऽपि चान्ये वराहोहे प्राप्नुवन्ति हि ताङ्गतिं ॥
तदहं सम्प्रवक्ष्यामि यः सुदुश्चरितैः कृतैः ॥८०॥
अन्नपानादिदानस्य व्याघातं कुरुते तु यः ॥
आक्रोशयेद्यः पितरं मातरं श्वशुरं गुरुं ॥८१॥

राजानं भुक्तपूर्व्वञ्च नारीं निन्दन्ति ये नराः ॥
दाने कन्याप्रदाने च ये विघ्नं कुरुते नराः ॥८२॥
सर्व्वे ते नरकं यान्ति नरा यमलपर्वतौ ॥
तेषां सञ्चूर्णगात्राणां पापकर्मक्षयो यदा ॥८३॥
ततो विमुक्तास्तद् दुःखं न स्मरत्ति नराधमाः ॥
व्याजकर्म्मकरा देवि कूटमानोपजीविनः ॥८४॥
कूटकापटिकाश्चैव ये च कर्म्माणकारकाः॥
ते मृता नरकं यान्ति कूटशाल्मलिको द्रुमं ॥८५॥
तत्र तिष्ठन्ति ते रौद्रा निर्घृणा मृत्युकिङ्कराः ॥
तर्ज्जितास्तेषु रौद्रेषु भयार्त्तास्तत्र पादपे ॥८६॥
ऊर्ध्वं समधिरोहन्ति संसरन्ति ह्यधोमुखाः ॥
कण्टकैस्तैस्ततस्तीक्ष्णैस्ते तृषाभ्यर्द्दिताशयाः ॥८७॥
तेषान्तत्र क्षताङ्गानां पाषकर्म्मक्षयो यदा ॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥८८॥
आश्रमेषु च पुण्येषु आरामोबुद्यानभूमिषु ॥
सभाकूपतडागेषु देवतायतनेषु च ॥८९॥
रेतो मूत्रपुरीषाणि ह्युत्सृजन्ति च मोहिताः ॥
ये हरन्ति वरारोहे आयुधानि च मानवाः ॥९०॥
तेन ते नरकं यान्ति ह्यसिपत्रं महाद्रुमं ॥
तत्रतिष्ठान्ति ते घोरा निर्घणा मृत्युकिङ्करा ः॥९१॥
गर्ज्जितास्तेषु रौद्रेषु नरास्ते पापकर्म्मिणः ॥
अश्वत्थे तत्र तिष्ठन्ति पादपे ते भयार्द्दिताः ॥९२॥
तस्य वृक्षस्य पत्राणि शीर्य्यन्ते मारुताहताः ॥
खङ्गचक्राशनी भूय तीक्ष्ण धाराण्यनेकशः ॥ ९३॥
तेषान्नराणामुपरि निष्पतन्ति ह्यनेकशः ॥
छिन्नकर्णोष्ठनासाश्च छिन्नहस्त प्रवाहवाः ॥९४॥
तेषां सञ्छिन्न गात्राणां पापकर्म्म क्षयो यदा ॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥९५॥
आदि कृत्वा तृणं काष्ठं यत्किञ्चित्सपरिग्रहं ॥
अरण्ये यदि वा क्षेत्रे ग्रामेषु नगरेषु वा ॥९६॥
चत्वरे वा गृहे वापि लोभात्परिभवेन वा ॥
पारक्यमाहरेद्यस्तु यच्चान्यात्सोपकारकं ॥९७॥
पापकर्म्मरताश्चैव चण्डालादौ जुगुप्सिताः ॥

अभोज्यानां कुले यान्ति दानपुण्यविवर्ज्जिताः ॥९८॥
ते महारौरवं घोरं व्रजन्ति नरकन्नराः ॥
चतुर्योजनविस्तीर्णं पञ्चयोजनमायतं ॥९९॥
घोरं गिरिगुहाकारं संवृतं पर्व्वते दिशं ॥
तदन्धकारं सततं मेघच्छन्नेव शर्वरी ॥४००॥
तत्र तिष्ठन्ति ते रौद्रा निर्घृणा मृत्युकिङ्कराः ॥
द्वारपाला महीवीर्य्या उद्यतायुधपाणयः ॥१॥
निर्ज्जितास्तैर्हि रौद्रैस्तु प्रविशन्ति भयार्दिताः ॥
तत्र तेषां प्रविष्टानां नरकं चारुभाषिणि ॥२॥
स्वशरीरोत्थितो वन्हिर्न्निर्द्दहत्यङ्गिनां वपुः ॥
दह्यमानास्तथात्यर्थं स्वशरीरोत्थिताग्निना ॥३॥
बाह्योत्थितानलेनापि नादं मुञ्चन्ति भैरवं ॥
पापकर्मक्षयो येषां नरके चारुभाषिणि ॥४॥
तेष्वन्तरं प्रयच्छन्ति ततः सौम्या भवन्ति च ॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥५॥
एतानि बहुदुःखानि नरकेषु पृथक् पृथक् ॥
एतत्ते कथितं देवि किं भूयः श्रोतुमिच्छसि ॥६॥
उवाच वेपमानाङ्गी देवी गद्गदया गिरा ॥
श्रुता मया महारौद्रा संसारस्य यथा स्थितिः ॥७॥
केनोपायेन पुरुषा नरकं वै न पश्यति ॥
सुखञ्च लभते येन तद् भवान् वक्तुमर्हति ॥८॥

॥ ईश्वर उवाच ॥

सत्यं क्षान्तिरहिंसा च शौचं दानमलोभता ॥
दया भूतेष्वपैशुन्ये मते ऽहङ्कारिताशनः ॥९॥
अद्रोहश्चानसूया च परैश्वर्य्ये च निस्पृहा ॥
अमात्सर्य्यमनानित्वं शिव भक्तिरचापलः ॥२६॥
जपध्यानरतिः स्थैर्य्यन्दीनान्धजनपालनी ॥
स्वाध्यायनियमासक्तिस्त्रिसन्ध्योपासनोन्मुखः ॥२७॥
निःसङ्गत्वमनास्तिक्यमार्ज्जवं ह्रीर्म्मनस्विता ॥
ओजः प्रशान्तिः सन्तोषः शाठ्यपापविवर्ज्जिताः ॥२८॥
परीक्ष्यकारिता नित्यं मनोवाक्कायनिग्रहाः ॥
अदाम्भित्वमनायासः कर्णेजपविवर्ज्जिताः ॥२९॥

पितृदेवा र्चनैर्भक्तिर्ज्ञानिनामप्युपासनां ॥
परापवादे मौनत्वमात्मन्येवात्मतुष्टिता ॥३०॥
अथापारः परार्थेः स्मिन्नौदासीन्यमनोरसां ॥
अक्रोधित्वममायित्वमिति धर्मः प्रकीर्तितः ॥३१॥
य एतान् भजते भावान् सोऽमृतत्वायकल्पते ॥
नश्यन्ति पौरुषाः पापा येऽप्यनन्ता महाबलाः ॥३२॥
यमः क्रन्दन् व्रजेत्तस्माद्धर्म्मशीलाः शरीरिणः ॥
तस्मादेव विदित्वा तु मनोधर्म्मे निवेशयेत् ॥३३॥
यस्य चित्तमसम्भ्रान्तं निर्व्विकारमकल्मषं ॥
स याति परमं लोकं नरकञ्च न पश्यति ॥३४॥
यस्य बुद्धिरसम्मूढा सर्व्वभूतेष्वपापकृत् ॥
अकल्कता सुप्रशान्तो नरकं स न पश्यति ॥३५॥
इन्द्रियाणि जितान्येव मनो यस्य वशे स्थितं ॥
जितं चित्तं जितं सर्वं त्रैलोक्यं सचराचरं ॥३६॥
जितचित्तस्य दान्तस्य आत्मारामस्य देहिनः ॥
सर्वभूतस्य हस्तप्राप्तं त्रिपिष्टपं ॥३७॥
स्वकार्ये परकार्ये च यस्य बुद्धिः समागता ॥
एतदेव हि पाण्डित्यं शेषाः पुस्तकवाचकः ॥३८॥
शुनः पुच्छमिवानर्थं शास्त्रमन्यायवर्त्तिनां ॥
नाच्छादयति कौपीनं न दंशमशकापहं ॥३९॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यतां ॥
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥४०॥
एष एकान्तिकोपाय आख्यातस्तेऽद्य कृत्स्नशः ॥
अधुनात्यन्तिकं ज्ञात्वा तथान्येषां परीक्षयेत् ॥४१॥
सर्वथा सर्वदा तस्मिन् धर्मे बुद्धिं निवेशयेत् ॥
समासाद् दश धर्मस्य लक्षणं प्रब्रवीमिते ॥४२॥
यत्कृत्वा नरकं घोरं न पश्यन्ति शरीरिणः ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्कता ॥४३॥
एते स्मृता यमाः पञ्च शास्त्रेऽस्मिन् पारमेश्वरे ॥
अक्रोधो गुरुशुश्रूवा शौचमाहारलाघवं ॥४४॥
अप्रमादश्च पञ्चैते नियमाः परिकीर्तिताः ॥
मारणं ताडनं बन्धस्त्रासनं वृत्तिनाशनं ॥४५॥
हिंसा पञ्च प्रकारोक्ता तत्यागाद्धर्ममाप्नुयात् ॥

पैशुन्यमयथार्थञ्च भिन्नं कटुकनिष्ठुरं ॥४६॥
अनिबद्धञ्च यद् वाक्यं तन्मृषा वाक्यमुच्यते ॥
परस्वस्यापहरणं रक्षिस्तस्येतरस्य वा ॥४७॥
बलाद्वा यदि वा पापैस्तच्चौर्यं सम्प्रकीर्तितं ॥
मैथुनं स्पर्शनं क्रीडा कीर्त्तनं स्मरणञ्च यत् ॥४८॥
अब्रह्मचर्यमित्येतत् पञ्चधा परिकीर्त्तितं ॥
लाभार्थमथ पूजार्थन्न धर्म्माय न शान्तये ॥४९॥
विज्ञेयं कल्कनं शास्त्रदम्भमोहादिभिर्युतं ॥
मानसोद्वेगमानस्थ आषेशाभिः स्वदाहकः ॥५०॥
तर्ज्जनादिनिमित्तञ्च क्रोध इत्युच्यते बुधैः ॥
शस्त्रस्य शान्तो पितरो वाचार्यादेशिता च यः ॥५१॥
तेभ्यः प्रियहितं कर्म्म गुरुशुश्रूषणं स्मृतं ॥
देशदेहेन्द्रियाद्रव्यभावना शास्त्रचोदितं ॥५२॥
शुद्ध्य यत्क्रिया सम्मक् तच्छौचं परिकीर्त्तितं ॥
आहारलाघवं विद्याद् विशुद्धाहारभोजनं ॥५३॥
विशुद्धा चरुभिक्षाद्या कन्दमूलफलं पयः ॥
मोहो रागो मदो द्वेषः प्रमादाद् वृत्तिरुच्यते ॥५४॥
तेभ्यो निवर्त्तनं सम्यगप्रमादः प्रकीर्त्तितः ॥
लक्षणं दश धर्म्मस्य कथितं वरवर्णिनि! ॥५५॥
अष्टाङ्गलक्षणं सम्यगधुना कथयामि ते ॥
महेश्वरजनप्रीतिः शिवदानेऽनुमोदते ॥५६॥
स्वयमभ्यर्चनं शक्त्या मदर्थे चाङ्गचेष्टनं ॥
स्मर्त्तव्योऽहं सदाकालं मत्कथाश्रवणे सुखं ॥५७॥
विक्रिया दृक्स्वराङ्गानामुपजीवन्ति नैव मां ॥
सम्यग्देवि ! मया प्रोक्ता ह्यंतेऽष्टादश सत्तमाः ॥५८॥
येषामाचरणाद् देही शैव मित्यभिधीयते ॥
गोब्राह्मणाष्टमूर्त्तिभ्यः पितृमातृभ्य आर्च्चयेत् ॥५९॥
तीर्थाम्भस्यघर्षणं जपतु वा पञ्चानलं वा क्रियात् ॥
भस्मस्नानमुपाचरत्वविरतं बध्नातु मुद्रागणं ॥
वाता द्वादश सत्तमो गुणगणैः पुष्टः प्रकृष्टैरपि
पङ्कैः सार्द्धमलीमसाम्बरमिव प्रोद्भास्यते नो नरः ॥६०॥

इति शिवधर्मसङ्ग्रहे चतुर्थोऽध्यायः ॥४॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मसङ्ग्रहे

पञ्चमोऽध्यायः

ॐ नमः शिवाय

॥ ईश्वर उवाच ॥

अज्ञानार्जितपापानां ब्रवीमि ध्वंसनं प्रिये ! ॥
विज्ञानार्जितपापानां न ब्रवीमि कदाचन ॥६१॥
न ज्ञानबलमाश्रित्य पापं कुर्वीत संयमी ॥
लोकाः किं मृत्युना योज्या बलमाश्रित्य भूभुजां ॥६२॥
संवृत्तिं ज्ञानिनामेवं युक्तमेवाभिरक्षितुं ॥
विरुद्धासनविच्छित्तिर्भिषजामेव शोभते ॥६३॥
वमनै रेचनैः स्वेदैरौषधीनां बलेन च ॥
रोगार्त्तान् समयन्तीति किं सेव्या न हितैषिभिः ॥६४॥
दानधर्मं प्रवक्ष्यामि प्रेतलोकार्गलम्परं ॥
विधुरध्वान्तमार्त्तण्डसोपानं सुरवेश्मनां ॥६५॥
इज्याध्ययनदानानि तपः सत्यं क्षमा धृतिः ॥
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥६६॥
तत्र पूर्वश्चतुर्वर्गो दम्भाथमपि सेव्यते ॥
ऊर्ध्वं चोत्तरवर्गस्तु स महात्मसु तिष्ठति ॥६७॥
इज्या तपः स्वाध्ययनं दानानि विविधानि च ॥
दमो मूलानि सर्वाणि तस्यादुदसमी भवेत् ॥६८॥
दानाच्छोषमुपैति वैरजलधिर्द्दानाच्च लोकप्रियो
दानात् कीर्त्तिरतीव रूपविशवः श्रीभोगसम्पत्तथा ॥
मृत्योर्ल्लोकगतः सुखानि परमाण्याप्नोति दानादपि
स्वर्गं नन्दतिदानतोऽपि सुचिरं दानाद्धि सर्वं भवेत् ॥६९॥
नागेन्द्रास्तुरगाः पदातिविभवो यानानि वन्दी तथा
दिव्याहारविहारभूषणसुखं सिंहासनं चामरं ॥
अर्थाशापरिपूरणं युवतयो हर्म्यं शशाङ्कप्रभं
प्रज्ञा बोधगुणाः सदा निरुजता प्राग्दानचिन्हं नृणां ॥७०॥
गृहस्थस्योपजीवन्ति वत्सो धेनोश्चतुस्तनान् ॥
देवताः पितरश्चैव मानुषाश्च गिरिन्द्रजे ! ॥७१॥

स्वाहाकार वषट्कारानुपजीवन्ति देवताः ॥
स्वधाकारं पितृगणा पाङ्ककारश्च मानुषाः ॥७२॥
शूद्रोऽपि पञ्चभिर्यज्ञैर्यजते मन्त्रयोगतः ॥
अतोऽन्यथा तु यो भुङ्क्ते स त्राणंनित्यमश्नुते ॥७३॥
गृहस्थः सर्वदा कुर्याद् ददातियजतिक्रियाः ॥
दानधर्ममकुर्वाणो द्रव्ये सति स यात्यधः ॥७४॥
उदपानन्तु यः कुर्यात् पापात्मा दुष्टचेतसः ॥
विधूय पापसङ्घातं पितृभिः सह मोदते ॥७५॥
पुष्करिण्यास्तु यः कर्त्ता मोदते दिवि शक्रवत् ॥
कुलैश्च सप्तभिर्युक्तो यावत्कीर्त्तिर्न्न पश्यति ॥७६॥
गृहं द्रव्यसमोपेतं दद्याद्विप्राय यो नरः ॥
तस्य हेममयं दिव्यं गृहं स्वर्गेषु जायते ॥७७॥
उद्यानं कुरुते यस्तु देवदेवस्य मन्दिरे ॥
तस्य दानफलं सम्यक् पुष्पे पुष्पे निबोधमे ॥७८॥
दशसौवर्णिकं पुष्पं माला लक्षेण सम्मिता ॥
कोटिमालाशतेनाहुरनन्तं लिङ्गपूरणे ॥७९॥
एवं कुर्वीत यो नित्यं स गणो मम चाक्षयः ॥
न तस्य मर्त्यभावो हि कल्पकोटिशतैरपि ॥८०॥

॥ ऋषय ऊचुः ॥

पृच्छन्ति ऋषयो भीताः संसारभयविह्वलाः ॥
तुष्यते च कथं देव अर्चितस्य च किं फलं ॥८१॥
क्षीराज्यदधितोयेन स्नापितस्य च किं फलं ॥
पुष्पाणां चैव सर्व्वेषां गन्धपुष्पस्य किं फलं ॥८२॥
वस्त्रालङ्कारनैवेद्यैर्ध्वजादर्शवितानकैः ॥
किं फलं छत्रदीपेषु गवादिमहिषीषु च ॥८३॥
अश्ववारणदानस्य दासीदासस्य यत्फलं ॥
सम्मार्ज्जने फलं किं स्यात्तथा चैवोपलेपने ॥८४॥
गीतनृत्यफलं ब्रूहि तन्त्रीवाद्यफलञ्च यत् ॥
कृष्णाष्टम्यां चतुर्दश्यां जागरस्य फलं वद ॥८५॥
उपवासस्य यत्पुण्यं देवदेवश्रितस्य तु ॥
एतत्सर्वं समाख्याहि उपसत्यः स्म ते वयं ॥८६॥

॥ नन्दिकेश्वर उवाच ॥

शतं सम्मार्जने दानं सहस्रमुपलेपने ॥
निष्काणां प्राप्नुयात्पुण्यं शिवभक्त्या समन्वितः ॥८७॥
उपलिप्य शिवागारं शुचिर्भूत्वा समाहितः ॥
अर्च्चयन् सततं देवं ज्ञानदीक्षाविवर्ज्जितः ॥८८॥
बभ्रुपुष्पफलञ्चैव दधिक्षीरघृतादिभिः ॥
विचित्रैर्भक्तिपूजैश्च यः पूजयति नित्यशः ॥८९॥
यस्तु नैवेद्यछत्रैश्च ध्वजादर्शवितानकैः ॥
घण्टाचामरदानेन अलङ्कारौदनेन वा ॥९०॥
सुवर्णमणिरत्नैश्च गन्धधूपोपलेपनैः ॥
गीतवादित्रनृत्यैश्च हुहुङ्कारैस्तथैव च ॥९१॥
वक्ष्यामि सर्व्वमेवं तु अपरिज्ञानकारणं ॥
केवलं भक्तिमापन्ने श्रृणुध्वं पूजया फलं ॥९२॥
तोयेन स्नापयेल्लिङ्गं गन्धदिग्धेन चैव हि ॥
एकरात्रेण मुच्यन्ते मानसात् किल्विषान्नराः ॥९३॥
दशरात्रात्कायिकेन महापापेन पक्षतः ॥
मासेन स्वर्गमाप्नोति आब्दाद्गाणेश्वरीं गतिं ॥९४॥
अब्देन पितृतां याति पञ्चभिः कुलमुद्धरेत् ॥
द्विषट्कैरीशसायुज्यं यावज्जीवं शिवं विशेत् ॥९५॥
कृष्णाष्टम्यां चतुर्दश्यां यो दध्ना स्नापयेच्छिवं ॥
यावज्जीवकृतैः पापैर्म्मुच्यते नात्र संशयः ॥९६॥
प्रत्यहं स्नापयेद्यस्तु मासमेकं सुचिर्न्नरः ॥
केतूनां फलमाप्नोति भिन्नदेहे सुरालयं ॥९७॥
षण्मासं स्नापयेद्यस्तु सुराणां चोत्तमो भवेत् ॥
अब्दस्नानेपितरस्तस्य यान्ति सुरालयं ॥९८॥
अयब्देन रुद्रसायुज्यं द्वादशाब्दैः कुलै : स्वयं ॥
घृतेन स्नापयेल्लिङ्गमेकाहमपि मानवः ॥९९॥
दध्ना तु सर्व पापानि अश्वमेधमवाप्नुयात् ॥
दशरात्रात्स्वर्गगतिं मासाद्गाणेश्वरीं गतिं ॥५००॥
पितृन् नरकगर्त्तस्थानुद्धरत्यविकल्पतः ॥
षण्मासं स्नानपयेद्यस्तु नित्यञ्चाभग्नयोगतः ॥१॥

तस्योपरिवरा यान्ति नित्यं गाणेश्वरीं गतिं ॥
द्विरब्देनैव सायोज्यं व्रजन्ति पितृभिः सह ॥२॥
घृत स्नानात्परं नास्ति उद्धरेत्कुलसप्तकं ॥
त्रिनेत्राः शूलहस्ताश्च वृषाङ्काश्चन्द्रशेखराः ॥३॥
सर्वज्ञाः सर्वगा नित्या भवन्ति जगदीश्वराः ॥
कृष्णाष्टम्यां चतुर्दश्यां मधुना स्नापयेच्छिवं ॥४॥
राजसूयस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
प्रत्यहं स्नापयेद्यस्तु वर्षेणैव गणेश्वरः ॥५॥
पञ्चाब्देन तु सायोज्यं प्रयाति पितृसंयुतः ॥
प्रत्यहं पञ्चगव्येन यः शिवं स्नापयेन्नरः ॥६॥
न तस्य दृष्यते चान्तं देवलोकं स गच्छति ॥
संवत्सरेण शुद्धात्मा शिवसायुज्यतां व्रजेत् ॥७॥
द्विवर्षेण पितृन् सप्त समुद्धृत्य शिवं व्रजेत् ॥
गन्धैश्च स्नापयेल्लिङ्गं दिव्यैश्चैव सुगन्धिभिः ॥८॥
वाजपेयस्य याज्ञस्य फलं प्राप्नोति मानवः ॥
कर्पूरव्यतिमिश्रेण चन्दनेन तु लेपयेत् ॥९॥
विद्याधरत्वमाप्नोति रमते सुरपूजितः ॥
अश्वमेधफलं चैव दशरात्रादवाप्नुयात् ॥१०॥
मासेनैकेन गणतां अब्दात्सायोज्यमाप्नुयात् ॥
अहग्नयोगो यो दद्यात्प्रत्यहं लिङ्गलेपनं ॥११॥
पितरस्तस्य सर्वे ते गतिं यास्यन्ति चोत्तमां ॥
अगुरुं दशसाहस्रं षट्साहस्रन्तु चन्दनं ॥१२॥
अनन्तो गुग्गुलुश्चैव सहाज्येन सुयोजितः ॥
द्वे सहस्रे पलानान्तु महिषाक्षस्य गुग्गुलोः ॥१३॥
प्रदहेत्तङ्गतात्मायः सर्व्पापैः प्रमुच्यते ॥
देवि संवत्सरे पूर्णे नन्दीश्वरसमो भवेत् ॥१४॥
एकान्हं दहते यस्तु देवदेवस्य सन्निधौ ॥
सर्व्वपापविशुद्धात्मा अग्निष्टोममवाप्नुयात् ॥१५॥
भक्तिमान् प्रदहेद्यस्तु धूपं गुग्गुलुमुत्तमं ॥
मासैकेन समाप्नोति क्रतुनां शतमुत्तमं ॥१६॥
मासमेकं दहेद्यस्तु स गणश्चोत्तमो भवेत् ॥
न तस्य सम्भवो मर्त्ये पितृभिः सह मोदते ॥१७॥
व्यब्दं दहति यो देवि शुचिर्भूतो दिने दिने ॥

स्वकुलं चोद्धृतन्तेन शिवभक्तेन धीमता ॥१८॥
वस्त्रध्वजवितानन्तु यो दद्याल्लिङ्गसन्निधौ ॥
लभते परमैश्वर्यं जायते चोत्तमे कुले ॥१९॥
सकृद्दानफलं ह्येतद् द्वित्रिंधागतिरुत्तमां ॥
प्राप्नुयान्मानवः शीघ्रं सोमलोकं न संशयः ॥२०॥
शतसाहस्रदानेन गतिर्गाणेश्वरी भवेत् ॥
पितृभिः संयुतश्चैव तक्षदानान्न संशयः ॥२१॥
मेखलां कटिसूत्रश्ञ्च यो दद्याल्लिङ्गमूर्धनि ॥
चतुःसागरपर्यन्त क्ष्मायां नु स भवेन्नृपः ॥२२॥
मुकुटं कुण्डलञ्चैव चित्रपट्टकदायकः ॥
सकलान्तु महीं मुङ्क्ते अङ्गाभरणदानतः ॥२३॥
मुसकोशेतथैवेह षट्टात्प्रादेशिको नृपः ॥
चित्रके चित्रभोगानि निः सम्पन्नान्यवाप्नुयात् ॥२४॥
पुनः पुनश्च यो दद्यात् रत्नाभरणभूषणं ॥
गाणपत्यमवाप्नोति चाक्षय्यं परमं ध्रुवं ॥२५॥
मुक्तिमण्डपिकाभक्त्या दत्वा योऽर्चयते शिवं ॥
न तस्य पुनरावृत्तिर्गणश्चैवोत्तमो भवेत् ॥२६॥
रोचना कुङ्कुमञ्चैव लिङ्गस्योपरि यो नरः ॥
प्रत्यहं लेपनन्दद्यात्स विद्याधरतां वजेत् ॥२७॥
द्वादशाब्देन गणतां कर्प्पूरागुरुलेपनैः ॥
कटकेयूर दानेन आधिपत्यं महेच्छतां ॥२८॥
प्राप्नुवन्ति नरा लोके शिवभक्तिपरायणाः ॥
रत्नदानानि दिव्यानि यो ददाति शिवाय वै ॥२९॥
दशसौवर्णिकं पुष्पं निर्गन्धं यदि भामिनि ॥
शतसाहस्रकां माला अनन्तं लिङ्गपूरणे ॥३०॥
निर्गन्धिकुसुमस्यायं विधिः ख्यातो द्विजोत्तमाः ॥
शोभनैर्द्दिव्यगन्धाद्यैः श्रृणु तत्र तु यत्फलं ॥३१॥
एकपुष्पप्रदानेन लिङ्गेषु प्रतिमासु वा ॥
अशीतिकल्पकोटीनां दुर्गतिन्न नरो व्रजेत् ॥३२॥
एवं वै निरयाः सर्वे नियतं शून्यतां गताः ॥
एकपुष्पप्रदानेन कस्य योगो न विद्यते ॥३३॥
वृत्तिसम्पत्तिसंशुद्धं शेषं सम्पत्तिभाषितं ॥
तृणमप्युत्तमार्थाय कोटिवधिरसेन्द्रवत् ॥३४॥

॥ नन्दिकेश्वर उवाच ॥

एकपुष्पप्रदानेन योगः सर्वस्य विद्यते ॥
न चतुःसम्पदा योगः किन्तु सर्वस्य विद्यते ॥३५॥
अकामाभ्यर्च्चिते लिङ्गे एतदुक्तं मया फलं ॥
कामेनाभ्यर्च्यमानस्य श्रृणु तस्यापि यत्फलं ॥३६॥
अर्क्कस्य करवीरस्य वुकस्योत्तमकस्य च ॥
चतुर्णां पुष्पजातीनां गन्धं जिघ्रति शङ्करः ॥३७॥
सुवर्णनिष्कं पुष्पं तु सर्वस्मिन् देवि कथ्यते ॥
सहस्रन्त्वन्यपुष्पाणां दत्ते यत्कथ्यते फलं ॥३८॥
करवीरसहस्रस्य भवेत्प्रदस्य यतफलं ॥
तदेकस्य तु पुष्पस्य दत्तस्य फलमश्नुते ॥३९॥
पद्मानान्तु सहस्रस्य मम दत्तस्य यत्फलं ॥
तत्फलं लभते पत्रे दत्ते बिल्वस्य शोभने ॥४०॥
बिल्वपत्रसहस्रे तु दत्ते मे यत्फंल स्मृतं ॥
बुकपुष्पे तदेकस्मिन् मम दत्ते लभेत्फलं ॥४१॥
पुष्पे दत्ते यदेकस्मिन् लभेद्धत्तुरकस्य तु ॥
वुकेन वरदो देवः करवीरैर्द्धनप्रदः ॥४२॥
अर्केण प्रियमच्छिन्ने मोक्षं धत्तूरकस्य तु ॥
नीलोत्पलैर्भवेद्भोगो योऽर्चयेल्लिङ्गमुत्तमं ॥४३॥
रक्तार्कैः प्राप्नुयाद्राज्यं पुण्डरीकैश्च चक्रिणं ॥
चम्पकैः सर्वकामानि पुन्नागैर्नागकेशरैः ॥४४॥
इप्सितां लभते कामांस्तथा केशरदामकैः ॥
मन्त्रसिद्धिमवाप्नोति बृहत्यगचस्तिपुष्पकैः ॥४५॥
योऽर्चयेत्परमेशानं सितार्केण तथैव हि ॥
सर्वकामानवाप्नोति योऽउर्चयेद्गन्धपुष्पकैः ॥४६॥
कुपुकैर्विपुलोलाभः सौभाग्याय च वारुणं ॥
कन्याकामस्तु जातीभिर्योऽर्चयेत्परमेश्वरं ॥४७॥
स लभेच्चोत्तमां कन्यां षण्मासेन न संशयः ॥
मल्लिका ज्ञानकामार्थमर्चयन्तो महेश्वरं ॥४८॥
लभन्ते परमं ज्ञानं संसारभयनाशनं ॥
पुत्रकामाय कुन्दैस्तु अर्चयीत शुच्चिन्नरः ॥४९॥
लभते बहुपुत्रत्वं धनवत्त्वं चिरायुषं ॥

आरोग्यं कुशपुष्पैस्तु अशोकैः प्रियसङ्गमं ॥५०॥
कर्णिकारं धनं विद्याद् वश्यार्थे द्रोणपुष्पिकां ॥
कदम्बेनार्चयेल्लिङ्गं सततं नियते व्रतः ॥५१॥
शत्रूणां वशकामाय नित्यमेव प्रदापयेत् ॥
नश्यन्ति व्याधयस्तस्य योऽर्चयेदतिमुक्तकैः ॥५२॥
सिन्दुवारस्य पुष्पेण बद्धो मुच्येत बन्धनात् ॥
अङ्कोलासितवर्णानि निर्गन्धकुसुमा प्रिये ॥५३॥
तानि शत्रुविनाशाय देवदेवाय कल्पयेत् ॥
पीतकानि तु पुष्ट्यर्थं पुष्पाणि विजयाय च ॥५४॥
नित्यमेव तु यो दद्यात्स तत् काममवाप्नुयात् ॥
जलजानितु पुष्पाणि वश्यार्थं प्रकल्पयेत् ॥५५॥
नीलरक्तानि यान्येव तानि वश्यकराणि तु ॥
सर्वकामप्रदं बिल्वं दारिद्र्यस्य प्रमोचनं ॥५६॥
बिल्वपत्रात्परन्नास्ति येन तुष्यति शङ्करः ॥
विजयार्थं दमनकं योजयेन्नियमास्थितः ॥५७॥
विजिताः शत्रवस्तेन योऽर्चयेद्वृषभध्वजं ॥
सुखे मरुवकं दद्याज्जम्बुटः सर्वकामदः ॥५८॥
तिलको धनकामाय गोकामाय च वंकुलौ ॥
सौख्यदश्चापि तगरः किङ्किरातश्च कामदः ॥५९॥
आरोग्यञ्च धनञ्चैव फलिनी कामदा स्मृता ॥
शालः प्रियकरश्चैव किंशुकादायुराप्नुयात् ॥६०॥
हस्त्यश्वपशुकामाय कुटजेनार्चयेद्धरं ॥
कर्पूरदमनकौ दद्याच्छत्रूणाञ्च विनाशने ॥६१॥
नश्यन्ति शत्रवः शीघ्रं देवदेवस्य पूजनात् ॥
श्यामा चारोग्यद्वा नित्यं जपापुष्पं तथैव च ॥६२॥
कुराण्टकस्य वश्यार्थं नित्यं लिङ्गस्य पूजनात् ॥
विद्वेषे यूथिका योज्या देवदेवे महेश्वरे ॥६३॥
केतकी शत्रुनाशाय क्रुद्धो लिङ्गन्तु योर्चयेत् ॥
सर्वकामप्रदा ह्यैषा व्याघ्री देवी प्रकीर्त्तिता ॥६४॥
ज्योत्स्नाकरी तथैवाह नित्यमेव हि कामदा ॥
वासकेनार्चयेद्देवं बलमायुश्च वर्धते ॥६५॥
किण्टिका सुखदा नित्यं तथा चाप्सरचम्पकं ॥
डिम्बाक्षी व्याधिनाशार्थंमश्वकर्णस्तथैव च ॥६६॥

जयन्ती जयकामाय श्वेता च गिरिकर्णिका ॥
विद्वेषोच्चाटनार्थाय निम्बपुष्पेण योऽर्चयेत् ॥६७॥
भण्डीचाकर्षणे योज्या मदयन्ती च या भवेत् ॥
ऋषिपुष्पी रुद्रजटी हन्ति सर्वानुपद्रवान् ॥६८॥
शणपुष्पञ्च यत्प्रोक्तं कोकिलाक्षस्तथैव च ॥
सर्वं शुक्लन्तु शान्त्यर्थे सर्वं पीतन्तु पौष्टिके ॥६९॥
कृष्णं चैवाभिचारे च देवदेवाय कल्पयेत् ॥
पत्रं पुष्पं फलं तोयं तृणञ्चैव तथा पय : ॥७०॥
प्रत्यहं सम्भवे दद्यान्नासौ दुर्गतिमाप्नुयात् ॥
यस्य वृक्षस्य पुष्पाणि पत्राणि च फलानि च ॥७१॥
महादेवाय युक्तानि सोऽपि याति पराङ्गतिं ॥
नास्ति पापसमः शत्रुर्न्न च धर्म्मसमः सखा ॥७२॥
नैव रुद्रात्परो देवो न पुष्पं कनकादपि ॥
वुकेनाभ्यर्च्यमानस्तु वरदो भवति प्रभु : ॥७३॥
सप्तरात्रन्निवेद्यस्तु वुको रुद्राय धीमता ॥
दिने दिने तु दातव्यं शोचयित्वा पुनः पुनः ॥७४॥
सप्तरात्रमतिक्रम्य निर्म्माल्यत्वं प्रपद्यते ॥
सकृद्दत्ते वुके देवि ! गोसहस्रफलं लभेत् ॥७५॥
पक्षेण योगी भवति मासेन तु दिवं व्रजेत् ॥
मासद्वयेन चाप्नोति क्रतूनां फलमुत्तमं ॥७६॥
त्रिभिर्म्मासैः प्रपद्येत ब्रह्मलोकमनुत्तमं ॥
चतुर्भिः सिद्धिमाप्नोति योगसिद्धिश्च पञ्चभिः ॥७७॥
षण्मासेन नरो याति रुद्रलोकन्न संशयः ॥
रुद्राकृतिर्न्नरो भूत्वा चन्द्रार्द्धकृतशेखरः ॥७८॥
प्रयाति बृषयानेन द्वितीय इव शूलधृक् ॥
एवमभ्यर्च्य देवेशं नैवेद्यं परिकल्पयेत् ॥ ७९ ॥
अन्ननैवेद्यदानेन लभते सुखमक्षयं ॥
देवलोकमनुप्राप्ता भक्ष्यपानान्नरोत्तमाः ॥ ८० ॥
विद्याधरपतिर्भूत्वा मोदते दिवि देववत् ॥
सघृतं पायसं दद्यान्नैवेद्यं शम्भवे सदा ॥ ८१ ॥
गाणपत्यं भवेच्छीघ्रं द्वादशाब्दात्कुलैः सह ॥
घृतपूपन्तु सगुडं मम दक्षिणमूर्तिषु ॥ ८२ ॥
निवेदयति यो मर्त्यो नन्दीश्वरसमो भवेत् ॥

खण्डखाद्यकृतां दत्वा प्राप्नुयाद् गतिमुत्तमां ॥ ८३ ॥
भक्ष्य भोज्यादिकं कृत्वा सर्वकामानवाप्नुयात् ॥
यवागूकृशराः पूपा दत्वा तु सुखभाग्भवेत् ॥ ८४ ॥
मण्डकान् सिद्धपिण्डाश्च शष्कुलीमोदकानि तु ॥
दत्वान्यफलमूलञ्च लेह्यचोष्याणि यानि च ॥ ८५ ॥
दत्वा सर्व्वसुखावाप्तिरनन्तं गीतवादने ॥
निराहाराः क्षमायुक्ताः सत्यर्ज्जवपरायणाः ॥ ८६॥
मद्भक्ता ये हि नृत्येयुस्ते स्यु : प्राणसमा गणाः ॥
सकृद्दत्वा फलं ह्येतत्तन्त्रीवाद्यस्य मे श्रृणु ॥ ८७ ॥
कृत्वाऽसौ गणतां याति तन्त्रीवाद्यस्य वा देवः ॥
हुं हुं कारादिकं नित्यं मुखवाद्याट्टसतां ॥ ८८ ॥
त्रिष्कालञ्चैव कुर्वाणः स भवेदुत्तमो गणः ॥
एककालं द्विकालं वा त्रिकालंवापि नित्यशः ॥ ८९ ॥
ये स्मरन्ति विरूपाक्षं विज्ञेयास्ते गणेश्वराः ॥
षष्टितीर्थसहस्राणि षष्टिकोटचस्तथैव च ॥ ९० ॥
लिङ्गप्रणामस्यैकस्य कलान्नार्हन्ति षोडशीं ॥ ९१ ॥
एकोऽपि लिङ्गे सुकृतः प्रणामो दशाश्वमेधाददधिको नियोगात् ॥
दशाश्वमेधी पुनरभ्युपैति लिङ्गप्रणामी त्वपुनर्भवो हि ॥ ९२ ॥
एवं यः पुजयेदङ्गः शिवदीक्षाविवर्ज्जितः ॥
तस्येदं फलमुद्दिष्टं निर्वाणं दीक्षितस्य तु ॥ ९३ ॥
श्रुतमेतन्मया विप्रा देव्यै कथयतो हरात् ॥
मयापि वः समाख्यातं सत्यमीश्वरभाषितं ॥ ९४ ॥

॥ ऋषय ऊचुः ॥

किं लिङ्गस्य हि माहात्म्यं त्वया यदिति वर्णितं ॥
कृत्वा चैव फलं ब्रूहि यः करोति दिने दिने ॥ ९५ ॥

॥ नन्दिकेश्वर उवाच ॥

ब्रह्मा ब्रवीत्यहं कर्त्ता तथैवाहं गदाधरः ॥
इत्येवं वदतोरग्रे प्रादुरासीज्जले प्रभुः ॥९६॥
तेजोमध्ये स्थितं लिङ्गं पर्वाङ्गुष्ठप्रमाणकं ॥
उभौ तौ विस्मितौ तत्र किञ्चेदमिति चाहतुः ॥९७॥
उभौ तौ द्रुष्टुमारब्धौ वर्द्धमानं ततो विभुं ॥
आश्चर्यमिति सञ्चिन्त्य अध ऊर्ध्वं गतावुभौ ॥९८॥

अधो गतस्ततो विष्णुरूर्ध्वं ब्रह्मा जगाम च ॥
अन्तञ्चास्य न पश्यन्तौ क्षितावेतौ सुरोत्तमौ ॥९९॥
पुनश्चैव समागम्य स्तोत्रैस्तुष्टुवतुर्हरं ॥
ततस्तुष्टो महादेवो ब्रह्माणमिदमब्रवीत् ॥६००॥
स्वरूपं दिव्यमास्थाय सर्वलोकनमस्कृतं ॥
किमिच्छसि वरं विप्र ! ब्रूहि यत्तेऽभिकांक्षितं ॥१॥
एवं वादिनि देवेशे ब्रह्मा पप्रच्छ केशवं ॥
वरं किं याचयाम्येनं देवदेवं जगत्पतिं ॥२॥
अवादीन्माधवस्तस्मै पुत्रस्त्वं (त्वं) याचय द्रुतं ॥
यदा ते शम्भवे पुत्रो भवते वा तदा प्रभु : ॥३॥
तथैवाह तदा ब्रह्मा पुत्रो मे भव इत्यमुं ॥
तथास्मि(स्त्वि)त्यव्रवीद्देव: किन्त्वंपूज्यो भविष्यसि ॥४॥
अनुरूपं न यस्माद्धि वरं ते कांक्षितं द्विज: ॥
अथैवमुक्तो देवेन विषण्णवदन: स्वभू: ॥५॥
शार्ङ्गिणं शपयामास क्रोधसंरक्तलोचन: ॥
भवन्तं येऽर्चयिष्यन्ति ते यान्तु निरयं ध्रुवं ॥६॥
ब्रह्मणाप्येवमुक्तस्तु विष्णुराह महेश्वरं ॥
इत्थं शप्तोऽस्मि देवेश ! ब्रह्मणा परमेष्ठिना ॥७॥
उपायोस्ति यदीशान ! स भवान् वक्तुमर्हति ॥

॥ देवदेव उवाच ॥

पितेत्युक्तो मया ह्येष न तथ्यं वितथं वच: ॥८॥
किन्तु क्षीणयुगे घोरे सुगतस्त्वं भविष्यसि ॥
तस्मिंस्त्वां येऽर्चयिष्यन्ति मूढा: पण्डित मानिन: ॥९॥
ते यान्तु निरयं घोरमन्ये यान्तु पराङ्गतिं ॥
विष्णो ! ददामि ते वत्स ! वरमिष्टं वदस्व मे ॥१०॥
मम वाक्यममिथ्या हि ब्रूहि यत्तेऽभिकांक्षितं ॥

॥ विष्णुरुवाच ॥

यदि तुष्टोऽसि मे देव ! वरन्दातुमिहेच्छसि ॥११॥
त्वद्भक्तस्त्वत्प्रियश्चैव भविष्यामि न संशय : ॥

॥ महेश्वर उवाच ॥

एवं भवतु भद्रन्ते रुद्रनारायणी प्रजा ॥१२॥

आवयोरन्तरं नास्ति मेरूदुम्बरयोरिव ॥
एष एव हि लिङ्गो हि स्थापितो ब्रह्मविष्णुना ॥१३॥
इन्द्रादिभिः सुरैर्दैत्यैः स यक्षोरगराक्षसैः ॥
सिद्धैर्विद्याधरैर्भूतैरप्सरोगणकिन्नरैः ॥१४॥
पिशाचैस्र्नेहनक्षत्रैस्तथैव मुनिसत्तमैः ॥
सम्पूज्य वरदं देवं वरं लब्ध्वा तु रेमिरे ॥१५॥
सर्वकामप्रदोलिङ्ग एष उक्तो मयानघाः ॥१६॥
ब्रह्मोपेन्द्रमहेन्द्रनागमुनयो यक्षाः सविद्याधरा
देवा भूतगणा वसूक्ष्यदितिजाः साध्याः सरुद्रा ग्रहाः ॥
कूष्माण्डा दनुजाः सराक्षसगणाः प्रेता नगा वानरा
गन्धर्वाः सपिशाचकिन्नरगुहाः सिद्धा द्विजिव्हा द्विजाः ॥१७॥
आदित्यादपि लोकपालभुवना नद्याप्सरा मातरः
संसारार्णवदुःखभीतमनसोलिङ्गार्चने तत्पराः ॥
भक्तिप्रह्वधियः स्तुवन्त्यहरहः कृत्वाञ्जलिं मस्तके
ये मर्त्या न नमन्ति तं सुरगुरुं ते घ्नन्ति खं मुष्टिभिः ॥१८॥

इति शिवधर्मसङ्ग्रहे पञ्चमोऽध्यायः ॥५॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मसङ्ग्रहे

षष्ठोऽध्यायः

ॐ नमः शिवाय

॥ ऋषय ऊचुः ॥

कृतस्यैव तु लिङ्गस्य स्थापितस्य तु यत्फलं ॥
प्रत्यहं कुरुते यस्तु किन्तस्यापि फलम्भवेत् ॥१९॥

॥ नन्दिकेश्वर उवाच ॥

क्रीडन्तोऽपि च ये बाला लिङ्गं कुर्व्वन्ति पांशुना ॥
लभन्ते राज्यमेकान्ते निःसपत्नमकण्टकं ॥२०॥
प्रत्यहं विधिहीनन्तु लिङ्गं यः कुरुते नरः ॥
केवलं भक्तिमालम्ब्य श्रृणु तस्यापि यत्फलं ॥२१॥
धनं भोग्यन्तथा राज्यं यः कृत्वा पूजयेत्सदा ॥
लिङ्गं पूजयिता नित्यं महतीं श्रियमश्नुते ॥२२॥
सहस्रमर्चयन् विद्वान्निरयन्न तु पश्यति ॥
रुद्रलोकमवाप्नोति भुक्त्वाभोगाननिन्दितान् ॥२३॥
लक्षन्तु कुरुते यस्तु तस्यैको ज्वलति ध्रुवं ॥
दृष्ट्वा लिङ्गं ज्वलनञ्च सिद्धे देवत्वमाप्नुयात् ॥२४॥
लक्षैर्द्दशभिरिन्द्रत्वं स्कन्दं विंशतिभिः स्मृतं ॥
त्रिंशल्लक्षैर्म्मुरारित्वं रुद्रत्वं तु चतुर्गुणः ॥२५॥
पञ्च गव्येन संयोज्य यदा लिङ्गन्तु पूजयेत् ॥
अन्ते (न्नै :) लिङ्गञ्च कुर्वाणो लभते कामिकं फलं ॥२६॥
गुडलिङ्गं समभ्यर्च्च्य परं सौभाग्यमाप्नुयात् ॥
कन्याशतपतिश्चैव प्रतिराज्येश्वरो भवेत् ॥२७॥
नारी च स्त्रीसहस्रेण सापत्नैः परिवारिता ॥
लभेत्सौभाग्यमतुलं सर्वेषामुपरि स्थिता ॥२८॥
रमते पुत्रपौत्रैस्तु सुखमानन्त्यमश्नुते ॥
अर्चयेन्नरनारी वा खड्गलिङ्गञ्च नित्यश : ॥२९॥
सितेन कृत्वा लिङ्गन्तु प्रत्यहं यः समर्चयेत् ॥
सर्वकामानवाप्नोति षड्भिर्म्मासैर्न्न संशयः ॥३०॥
नवनीतमयं लिङ्गं लभते चेप्सितं फलं ॥
षण्मासेनैव युक्तात्मा शिवलोकं स गच्छति ॥३१॥

प्रत्यहं यत्र लिङ्गन्तु यः कृत्वा सम्यगर्चयेत् ॥
लभेच्चोत्तममैश्वर्यं स भुङ्क्तेनिरुजः सदा ॥३२॥
पृथिव्यःमाधिपत्यञ्च पुष्पलिङ्गस्य पूजनात् ॥
लभते निःसपत्नन्तु भुङ्क्ते चैव ददाति च ॥३३॥
लवणेन तु लिङ्गेन भवेत्सौ भाग्यमुत्तमं ॥
नित्यैश्वर्यमखण्डञ्च प्रत्यहं योऽभिपूजयेत् ॥३४॥
सद्भक्तेन तु लिङ्गानि पार्थिवानि तु कायरयेत् ॥
सहस्रपूजनात्सोऽपि लभते चेप्सितं फलं ॥३५॥
लक्षेणैकेन गणतां कोट्च माहात्म्यमृच्छति ॥

॥ दधीचिरुवाच ॥

किं फलं बालुकालिङ्गस्यार्चनादपि किम्भवेत् ॥३६॥
कथं वा पूजयेत्कर्म व्रतश्चैव कथं भवेत् ॥
प्रतिलिङ्गं शुभं कृत्वा सुसम्पूर्ण सुलक्षणं ॥३७॥
ताम्रं वा दन्तिकाश्रृङ्गं काष्ठेनापि च शोभनं ॥
बालुकां पूरयित्वा च बीजमन्त्रसमन्वितां ॥३८॥
सद्योजातेन देवेन तद्भूम्यां परिशोधयेत् ॥
वामदेवेन शोध्येत बालुका येन यत्नतः ॥३९॥
अघोरेण तु देवेन सिञ्चेच्चत्वारि वारिणा ॥
तत्पुरुषेण देवेन प्रतिलिङ्गाभिमन्त्रयेत् ॥४०॥
ईशानेन तु देवेन बालुकां परिपूरयेत् ॥
भगवन् पञ्चब्रह्मेण प्रतिष्ठाप्य हृदा तथा ॥४१॥
अनेनैव तु मन्त्रेण पूजयित्वा सदाशिवं ॥
करन्यासान्तःकरणं षडर्द्धाङ्गञ्च शोधनं ॥४२॥
कृत्वा चासनसान्निध्यं शक्तिं शम्भुन्ततोऽर्चयेत् ॥
होमकर्म च जाप्यञ्च साधनं मन्त्रमेव च ॥४३॥
शान्तिकापौष्टिकारोग्यं वश्याकर्षणकामदं ॥
अनेनैव तु मन्त्रेण सिध्यते साधनाद् बुधः ॥४४॥
गुरौ प्रतिष्ठितं लिङ्गं एकैकं बालुकान्नरः ॥
अहोरात्रकृतैः पापैर्मुच्यते नात्र संशयः ॥४५॥
पञ्चरात्रकृतात्पापान्मुच्यते द्विकृतार्चनात् ॥
दशरात्रकृतात्पापान्मुच्यते त्रिःकृतार्चनात् ॥४६॥
विंशद्रात्रकृतंपापं चतुर्लिङ्गं न मुच्यते ॥

पञ्चकृत्वार्चनो यस्तु मुक्ता पञ्चोपपातकात् ॥४७॥
सर्वशान्तिकमाप्नोति षट् कृतं लिङ्गमर्चनात् ॥
पुष्टिकार्थी लभेत्पुष्टिं सप्तकृत्वार्चनाद् द्विज ॥४८॥
अष्टप्रतिष्ठितं लिङ्गं बालुकाविकृतान्नरः ॥
इच्छाकाममवाप्नोति सर्वरोगविवर्जितः ॥४९॥
अष्टाविंशप्रतिष्ठाप्य बालुकेन तु यो नरः ॥
सर्वपापैः प्रमुच्येत सर्ववित्स भवेत्ततः ॥५०॥
शुद्धस्फटिकसाहस्रजापो विघ्नैः प्रमुच्यते ॥
शते प्रतिष्ठिते लिङ्गे रुद्रकोटिजपेत्फलं ॥५१॥
सहस्रं तत्प्रतिष्ठाप्य जापकोटिसहस्रकं ॥
लभेच्च लक्षलिङ्गेन रुद्रस्य चतुरो महत् ॥५२॥
कोटिप्रतिष्ठिते लिङ्गे मनामयपरं पदं ॥
निष्कण्टकं पुत्रपौत्रं राज्यप्राप्तिः शताधिका ॥५३॥
अरुद्राय मा भव शिव स्वाहा सर्वाङ्गसंयुतं ॥
पताकाधूपसंयुक्तं बालुकालिङ्गमर्चनं ॥५४॥
एतत्पुरा मया ख्यातं न देयं यस्य कस्य चित् ॥
स्वशरीरेण सायोज्यं पुनश्च न निवर्तते ॥५५॥
एतान्येव समभ्यर्च्य सदेवासुरमानुषाः ॥
सर्वकामसमृद्धाश्च सर्वदुःखविवर्जिताः ॥५६॥
ईश्वरस्य प्रसादेन प्रक्रीडन्नणिमादिभिः ॥
अष्टाष्टकसमायुक्तं ये कुर्वन्ति शिवालयं ॥५७॥
तावत्ते दिवि तिष्ठन्ति यावादिन्द्राश्चतुर्दश ॥
मणिरत्नप्रवालानि स्फटिकं मरकतानि च ॥५८॥
काचहेमजरौप्याणि ताम्रकांस्यानि यानि तु ॥
रैत्यलोहकसैस्यानि त्रपुषाणि तथैव च ॥५९॥
पुनश्चैतान्समभ्यर्च्य भुक्त्वा कामाञ्छिवं व्रजेत् ॥
न तस्य पुनरावृत्तिर्यो लिङ्गं स्थापयेद् भुवि ॥६०॥
कृत्वा प्रासादमध्ये तु स शिवो नात्र संशयः ॥
दशास्त्रवाणी नरकानतिघोरान्न पश्यति ॥६१॥
आरामस्य च यः कर्त्ता स्वर्गे मोदति रुद्रवत् ॥
प्लक्षादींश्च तथा वृक्षान् पथि कुर्वन्ति ये नराः ॥६२॥
छायाभिः शीतलाभिश्च न ते यान्ति यमालयं ॥
याम्यदुःखानि घोराणि न च तेषां भवन्ति हि ॥६३॥

वृक्षारोपणधर्मोयमेष ते परिकीर्तितः ॥
प्रासादं कारयित्वा तु विष्णुं ये स्थापयन्ति हि ॥६४॥
विष्णुलोकं व्रजन्तेते मोदन्ते विष्णुना सह ॥
ब्रह्माणीस्कन्दरुद्राणीं मातृ गणपतिं रविं ॥६५॥
वन्हिं शतक्रतुं यक्षं वायुं धर्मं जलेश्वरं ॥
यो यं स्थापयते धीमान् प्रासादेन च सुशोभने ॥६६॥
पूजयेत् परया भक्तया स मृतस्तत्पदं व्रजेत् ॥
असंक्रमपथे यस्तु संक्रमं कारयिष्यति ॥६७॥
धर्मराजपथं सोऽपि सुपथेनैव गच्छति ॥
नदीं वैतरणीं घोरां उष्णतोयां महार्णवां ॥६८॥
गम्भीरावर्त्तदुस्तारां सन्तरेत्स क्रमेण तु ॥
सेतुबन्धञ्च यः कुर्यात् कर्द्दमे पथि दारुणे ॥६९॥
धर्मराजपुरे मार्गे दुर्गमे स सुखं ब्रजेत् ॥
पङ्कलेपश्च नरकस्तप्तत्र पुजनूनि च ॥७०॥
सन्तरेहानि घोराणि नदीमार्गप्रदायकः ॥
मठस्यावसथस्यैव मण्डपस्य च कारकः ॥७१॥
त्यक्त्वा यमपुरं स्वर्गे तस्य हेमपुरं भवेत् ॥
तप्ताङ्गारशित्लावर्षान्न भयन्तस्य जायते ॥७२॥

अन्नदाता नरो यो हि नासौ नरकमाप्नुयात् ॥
अक्षयं सुखमाप्नोति ब्रह्मलोकगतो नरः ॥ ७३ ॥
न तस्य सम्भवो मर्त्ये यावद् ब्रह्मा न पश्यति ॥
न चास्ति नैत्यकन्दानमन्नदानात्परं प्रिये ॥ ७४ ॥
देहिनामन्नदानेन जीवन्दत्तन्न संशयः ॥
यस्तु ग्रीष्मे प्रपान्दद्यातृषार्त्ते पथिके जने ॥ ७५ ॥
स तृप्तः प्रेत भवने तृषद्वन्द्वविवर्जित : ॥

॥ देव्युवाच ॥

दरिद्रान् वीक्ष्य चेतोमे दीर्यते कृपया विभो ! ॥ ७६ ॥
किमकृत्वा दरिद्रः स्यादेतदाख्यातुमर्हसि ॥ ७७ ॥

॥ भगवानुवाच ॥

तीर्थात्यगत्वा क्षितिहेमधेनुं कृष्णाजिनं कृष्णतिलान्न दत्वा ॥
त्रिवासरं चाप्यनुपोष्य जन्तुर्ज्जायेत दारिद्र्यरुजाभिभूत : ॥ ७८ ॥

॥ देव्युवाच ॥

किन्तिलस्यमाहात्म्यं किन्तु कृष्णाजिनस्य वा ॥
सुवर्णस्य गवाञ्चैव भूदानस्य च मे वद ॥ ७९ ॥

॥ भगवानुवाच ॥

नमुचिर्न्नाम दैत्येन्द्रं युध्दे वीक्ष्य पुरा ऽच्युतः ॥
उद्वेजयन्तं गीर्वाणं क्रोधतामगमत्तदा ॥ ८० ॥
क्रोधात्स्वेदलवास्तस्य निपेतूर्ध्दरणीतले ॥
ते बभूवुस्तिलाः कृष्णास्तस्मात्ते पावनाः स्मृताः ॥ ८१ ॥
देवान् पितृन् समभ्यर्च्य यो ददाति तिलोदकं ॥
तृप्यन्ति पितरस्तस्य वर्जिता नरकैस्त्रिभि : ॥८२ ॥
मेदोऽसृक्पूयगर्त्तेषु न निमज्जन्ति ते नरा : ॥
पितरश्च विमुक्ताः स्युस्तिलोदकफलेन वै ॥ ८३ ॥
श्राद्धं कुर्वन्ति ये नित्यं पितृभक्ताश्च ये नरा : ॥
तेषां तृप्ता हि पितरः स च तृप्तो यमालये ॥ ८४ ॥
कुम्भीपाकस्तु निरयो न तेषां प्रभविष्यति ॥
पितृलोकञ्च यास्यन्ति श्राद्धंकारयिता नराः ॥ ८५ ॥
पितृन् देवान् समुद्दिश्य नित्यं दीप प्रदायिनः ॥
तामिरत्रश्चान्धत्तामिस्रौ नरकौ न भविष्यतः ॥ ८६ ॥
लोचने च शुभे तेषां दृक्शक्तिश्चन नश्यति ॥

उपानच्छत्रसंयुक्तं तिलपात्रं ददाति यः ॥ ८७ ॥
स्वच्छशीताम्बुपूर्णे नरकं न च संयुतं ॥
द्विजेभ्यः शिव भक्तेभ्यो न स याति यमालयं ॥ ८८ ॥
विद्याधरपदं प्राप्य मोदते सुचिरं दिवि ॥
कालान्तरे यदा मर्त्यमागच्छन्ति नरोत्तमाः ॥ ८९ ॥
उदितोदितवंशे ऽस्मिन् जन्म तस्य भवेद् ध्रुवं ॥
एतत्तिलानां माहात्म्यं कथितं वर वर्णिनि ॥ ९० ॥
कृष्णाजिनस्य माहात्म्यं कथयाम्य धुना श्रृणु ॥
यत्कृष्णंतदृचां रुपं यद् बभ्रं यजुषां स्मृतं ॥ ९१ ॥
यच्छुक्लं तद्भवेत्साम्नां कृष्णसारस्य सुन्दरि ॥
अतस्तदजिनं पुण्यं त्रैविद्येनाप्यलङ्कृतं ॥ ९२ ॥
तस्माद्देयं प्रयत्नेन कुम्भीनरकभीरुभिः ॥
अजिनं तिलपूर्णन्तु दद्याद्रौप्यमयं क्षुरं ॥ ९३ ॥
हेमश्रृङ्गं सुचैलाङ्गं कांस्यदोहं द्विजातये ॥
चतुस्सागरपर्यन्ता सशैलवनकानना ॥ ९४ ॥
दत्ता तेन भवेत्पृथ्वी दत्ता त्रिभुवनेश्वरि ॥
अक्षयं लभते लोकं तिलधेनुप्रदायकः ॥ ९५ ॥
युगान्ते च परिभ्रष्टो जायते पृथिवीपतिः ॥ ९६ ॥

॥ भगवानुवाच ॥

भीतैस्तारकतः सुतः सुरगणैर्म्मत्तः पुरा याचित ॥
स्तद्धेतोः कृपया मया तु मदना दुपाद्यमाने सुते ॥
सत्तेजो ऽग्निरपादुपेत्य तदभूद्वन्हेः कुमारः प्रभु ॥
यच्छेषं कनकं बभूव गिरिजे तेनातिपुण्यं स्मृतं ॥९७॥
विप्रेभ्यः शिवभक्तेयो मासि मासि तिलान्ददत् ॥
नानादुःखप्रदं घोरं नरकं स न पश्यति ॥९८॥
वैशाख्यां पञ्चश्यान्तु तिलान्मधु समन्वितान् ॥
सप्तभ्यो वाथ पञ्चभ्यो ब्राह्मणेभ्यः सदक्षिणां ॥९९॥
धर्मराजस्तु सुप्रीत इति दद्याद् वरं ध्रुवं ॥
पापं विहाय स श्रीमान् निर्म्मलश्च प्रजायते ॥१००॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ॥
वैवस्वताय कालाय सर्वलोकक्षयाय च ॥१॥
उग्रदण्डाय हस्ताय महिषासनगामिने ॥

शासित्रे च नमस्तु भ्यं नरकाधिपतये नमः ॥२॥
एकैकस्य प्रमादस्य तिलमिश्रंजलाञ्जलिं ॥
त्रिस्त्रिः कृष्णचतुर्द्दश्यां नदीं गत्वा तु निर्व्वपेत् ॥ ३ ॥
हविष्यैकाशनः शान्तस्त्रयोदश्यां समाहितः ॥
आजन्मचरितं पापं दहत्याशु न संशयः ॥ ४ ॥
युगान्ते च परिभ्रष्टो जयते पृथिवीपतिः ॥

गाइको उत्पति

॥ भगवानुवाच ॥

गावः प्रजज्ञिरे पुण्या मथ्यमानेऽमृते पुरा ॥५॥
माननींया महाभागा देवानामपि नित्यशः ॥
तासां गात्रेषु सर्वेषु विबुधा : पर्यवस्थिताः ॥६॥
तस्मात्पुण्यतमा ज्ञेयास्तासां दाने दिवं व्रजेत् ॥
हेमश्रृङ्गां रौप्यखुरां रत्नाङ्गीं कांस्यदोहिनीं ॥७॥
सचैलघण्टां गान्दद्याच्छिवभक्तद्विजात्मने ॥
गोलोके स्वर्गलोके वा वासस्तेषां भविष्यति ॥८॥
सर्वद्वन्द्वविनिर्मुक्ता वसेयुर्गोप्रदायिन : ॥
स्वपापप्रग्रहैर्वध्दाः पतन्ति निरयाम्बुधौ ॥९॥
नौरिवानिलविक्षिप्ता दातृंस्तारयते हि गौः ॥

॥ देव्युवाच॥

दरिद्रेण कथं कार्यं गोप्रदानं सुरोत्तम ॥१०॥
कथं वा स्वर्गमानोति तद्भवान् वक्तुमर्हति ॥

॥ भगवानुवाच ॥

दद्यादाज्यमयीं धेनुं दरिद्रो द्रविणैः सह ॥११॥
स मृतो ऽमृतवाहिन्यां नद्यां रमत इच्छया ॥
आज्यालाभेजलमयीं दद्याद् धेनुं सदक्षिणां ॥१२॥
पिपासादिमहादु:खं हित्वा यात्यमरालयं ॥
गवां घासं दरिद्रेण कर्त्तव्यं प्रातरेव हि ॥१३॥
सत्रेणैव समायुक्तो मुच्यते सर्वपातकैः॥
स्वर्गगामी च भवति परिभ्रष्टो महामुने ॥१४॥
गवाद्येच भवेन्म गावाद्यश्च भवत्यसौ ॥ पार्वतीले सोध्दा शिवले भँन्नु हुन्छः- अधिदेव
दानब मिलेर अमृतकालागि समुद्रमथन गर्दा १४ रत्न मध्ये पवित्र कामधेनु गाई पनि
प्रकट भइन् र स्वर्ग मर्त्य पाताल तीनै लोकमा देव दानव मानव सवैकी नित्य

माननीय, पूजनीय, वन्दनीय, सेवनीय, पालनीय पोषणीय र संरक्षणीय भइना गोविराट्स्वरुपमा भने झैं ई महाभागा गाईहरुका सर्व गात्रमा सवै देवि देवता र तीर्थ धामहरु नित्य निवास गर्छन् । तेसैले गाईहरु अतिपुण्यतमा छन् । र गोदान गर्ने मानिस गोलोक (शिवलोक) मा आउँछन् । सिङ्गमा सुन भयेकी खुरमा चाँदी भयेकी आङमा रत्नहरु भयेकी ,कलचौडामा काँसो भयेकी ,घाँटीमा घण्टी भयेकी सर्वाङ्ग कपडाले ढाकिएकी कामधेनु गाई शिवभक्त पात्रलाईदान दिने शिवभक्त र गोभक्तदाता रुचि अनुसार शिवलोक गोलोक वा स्वर्गलोकमा जान्छन् र अक्षयकाल सम्म वास गर्छन् गाइको दान गर्ने मानिस शीत उष्ण आदि सवै द्वन्द्वबाट मुक्त भयेर सवै प्रकारका स्वर्गीय दिव्य सुख भोग्दै सानन्द शिवगोलोकमा निवास गर्छन् तर जो गोदानादि धर्म गर्दैनन् र पाप गर्छन् ती पापीहरु आफुले गरेका पापका डोरीले बाँधिएर नरकमय सागरमा डुब्छन् । गोदान गर्ने गाईदातालाई गाईआमाले उसै गरी वैतरणीवाट तार्छिन जसरी वतासले ठेलियेका डुँगाले नदी तार्छ। पुनश्च -पार्वतीले सोध्नु भयो -समस्त देवताहरुमा उत्तम हे देवदेव महादेव गाई को र गाईदानको माहात्म्य त सुन्न पाञे, तर गाईदानगर्न नसकने निर्धनले गोदानको फल कसरी पाँउछन् र तर्छन् अनि स्वर्ग पाउँछन् तथा गोलोक शिवलोकमा आउँछन् त्यो उपाय भन्नु हवस् भन्दा भगवान् शिव भन्नु हुन्छ यथाशक्ति दक्षिणासहित घिउकी गाई अथवा जलकी गाईदान गर्ने पनि शिवमा भक्तिभाव राख्छ भने भोक प्यास दुःख त्यागेर अमृतवाहिनी नदीमा सहजै गाइआमाले तार्छिन् र स्वर्ग जान्छन् । घृतधेनु र जलधेनुदान पनि गर्न न सक्नेले नित्य विहानै उठेर गाईलाई घाँस ल्याएर हालनु गोदान भन्दा ठूलो यज्ञको फल पायेर सवै पापबाट छुटेर स्वर्ग (गोलोकमा) आँउछ। स्वर्ग पछि मर्त्य लोकमा जन्मे पनि प्रशस्त गोधनीकुलमा जन्मेर गोरसको छेलोखेलो गर्छ र सवै सुःख पाँउछ।

अग्नि होत्रं हुतं तेन पितृदेवाश्च तर्पिता: ॥१५॥
सुस्नात : सर्व तीर्थेषु यो ददाति गवान्हिकं ॥
उत्पन्ना ऽमृतमथने सुरभी लोकधारिणी ॥१६॥
इमं ग्रासं गृहाणाम्ब! इदं मे व्रतमुत्तमं ॥
गवां ग्रासं यथा देयं सौरभेये तथैव च ॥१७॥
तुल्यमेव फलं दृष्टं किन्तु मन्त्र: पृथक्पथृक् ॥
सर्वलोक धरा ह्येते जीवितानां प्रदायका: ॥१८॥
ग्रासं गृह्णन्तु तुष्टास्तु एतन्मेव्रमुत्तमं ॥
नित्यं परगवे दद्या गृहीत्वा दुर्ल्लभं व्रतं ॥ १९ ॥
रक्षन्ति च्र भयाद् घोराद्दर्शने पापनाशना: ॥
गवां कण्डूयनं कुर्य्याद् ग्रासं दत्वा नगात्मजे ॥ २० ॥

प्रदक्षिणत्रयं कृत्वा गो प्रदानफलं लभेत् ॥
पुण्यकाले तु सम्प्राप्ते वृषोत्सर्गं करोति यः ॥२१॥
स याति रुद्रलोकन्तु यदि नीलो भविष्यति ॥
अलाभे नीलषण्ढस्य पितृभिः सह संयुतः॥२२॥
स्वर्गलोक मवाप्नोति भ्रष्टो भवति भोगवान् ॥
लाङ्गूलाग्रं सितं यस्य खुराः श्रृङ्गे च सुव्रतेः ॥२३॥
लोहितानि च गात्राणि नीलषण्ढः स उच्यते ॥
अनड्वाहो ऽपि बहुशो यः प्रयच्छेद् द्विजोत्तमे ॥२४॥
तेन पुण्यफलेनैव स्वर्गलोके महीयते ॥

॥ भगवानुवाच ॥

द्रव्याणां यावतां योनिः क्षितिरेव विधीयते ॥२५॥
किञ्च तेन न दतं स्याद्यःप्रय च्छति गां प्रियेः ॥
ममैषा प्रथमा मूर्तिरिति तस्याःफलं महत् ॥२६॥
करोटीगतमप्यम्मः क्षितौ गत्वा शुची भवेत् ॥
निवर्त्तनसहस्राढचामवनी सस्यशालिनी ॥ २७ ॥
शिवभक्ताय विप्राय दद्याच्छतमखो भवेत् ॥
ये हरन्ति महीं दत्तां स्वयं वाथ परेण वा ॥२८॥
दिव्यवर्षसहस्राणि रौरवे निवसन्त्यधः ॥
परमाक्षरजापेन प्राणायामशतेन च ॥२९॥
ध्यान धारण योगाच्च क्षितिहर्त्ता न शुध्यति ॥३०॥

॥देव्युवाच ॥

निवर्तन सहस्राढयामवनीं सस्यशालिनीं ॥
कथं दरिद्रा दास्यन्ति तदुपायं व्रवीहिमे ॥ ३१ ॥

॥ भगवानुवाच॥

गोचर्ममात्रां यदि गां यो ददाति शुचिस्मिते ॥
स भविष्यति सुव्यक्त मिन्द्रस्यार्द्धासनातिथिः ॥३२॥

॥ देव्युवाच ॥

गोचर्ममात्रामपिगां यदा दातुं न शक्यते ॥
तदा किन्तु दरिद्रेण कर्त्तव्यं जगताम्पते ! ॥३३॥

॥ भगवानुवाच ॥

शुचावुध्दृत्यमृद्भारं सुगन्धी कृत्य यत्नतः ॥

दद्या द्गुणवते नित्यं भूदान फलमाप्नुयात् ॥३४॥
एकच्छत्रां महीं कृत्वा महादेवाय शंभवे ॥
शिवभक्त द्विजेभ्यो वा दत्वा रूद्रसमो भवेत् ॥३५॥

॥ देव्युवाच॥

एकच्छत्रां वसुमतीं कथं दद्यात्पृथग्जनः ॥
तस्याः प्रतिनिधिंब्रूहि यथायान्ति परां गतिं ॥३६॥

॥भगवानुवाच ॥

प्रसवन्तीश्चं गान्दद्याद् बक्त्रोभयसुसंस्थितां ॥
पृथ्वी दानफलं ह्येतत्स्वर्गलोकाभिकांक्षिणा ॥३७॥
एकजन्मानुगाः सर्वे दानधर्मफलोदयाः ॥
गोमहीकनकानान्तु सप्तजन्मानुगाः प्रिये ॥३८॥

॥ देव्युवाच ॥

बालवृद्धातुरापाङ्गैर्भगवन् शक्यते कथम् ॥
उपवासत्रयं कर्त्तुन्तदुपायं च मे वद ॥३९॥

॥ देवदेव उवाच ॥

यः पृथ्वी भाजनं कृत्वा भुङ्क्ते पर्वसु यत्नतः ॥
अहोरात्रेण चैकेन त्रिरात्रफलमश्नुते ॥४०॥
एतदुक्तंमया देवि ! शक्ति ही नहिताय वै ॥
शक्तानान्तु भवेन्नैव विधिः सर्वत्र सुन्दरि ॥४१॥
हेमवर्णमजन्दत्वा शिवभक्त द्विजन्मने ॥
अग्निलोकमवाप्नोतिबहुपापात्मकोऽ पि सन् ॥४२॥
भूमिदानाद्भवेत्स्वर्गो रत्नदानाद्रवेःपुरं ॥
वस्त्रदः शशिलोकन्तु तारदोवैष्णवं पुरं ॥४३॥
तिलहेमप्रदातारो यान्ति रुद्रस्य चालयं ॥
कांस्यताम्रप्रवालानि दत्वेति वसुमन्दिरं ॥४४॥
दक्षयज्ञे तनुं त्यक्त्वा गिरिराजसुतोद्भवा ॥५॥
उग्रन्तपः समास्थाय मम पत्नीत्वमागता ॥
सा विलीना करङ्कस्था वर्षाणामयुतं धृता ॥६॥
रूष्टता भेदितः सो हि करङ्कस्तु सुमध्यमे ॥
सोममध्ये मया पश्चात् स्थापिताब्दायुतं पुरा ॥७॥
ततो निष्क्रम्य वेगेन निरालम्बेन चागता ॥
ततो निपत्य मेरोस्तु चतुर्दिक्षूदधिङ्गता ॥८॥
एषा गङ्गासमुत्पत्तिः कथिता हि वरानने ॥
न मया संहृतः शापो लोकानां हितकाम्यया ॥९॥
जम्बूफलरसाहाराः पद्मवर्णायुतायुषः ॥
जरारोगविहीनाः स्युरत्यन्तसुखिनो जनाः ॥१०॥
इलावृतं मयाप्युक्तं संक्षेपेण यशस्विनि ! ॥
रम्यकं सम्प्रवक्ष्यामि सर्वकामेषु रम्यकं ॥११॥
नीलस्योत्तरभागे तु श्वेतस्यैव तु दक्षिणे ॥
नीलोत्पलदलश्यामा रम्यकेप्लक्षभोजिनः ॥१२॥
द्वादशाब्दसहस्राणि तत्र जीवन्ति ते जनाः ॥
श्वेतस्योत्तरभागेन दक्षिणे श्रृङ्गवदिगरेः ॥१३॥
वर्षं हिरण्मयन्नाम यत्रते लकुचाशिनः ॥
त्रयोदशाब्दसाहस्रन्निवसन्ति शशिप्रभाः ॥१४॥
त्रिश्रृङ्गो चारुभिर्युक्तः समुद्रस्यतु दक्षिणे ॥
उत्तरेण तु श्रृङ्गेन जनास्तु कुरुसंज्ञकाः ॥१५॥
तेषां मणिमयी भूमिः सूक्ष्मकाञ्चनबालुका ॥
तत्र युग्मंप्रसुयेत युग्मं नश्येत सर्वदा ॥१६॥
अकाले मरणं नास्ति विशोकाः स्थिरयौवनाः ॥
कल्पवृक्षरसं पीत्वा सहस्राणि चतुर्दश ॥१७॥

प्रियङ्गुकलिकाश्यामा जीवन्त्यत्र सुखञ्जनाः ॥
कुरुर्नाम महावृक्षः पुण्यसिद्धनिषेवितः ॥१८॥
चन्द्रकान्तः कुलनगः सूर्यकान्तो द्वितीयकः ॥
एतानि भारताद्यानि संक्षेपात् कथितानि ते ॥१९॥
अग्नीध्रनवपुत्राणां वर्षंनाम्नैव चाङ्कितं ॥
दिक्षु किम्पुरुषोऽ ष्टासु युगावस्था न विद्यते ॥२०॥
भारतङ् किम्पुमान् वर्षं हरिवर्षं तृतीयकं ॥
मेरोर्दक्षिणतः प्रोक्ता नवसाहस्र विस्तराः ॥२१॥
उत्तरेणतु ये चान्ये नवसाहस्रविस्तराः ॥
इलावृतं चतुस्त्रिंशद् द्वात्रिंशत्पूर्वपश्चिमौ ॥२२॥
भद्रास्वकेतुमालौतु द्वावेतौ तुल्यनिर्मितौ ॥
नवसाहस्रमुत्सेधा हैमाद्या वर्षपर्वताः ॥२३॥
गन्धवन्माल्यवन्तौ च सहस्रैकन्तु विस्तर ॥
मेरोर्योजनलसन्तु नर्वेते वर्ष पर्वत! ॥२४॥
दिशश्चोक्ताश्चंतस्रस्तु ह्यार्धलक्षेणसम्मिताः ॥
लक्षयोजनविस्तीर्णो जम्बूद्वीपः प्रकीर्त्तितः ॥२५॥
लवणोदधिस्त्रिगुणस्तस्य वै लवणोदधेः ॥
पञ्चसाहस्रास्यान्तरेः उत्तरेण चतुर्द्वीपः ॥२६॥
योजनसहस्रमात्रः कामवृक्षफलाशिनः ॥
जना यत्र शशिप्रख्या जीवन्त्येते शतायुषः ॥२७॥
चत्वार्येव सहस्राणां योजनानां प्र विस्तरः ॥
महोदधेश्च वायव्ये दशसाहस्र विस्तरः ॥ २८॥
भद्रकालो भवेद्द्वीपः सर्वद्वन्द्व विवर्जितः ॥
जनायुतायुषस्तत्रा दिव्यामृतफलाशिनः ॥२९॥
पक्षच्छेदभयत्रस्ताः प्रविष्टाश्च महोदधिं ॥
ऋषभो दुन्दुभिर्दूवः पूर्वेणैव प्रविष्टकाः ॥३०॥
चन्द्रः कङ्कास्तयाद्रोण उत्तरेण प्रविष्टिकाः ॥
सोमकोषो वराहश्च नारदश्चैव पश्चिमे ॥३१॥
चक्रश्चैव तु मैनाको दक्षिणेन बलाहकः ॥
चक्रमैनाकयोर्मध्ये वडवाग्निस्तु संस्थितः ॥३२॥
अथ क्षारोदद्विगुणो बहिःस्थः पल्क्ष उच्यते ॥
शान्तोऽ भयः शिशिरश्च सुखदो नन्दिनः शिवः ॥३३॥

क्षेमकश्च शिवश्चेति सप्त मेधातिथेः सुताः ॥
तेषां नाम्ना तु निर्दिष्टा वर्षाः सप्त समासतः ॥३४॥
गोमेधश्चन्द्रकान्तश्च नारदो दुन्दुभिस्तथा ॥
सोमको ऋषभश्चैव वैभ्राजेतिकुलाद्रयः ॥३५॥
सुकृता चानुतप्ता च सुखी च सरितांवरा ॥
विपापा च क्रमूश्चैव त्रिदिवा कृतनासिका ॥३६॥
इत्येताः प्रतिवर्षन्तु नद्यः शैलाः पृथक् पृथक् ॥
पूर्वादारभ्य निष्क्रान्ता जना इन्द्रारसाशिन :॥३७॥
वृतश्चेक्षुरसोदेन खण्डः शर्करया सह ॥
चतुर्लक्षः शाल्मलीद्वीपो यत्र पुत्राश्चपुष्पतः ॥३८॥
श्वेतो लोहितजीमूता हरितो वैद्युतस्तथा ॥
मानसः सुप्रभश्चैव वर्षा नाम्नैव चाङ्किताः ॥३९॥
कुमुदो सुन्नतश्चैव वराहो द्रोणसंज्ञितः ॥
कङ्कश्च महिषश्चैव कुमुद्वान् सप्त वै नगाः ॥४०॥
यातितोयातितृष्णा च चन्द्रा शुक्रविमोचनी ॥
विवृता च विनिन्दा च सप्तैतास्तु सरिद्वरा :॥४१॥
मदालसाश्च घूर्णन्तो द्विगुणेन सुरोदकः ॥
परतस्तु कुशद्वीपो ह्यष्टलक्षः सुसंमितः ॥४२॥
ज्योतिष्मान् सप्त पुत्रांस्तु कुशद्वीपेऽभ्यसेचयत् ॥
उद्भेदो वर्षकश्चैव वेणुर्मण्डलसंज्ञितः ॥४३॥
रथाकारो लवणश्च द्युतिम्पञ्च प्रभाकर :॥
कपिलेति च राजानः सप्तैते वर्षसंज्ञकाः ॥४४॥
विद्युतो हेमनामा च द्युतिमान् पुष्पवास्तथा ॥
कुशेशायो हरिश्चैव मन्दरेति कुलाद्रयः ॥४५॥
मही च धूतपापा च शिवा च सरितांवराः ॥
पवित्राः सप्ततिश्चैव निम्नगाः शुभलक्षणाः ॥४६॥
द्युतिर्दभ्याति विख्याता नगेष्वेषु विनिःसृताः ॥
त्रिगुणेन घृतोदेन कुशद्वीपः समावृतः ॥४७॥
षोडशैव तु लक्षाणि क्रौञ्चद्वीपः प्रकीर्तित ॥
द्युतिमान्सप्तपुत्रस्तु क्रौञ्चद्वीपेभ्यषेचयत् ॥४८॥
सनोऽनुगोऽथ उष्णश्च पावनो ह्यन्धकारकः ॥
सनुर्दुन्दुभिवर्षञ्च कुशलेति क्रमात् स्थिताः ॥४९॥

क्रौञ्चोऽ थ वामनश्चैव अन्धकारो दिवावृतः ॥
विविन्दः पुण्डरीकश्च दुन्दुभिश्चेति सप्त वै ॥५०॥
पुण्डरी कौशिकी गौरी तपा चैव कुमुद्वती ॥
सन्ध्या रात्रिश्च ख्यातिश्च सप्तैताः परिकीर्तिताः ॥५१॥
एता एव महानद्यः सप्तभ्यः सप्त निर्गताः ॥
द्राक्षोदर्विभुजो लोकास्तथा च दधिभोजनाः ॥५२॥
नरनारी समाकीर्णाः सर्वकामसुखोदिताः ॥
द्विगुणेन तु दध्योदः क्रौञ्चद्वीपः समावृतः ॥५३॥
क्रौञ्चद्विगुणतः शाको लक्षद्वात्रिंशविस्तरः ॥
हव्यराजसुताः सप्त शाकद्वीपेऽ भिषिक्तकाः ॥५४॥
जनदश्च कुमारश्च सुकुमारो मणीचकः॥
कुमुदो ह्युन्नतश्चैव महाभद्रेतिकीर्तितः ॥५५॥
तेषां नाम्ना तु ते वर्षा अङ्किताश्च स्वनामभिः ॥
उदयः केशरी चैव जठरोशस (डंथस) नैर्ऋतः ॥५६॥
श्यामाम्बिकेयो मेरुश्चशैलाः सप्त प्रकीर्तिताः ॥
गभती सुकुमारी च कुमारी नलिनी तथा ॥५७॥
वेणुका तु तथैवेक्षुवेणुकेति सरिद्वराः ॥
क्षीराशिनः फलाहाराः सर्वऋद्धिसमन्विताः ॥५८॥
कीडन्ति दिव्यनारीभिर्जरारोगविवर्जिताः ॥
क्षीरोदेनावृतो ह्येष पुष्करं परतः श्रृणु ॥५९॥
सवनस्य सुतौ द्वौ तु महावीर्य च धातकिः ॥
पञ्चविंशसहस्राणि विस्तीर्णो मानसोत्तरः ॥६०॥
उच्छ्रयाद् द्विगुणः सोऽ द्रिर्मध्ये च वर्षयोर्द्वयोः ॥
शशीन्द्रगुणप्राशान्नां चतुर्णां मानसे पुरी ॥६१॥
विश्वौकसा संयमनी सुखा देवि विभावरी ॥
बहिरेव महावीतो धातक्याभ्यन्तरेण तु ॥६२॥
ईर्ष्याभिर्मृगतृष्णाभिरीतिभिश्च विवर्जिताः ॥
सर्वत्र सुखिनस्तत्र तस्मिन् वर्षद्वये जनाः ॥६३॥
पुष्करस्त्रिगुणेनैव वृतः स्वादूदकेन तु ॥
स्वादूदकान्तो भूर्ल्लोकः संक्षेपेण तु वर्णितः ॥६४॥
कोटित्रयप्रमाणेन लक्षैकाशीतिचाधिकं ॥
हिरण्मयी द्विगुणाभूर्लोकालोको यतः स्थितः ॥६५॥

विंशत्साहस्रविस्तार उच्छ्र्याच्च दशाहत: ।
सविताार्द्धन्तु तपसोऽ परश्चार्ध्देन तापयेत् ॥६६॥
विराजोऽ थ सुधारू: च शंखनात्कर्दमस्तथा ॥
हिरण्यरोमा पर्जन्य: केतुमानुषजेति च ॥६७॥
लोकालोकोपरिष्टात्तु सवितुर्दक्षिणायनं ॥
तथोत्तरायणन्तत्र उत्तरेण प्रकीर्तितम् ॥६८॥
अर्द्धरात्रोऽ मरावत्या: अष्टमेति यमस्य च ॥
मध्यान्ह एव वारुण्यां सोमपुर्यादय: स्मृता: ॥६९॥
तदिन्द्रस्यामरावत्यामुत्तिष्ठन् स तु दृश्यते ॥
मध्यान्हे सोमपुर्यान्तु आदित्यस्य गतागति: ॥७०॥
सुवीथी उत्तरे तस्य अजवीथी च दक्षिणे ॥
पितृदेववीथिकैषा परितस्तु तत: स्मृता ॥७१॥
भूर्ल्लोकस्तु स विख्यातो ह्यत ऊर्ध्वस्तु व: श्रृणु ॥
दशवायुपथन्देवि ! अयुतान्तरमन्तरे ॥७२॥
प्रथमेऽ निलमार्गेऽ भ्रास्त्रिविधास्तत्र संस्थिता: ॥
धूमजा ब्रह्मजाश्चैव पक्षजा च महावला: ॥७३॥
धूमजा: स्युरिमे मेघास्ते वर्षन्तीह योजने ॥
ब्रह्मनिश्वासजा ये तु द्रोणवर्षा द्वियोजने ॥७४॥
छिन्नपक्षा महामघा महासम्प्लवकारका: ॥
युगक्षये समुत्पन्ने प्रलये सर्वदेहिनां ॥७५॥
ब्रह्मदीनां विनाशेतु वर्षन्तीहमहाघना: ॥
द्वितीये पथि सुन्दर्यामग्निका कन्यमातर: ॥७६॥
वसन्ति सगणोपेता रुद्रशंख्यास्त्वधिष्ठिता: ॥
तृतीये पथि तिष्ठन्ति सम्यक् संसिद्ध धारणा: ॥७७॥
समन्ताद्भोगसंसिध्दा: सर्व सिद्धैरधिष्ठिता: ॥
चतुर्थे पथि तिष्ठन्ति निशिता देवतायुधा: ॥७८॥
नाराचधनुश्चक्राद्यास्त्रिशूलशक्तितोमरा: ॥
पञ्चमे पथिपद्माक्षि! वसन्त्यैरावतादय: ॥७९॥
ऐरावताञ्जनश्चैव वामनश्च महागजा: ॥
सुप्रतीक: सुरेन्द्रश्च पुष्पदन्तस्तथैव च ॥८०॥
कुमुद: पुण्डरीकश्च सार्वभौमेति चाष्टम: ॥
दिग्गजा इति विख्याता: खदेशे तु व्यवस्थिता: ॥८१॥

षष्ठे वायुपथे चैव पक्षिराजो महाबलः ॥
गरुत्मानिती विख्यातः दुर्जयो विनतासुतः ॥८२॥
सप्तमे व्योमगङ्गा तु नानाजलधराकुला ॥
पुण्या पुण्योदका पाण्डुर्वहन्ती विमलोदका ॥८३॥
अष्टमे वृषराजस्तु सुपत्नीकः सुनन्दनः ॥
वसत्यत्राप्रतीघातो धर्म्मः प्रत्यय एव सः ॥८४॥
नवमे वायुमार्गे तु दक्षोनाम प्रजापतिः ॥
ब्रह्मैव सततं साक्षाद् ब्रह्मशक्तया त्वधिष्ठितः ॥८५॥
दशमे बायुमार्गेऽस्मिन्नादित्यः सम्प्रतिष्ठितः ॥
नवसाहस्त्र विस्तारो द्विगुणश्चैव मण्डलः ॥८६॥
तपत्यादित्यरूपेण परमात्मा शिवोऽव्ययः ॥
सप्ताश्वः सप्त सामानि षडङ्गसपदक्रमाः ॥८७॥
ऋग्यजूंषि रथन्तस्य क्रतुश्चक्रः प्रकीर्त्तिताः ॥
सत्यसारो वायुजवः सर्वतेजःसमन्वितः ॥८८॥
नागा योक्त्राणि तस्यैव अरुणश्चैव सारथिः ॥
आदत्ते येन भूतानि आदित्यस्तेन स स्मृतः ॥८९॥

एवमेव भुवर्ल्लोको दशवायुसमन्वितः ॥
अत ऊर्ध्वं प्रवक्ष्यमि स्वर्ल्लोकोऽयं प्रकीर्तितः ॥९०॥
आदित्याद् द्विगुणेनैव सोमस्य परिकीर्तितः ॥
सोमात्तु द्विगुणेनैव स्थितस्त्वङ्गारको महान् ॥९१॥
तस्यापि द्विगुणे नैव सोमपुत्रो बुधः स्थितः ॥
बुधाच्च द्विगुणेनैव संस्थितश्च बृहस्पतिः ॥९२॥
तस्यापि द्विगुणेनैव शुक्रश्चोपरि संस्थितः ॥
द्विगुणश्च तथा शुक्रात्संस्थितश्च शनैश्चरः ॥९३॥
तस्यापि द्विगुणेनैव राहुस्तिष्ठति दर्पितः ॥
द्विगुणेन स्थितः केतुः केतोर्नक्षत्रमण्डलं ॥९४॥
तस्यापि द्विगुणेनैव संस्थितमृषिमण्डलं ॥
नामानि तेषांवक्ष्यामि ऋषीणाम्मण्डलासिनां ॥९५॥
विश्वामित्रो जमदग्निर्गौतमश्च तृतीयकः ॥
भारद्वाजस्तथात्रिश्च वशिष्ठो वत्ससप्तमः ॥९६॥
ध्रुवः सन्तिष्ठते चोर्ध्वं द्विगुणादृषिमण्डलात् ॥
उत्तरश्च हनुं स्वस्य ऋषिश्चोत्तानपादकः ॥९७॥
अधरे यज्ञमेवाहुर्धर्मस्तस्य शिरः स्थितः ॥
पादयोरश्विनौ साध्या विभुश्च हृदयेस्थितः ॥९८॥
पूर्वपादौ स्मृतावेतौ वरुणो यमपश्चिमौ ॥
संवत्सरः स्मृतः शिश्ने मित्रोऽपाने तथैव च ॥९९॥
अग्निर्महेन्द्रोपस्थे तु मरीचिः कश्यपो ध्रुवः ॥
आदित्यादिर्ध्रुवान्तश्च स्वर्ल्लोकः परिकीर्तितः ॥१४००॥
तत्रैव देवराजस्तु महेन्द्रः प्रतितिष्ठति ॥
ऋषिदेवैः सुगन्धर्वैर्वृतः क्रीडति साप्सराः ॥१॥
अग्निहोत्रं क्रतुञ्चापि कृत्वा ज्ञानविवर्जिताः ॥
स्वर्ल्लोकन्तु नरा यान्ति पुनर्जायन्ति मानुषा ॥२॥
महर्ल्लोकम्प्रवक्ष्यामि स्वर्ल्लोकाद् द्विगुणोद्धतः ॥
ऋषयश्चैव सिद्धाश्च मार्त्तण्डाद्या वसन्ति वै ॥३॥
द्विगुणोर्ध्वे जनस्तस्मादृषयस्तत्र संस्थिताः ॥
एकपादोऽथ जन्ह्नुश्च कपिलश्चासुरिस्तथा ॥४॥

सौतिकोवाङ् बलिश्चैव जनलोकनिवासिनः ॥
द्विगुणन्तु तपोज्ञेयं ऋषयो यत्र संस्थिताः ॥५॥
सनत्कुमारः सनकः सनन्दश्च सनातनः ॥
शङ्कुश्चैव त्रिशङ्कुश्च तपोलोकनिवासिनः ॥६॥
पद्मानि षट् पञ्च शतानि कोट्यो लक्षन्तथा विंशतिसंख्यया तु ॥
भूर्ल्लोकतो यद्भवेत्सत्यमेतत्प्रमाणं हि बदन्ति सम्यक् ॥७॥
तपोद्विगुणतः सत्योयत्र ब्रह्मा स्वयं स्थितः ॥
क्रीडते भगवान् देवो वृतः स्वात्मविदैर्द्विजैः ॥८॥
धर्मध्यानेन संसिद्धा अद्वैतब्रतिनिष्ठिताः ॥
आनन्दपदसम्प्राप्ता आनन्दपदसङ्गताः ॥९॥
ऋग्वेदो मूर्तिमांस्तत्र इन्द्रनीलसमद्युतिः ॥
दिव्यगन्धानुलिप्ताङ्गो दिव्याभरणभूषितः ॥१०॥
ब्रह्मणः पूर्वतस्तस्य दीप्यमानः स्वतेजसा ॥
उत्तरेण यजुर्वेदः शुद्धस्फटिकसप्रभः ॥११॥
दिव्यकुण्डलधारी च महाकायो महाभुजः ॥
स्थितः पश्चिमदिग्भागे सामवेदः सनातनः ॥१२॥
रक्ताम्बरधरः श्रीमान् पद्मरागसमप्रभः ॥
स्रग्दाम वक्षसा बिभ्रल्लम्बभूषणभूषितः ॥१३॥
अथर्वाख्योऽञ्जनश्यामः स्थितो दक्षिणतस्तथा ॥
पिङ्गाक्षो लोहितग्रीवो हरिकेशो महातनुः ॥१४॥
इतिहासः षडङ्गानि पुराणान्यखिलानि च ॥
वेदोपनिषदश्छन्दांस्युपवेदास्त्वरण्यकाः ॥१५॥
स्वाहाकारो वषट्कारो रहस्यानि तथैव च ॥
गायत्री च तथा तस्मिन् यत्र देवश्चतुर्मुखः ॥१६॥
ब्राह्मणान्यर्चयिष्यन्ति तेऽत्र यान्ति महात्मनः ॥१७॥
इति शिवधर्मसङ्ग्रहे एकादशोऽध्यायः ॥११॥

लोकान्तराणि

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मसङ्ग्रहे

द्वादशोऽध्यायः

ॐ नमः शिवाय

॥ ऋषय ऊचुः ॥

महर्ज्जनस्तपस्सत्यो भूतो भव्यो भवत्तथा ॥
उक्ता ह्येते त्वया लोका लोकानामुत्तराणि च ॥१८॥
लोकान्तरञ्च यादृग्वा तन्नो ब्रूहि किमस्य यत् ॥
तेषां तद्वचनं श्रुत्वा ऋषीणामूर्ध्वरेतसां ॥१९॥
स वायुर्दृष्टतत्वार्थ इदन्तत्वमुवाच ह ॥

॥ वायुरुवाच ॥

न ते तर्केण पश्यन्ति योगंप्रत्यक्षदर्शिनः ॥२०॥
प्रत्याहारेण ध्यानेन तपसा च कृतात्मनः ॥
क्रतुसन्तकुमाराद्याः सम्बद्धाः शुद्धबुद्धयः ॥२१॥
व्यपेतशोकविमलाः शान्ता ब्रह्मेव सम्मताः ॥
अक्षयाः प्रीतिसंयुक्ता व्रते तिष्ठन्ति योगिनः ॥२२॥
ऋषयो बालखिल्याद्यास्तैर्यथा कृतमीश्वरैः ॥
पन्थाश्चैव मयादृष्टः सान्निध्यन्तत्र कुर्वता ॥२३॥
अनूह्यमकृतार्थानामालयश्चेश्वरस्य च ॥
ईश्वरः परमाणुत्वाद् भावग्राह्यो मनीषिणां ॥२४॥
ज्ञानवैराग्यमैश्वर्यं तपः संत्यं क्षमा धृतिः ॥
श्रेष्ठत्वमात्मसम्बोधमधिष्ठातृत्वमेव च ॥२५॥
अव्यानि दशैतानि तस्मिंस्तिष्ठन्ति शङ्करे ॥
विभुत्वात्खलु योगाग्निब्राह्मणानुग्रहे रतः ॥२६॥
सकला विग्रही भूत्वा साहार्यमनुतिष्ठति ॥
अक्षयं ध्रुवमव्यग्रमष्टमत्वापवर्गिकं ॥२७॥
तस्येश्वरस्य तस्मा त्तु स्थानं मायामयं पुरं ॥
माययाकृतमाचष्ट मायादेवो महेश्वरः ॥२८॥

यया वै मायया लोकं सम्मोहयति स प्रभुः ॥
देवानामुपसंहारस्तत्पुराणेषु कीर्त्यते ॥२९॥
विस्तरेणानुपूर्व्या च गदतो मे निबोधत ॥
त्रयोदशैव कोटचस्तु नियुता दशपञ्च च ॥३०॥
भूर्ल्लोकाद् ब्रह्मलोको वै योजनैः सम्प्रकीर्त्यते ॥
एका योजनकोटी च पञ्चाशन्नियुतानि च ॥३१॥
ऊर्ध्वं भगवतोऽण्डाच्च ब्रह्मलोकात्परे स्मृता ॥
एषोर्ध्वगः प्रचारस्तु गन्तव्यश्च ततः स्मृतः ॥३२॥
नित्यो ह्यपरिसंख्याताः परस्परगुणाश्रयाः ॥
सूक्ष्माः प्रसवधर्मिण्यस्तत्र प्रकृतयः स्थिताः ॥३३॥
योऽन्योऽधिकर्त्ता संजज्ञे क्षेत्रज्ञो ब्रह्मसंज्ञितः ॥
तास्वप्रतिमसूक्ष्मासु अधिष्ठातृव्यमव्ययः ॥३४॥
उत्पाद्यपरमन्ध्यान्यः परमाणुः परेशयः ॥
अक्षयश्चेतनोऽनन्तस्त्वन्मूर्त्तिर्मूर्त्तिमानसः ॥३५॥
प्रादुर्भावस्थितो भावः स्थिरश्चैवाप्यनुग्रहैः ॥
विभुरन्यैरनौपम्यः परमाणुर्महेश्वर ः ॥३६॥
स तेज एकस्तमयो यः पुरस्तात्प्रकाशकः ॥
यदण्डमासीत्सौवर्णं प्रथमं त्वापवर्गिकं ॥३७॥
बृहत्तत्सर्वतो वृत्तमीश्वरात्तद् व्यजायते ॥
ईश्वराद् बीजनिर्भेदः क्षेत्रज्ञो बीजमिष्यते ॥३८॥
योनि प्रकृतिमाचष्टे सा च नारायणात्मिका ॥
विभुत्वाल्लोकसृष्ट्यर्थं लोकसंस्थार्थमेव च ॥३९॥
सन्निसर्गे स्थित्वत्वाच्च लोकधातुर्महात्मनः ॥
पुरस्ताद् ब्रह्मलोकस्य अण्डाधस्ताच्च वै द्विजाः ॥४०॥
तयोर्मध्ये पुरं दिव्यंमतिग्राह्यं मनोरमं ॥
यद् विग्रहवतः स्थानमीश्वरस्यामितौजसः ॥४१॥
शिवनाम पुरन्तत्र शरणं जन्मभीरुणां ॥
सहस्राणां शतं पूर्णं योजनानां द्विजोत्तमाः ! ॥४२॥
अभ्यन्तरास्तु विस्तीर्णं महीमण्डलसंस्थितं ॥
मध्यान्हार्कप्रकाशेन पुरतेजोऽभिमर्दिना ॥४३॥
शातकौम्भेन महता प्राकारेण सुवर्चसा ॥
द्वारैश्चतुर्भिः सौवर्णैमुक्तादाम विभूषितै ः ॥४४॥
तपनीयनिभैः शुभ्रैर्गाढसुकृतवेष्टनं ॥

तच्चाकाशे पुरं रम्यं दिव्यघण्टानिनादितं ॥४५॥
न तत्र क्रमते मृत्युर्न्न तमो न जराश्रयः ॥
न तदन्यैः पुरवरैरुपमां सोढुमर्हति ॥४६॥
सहस्राणां शतं पूर्णं योजनानां दिशो दश ॥
तत्पुरं गोवृषाङ्कस्य तेजसा व्याप्य तिष्ठति ॥४७॥
भावेन मनसा भूमिर्विन्यस्ता कनकामयी ॥
रत्नबालुकया तत्र विन्यस्तासु शुभोधिकं ॥४८॥
शरदिन्दुप्रकाशानि बालसूर्यनिभानि वै ॥
अर्धश्वेतार्धरक्तानि सौवर्णानि तथैव च ॥५०॥
रथचक्रप्रमाणानि बालैर्मरकतप्रभैः ॥
सौकुमार्येण रूपेण गन्धेनाप्रतिमेन च ॥५१॥
तत्र दिव्यानि पद्मानि वनेषूपवनेषु च ॥
भृङ्ग पुत्रनिकाशानि तपनीयमयानि च ॥५२॥
अर्धकृष्णार्धरक्तानि कुसुमारतराणि च ॥
आतपत्रप्रमाणानि पङ्कजैः सुभृतानि च ॥५३॥
आर्द्रकुष्टसुन्धीनि तत्रोत्पलवनानि च ॥
भूयः सप्त महानद्यस्तासान्नामानि मे श्रृणु ॥५४॥
वरा वरेण्या वरदा वराहा वर वर्णिनी ॥
वरणा वरभद्रा च रम्यास्तस्मिन् पुरोत्तमे ॥५५॥
पद्मोत्पलदलोन्मिश्रं हेम्नोर्म्यावृत्तिविग्रहं ॥
जलं मणिदलप्रख्यं ता वहन्ति सरिद्वरा ॥५६॥
ब्रह्मर्षयो न देवाश्च नासुराः पितरस्तथा ॥
न खल्वल्पेऽप्रमेयस्य विदुरीशस्य तत्पुरं ॥५७॥
तत्र ये ध्यानयोगस्थाः सुसंयुक्ता जितेन्द्रियाः ॥
पश्यन्ति हि महात्मानः पुरन्तत्पदमात्मनः ॥५८॥
मध्ये पुरवरेन्द्रस्य तस्याप्रतिमवर्चसः ॥
सुमहान् मेरुसङ्काशो दिशा भद्रश्रियावृतः ॥५९॥
सहस्रपादः प्रासादस्तपनीयमयः शुभः ॥
अनौपम्येतरै रत्नैः सर्वतः सुविभूषितः ॥६०॥
स्फटिकैश्चन्द्रसङ्काशैर्वैदूर्यैर्व्योमसन्निभैः ॥
बालसूर्यप्रवालाभैः सौवर्णैश्चाग्नि सप्रभैः ॥६१॥
राजतैश्चापि सुशुभैरिन्द्रनीलमयैस्तथा ॥
दृढैर्वज्रमयैर्नित्यं दिव्यैस्तैः सुसमाहितैः ॥६२॥

जलैश्च विविधाकारैर्दीप्यभ्दिरिव भासितं ॥
चन्द्ररश्मिप्रकाशाभिः पताकाभिरलङ्कृतं ॥६३॥
रुक्मघण्टानिनादैश्च नित्यप्रमुदितोत्सवं ॥
किन्नराणामधीवासैः सन्ध्याभ्राकार सन्निभैः ॥६४॥
परिवारितं समन्ताद्वै हेमपुष्पोपमैर्द्रुमैः ॥
यथैभिर्मेरुशैलेन्द्रो हैमौः श्रृङ्गैर्विराजते ॥६५॥
चामीकरमयीभिस्तु पताकाभिस्तथा पुरं ॥
एवं प्रासादराजोऽसौ भूषिताभिर्विराजते ॥६६॥
प्रासाद एष घनकाल इवाविभाति
धूमोभ्दवैर्जलधरैः श्रियमाविभर्ति ॥
वातोद्धतध्वजशतैश्च तडिद्विलासां ॥
माणिक्यभालकिरणैर्हरि चापलेखां ॥६७॥
तस्याः प्रतिमया यस्य त्र्यम्बकस्य निवेशने ॥
लक्ष्मीः श्रीश्च वपुर्म्माया कीर्तिः शोभा सरस्वती ॥६८॥
देव्या तु सहिता ह्येता जगद्धात्र्या समन्विताः ॥
भूषणं सर्वरत्नानां यान्त्यः कान्तिविलासयो : ॥६९॥
कोटिशस्ता महाभागा विभज्यात्मानमात्मना ॥
भगवन्तम्महात्मानं प्रतिमोद्यन्त्यतन्द्रिता : ॥७०॥
तास्ताः सहस्रशश्चान्याः पृष्ठतः परिचारिका : ॥
रुपिण्यश्च श्रिया युक्ताः सर्वाः कमललोचना : ॥७१॥
लीलारेचकसंयुक्तैर्भावैरतिमनोहरै : ॥
गणैस्तैः सह मोदन्ते शैलाभैः पावकोपमै : ॥७२॥
कुहु (ब्ज) वामनिकाश्चैवं वरगात्र्यो हयाननाः ॥
कुण्डाश्च विकटाश्चैव करालाश्चिपिटाननाः ॥७३॥
लम्बोदरा ह्रश्वभुजा विनता ह्रस्वजानुकाः ॥
मृगेन्द्रवदनाश्चान्या नानावक्त्रोदरास्तथा ॥७४॥
ह्याननास्तथैवान्याः सिंहर्क्षवदनाः पराः ॥
लोहितास्या महास्तन्य : शुभाङ्ग्यश्चारुमूर्द्धजाः ॥७५॥
प्रसङ्कुचितकेशाश्च सुन्दर्यः प्रियदर्शनाः ॥
अन्याश्च कामरूपिण्यो नानावेषधराः स्त्रियः ॥७६॥
अभ्यन्तर परिस्कन्धो देवावासगृहोचिता : ॥
रमते भगवांस्तत्र दशबाहुर्महेश्वर : ॥७७॥
नन्दिना च गणैः सार्धं विश्वरुपैर्महात्मभिः ॥

तथा रुद्रगणैश्चापि तुल्योदरपराक्रमै : ॥७८॥
पावकात्मजसङ्काशैरीषद्दृष्टोत्कटाननै : ॥
वन्द्यमानोऽर्च्यमानश्च पूज्यमानश्च तत्परै : ॥७९॥
सर्वर्त्तुकुसुमापीडं जिघ्रमानोरसि स्थितं ॥
नीलोत्पलवरश्यामं पृथुताम्रायतेक्षणं ॥८०॥
ईषत्कराललंम्बोष्ठं तीक्ष्णदंष्ट्रं जगद्धितं ॥
षडर्धतेजोदुष्प्रेक्ष्यं रुचिरंचीरवाससं ॥८१॥
आलवेस्मपरिल्किष्टं देवानामरिनाशनं ॥
बाहुना बाहुमावेश्य पार्श्वे सव्येतरे स्थितं ॥८२॥
रराज पट्टिशस्तस्य वामाग्रकरगोचरं ॥
महाभैरवनिर्घोषं बलेनाप्रतिमौजसं ॥८३॥
दशार्धबाणाञ्च धनुर्विचित्रं शोभतेऽधिकं ॥
त्रिशूलं विद्युदाभासममोघं शत्रुनाशनं ॥८४॥
जाज्वल्यमानं वपुषा परशुः सूर्यसन्निभः ॥
असिश्चैवोजसा श्रेष्ठः शीतरश्मिः शशी यथा ॥८५॥
तेजसा वपुषा कान्त्या देवेशस्य समीपतः ॥
शोभन्तेऽभ्यधिकतन्त्र बेद्यामग्निशिखा इव ॥८६॥
स्थितः पुरस्ताद् देवस्य शातकुम्भमयो महान् ॥
शुशुभे रुचिरः श्रीमान् सोदकश्च कमण्डलु : ॥८७॥
असिंमावेश्य चाङ्गेऽस्मिन् पाण्डुराम्बरधारिणी ॥
उरश्छदेन महता मौक्तिकेन विराजता ॥८८॥
चतुर्भुजा महाभागा विजयालोकसम्मता ॥
देव्या हाम्यो प्रतीहारी श्रीरमाप्रतिमा पुरा ॥८९॥
विभ्राजन्ती स्थिता चैव कृत्वा देवस्य साऽञ्जलिं ॥
तस्याः पृष्ठानुगाश्चान्याः स्त्रियश्चाप्सरसाङ्गणाः ॥९०॥
ताः खल्वभिनयैः कान्तैरुपतिष्ठन्ति शङ्करं ॥
सर्वलक्षणसम्पन्ना वादित्रैरुपबृंहिताः ॥९१॥
उपगायन्ति देवेशं गणा गन्धर्वयोनयः ॥
अभ्युन्नतमहोरस्कः शरन्मेघसमद्युतिः ॥९२॥
शोभते नर्द्दमानश्च गोपतिस्तस्य वेश्मनि ॥
स्कन्दश्च सपरीवारः पुत्रोऽप्रतिमवीर्यवान् ॥९३॥
रक्ताम्बरधरः श्रीमान् वराम्बुजदलेक्षणः ॥
तस्य शाखो विशाखश्चनैगमेशश्च पृष्ठतः ॥९४॥

व्यपेतव्यसनाः शूराः सत्यव्रतपरायणाः ॥
तैः सार्द्धं सुमहावीर्यः शैलारिः शिखिवाहनः ॥९५॥
बालक्रीडनकैस्तत्र क्रीडते विश्वतोमुखः ॥
ये नृपा विबुधेन्द्राणां काञ्चनस्य प्रदायिनः ॥९६॥
ये च स्वायतना विप्रा गृहस्था ब्रह्मवादिनः ॥
गूढंस्वाध्यायतपसस्तथा चैवाच्छबृत्तयः ॥९७॥
एते सभासदस्तस्य देवेशस्यैव सम्मताः ॥
मन्वन्तरमधिष्ठाय प्रच्यवन्ति पुनः पुनः ॥९८॥
श्रूयतां देवदेवस्य भवस्याश्चर्यमुत्तमं ॥
शतानि शतसूर्याणां ये वहन्ति रथोत्तमं ॥९९॥
व्याघ्राश्चैवानुगास्तत्रं काञ्चनाभास्तरस्विनः ॥
स्वच्छन्दचारिणः सर्वे स्वयं देवेन निर्मिताः ॥१००॥
मृत्योर्मृत्युसमास्तत्र यमदर्पापहारिणः ॥
विभूतिमप्रसंख्येयां को नु खल्वभिधास्यति ॥१०१॥
अतः परमिदं भूयो भवेनाद्भुतमुत्तमं ॥
भूतानामनुकम्पार्थं यत् कृतन्तन्निबोधत ॥१५००॥
मन्दरादिप्रकाशानां बालेनाप्रतिमौजसां ॥
हारकुन्देन्दुवर्णानां विद्युद्घननिनादिनां ॥१॥
सुदीर्घाङ्गुलिकेशानामतीव क्रुद्धचेतसां ॥
द्रंष्ट्रोत्कट महास्यानां महाविक्रमशालिनां ॥२॥
चूडामणिपराणाञ्च मेघसन्निभवाससां ॥
श्रीवत्साङ्कुशवज्राणामृजुलाङ्गूलधारिणां ॥३॥
एतादृशानांदिव्यानां रुपेणोत्तरशालिनां ॥
तस्य प्रासादराजस्य स्तम्भेषूत्तमशोभिषु ॥४॥
संयम्याग्निमयीभिस्तु शुण्डा(शूरा)लाभिः पृथक् पृथक् ॥
मायासहस्रसिंहानां सुखन्तत्र निवासिनां ॥५॥
स्तम्भेष्वमाश्रितं दृष्ट्वात्र्यम्बकस्य निवेशने ॥
अतोऽर्थं प्रतिसम्पूज्य वायोर्वाक्यात्सुविस्मिताः ॥६॥
ऋषयः प्रत्यभाषन्त नैमिषीयास्तपश्विनः ॥
भगवन् ! सर्वभूतानां प्राण ! सर्वत्रग ! प्रभो ! ॥७॥
के ते सिंहा महात्मानः कुतोत्पन्ना : किमात्मजाः ॥
सिंहाः केनापराधेन भूतानां प्रभविष्णुना ॥८॥
बैश्वानरमयैः पाशैः सन्निरुद्धाः पृथक् पृथक् ॥

तेषां तद् वचनं श्रुत्वा वायुर्वाक्यञ्जगाद ह ॥९॥
यत् तत् सहस्रं सिंहानामीश्वरेण महात्मना ॥
व्यपनीय स्वकाद्देहात् क्रोधात्ते सिंहविक्रमाः ॥१०॥
भूतानामभयन्दत्वा पुरा बद्धाग्निबन्धनैः ॥
यज्ञभागे निमित्तञ्च इश्वरस्याज्ञया तदा ॥११॥
तस्माद् बन्धाद्विमुक्तेन सिंहेनैकेन लीलया ॥
देव्या मन्युकृतं ज्ञात्वा हतो दश्चस्य सक्रतुः ॥१२॥
मन्युना चोमया कायान्महाकाली महेश्वरं ॥
आत्मनः सर्वसाक्षिण्योऽवसन्सार्धं महानुगैः ॥१३॥
स एव भगवान् क्रोधः प्रेतवासकृतालयः ॥
वीर भद्रोऽप्रमेयात्मा देव्या मन्युप्रमार्जनः ॥१४॥
तस्य वेश्मवरेन्द्रस्यादिशा भद्रस्य कृत्स्नशः ॥
सन्निवेशस्त्वनौपम्यो मया पूर्वं प्रकीर्त्तितः ॥१५॥
अतः परंप्रवक्ष्यामि ये तत्र पुरवासिनः ॥
रम्ये पुरवरे श्रेष्ठे तस्मिन् वैहास्यचुम्बिषु ॥१६॥
नानारत्नविचित्रेषु पताकाबहुलेषु च ॥
सर्वकामसमृद्धेषु वनोपवनशोभिषु ॥१७॥
राजतेषु महान्तेषु शातकुम्भमयेषु च ॥
सन्ध्याम्बुदनिकाशेषु कैलासप्रतिमेषु च ॥१८॥
शब्दैः शब्दादिभिर्भोगै र्ये भवस्यानुचारिणः ॥
प्रासादवरमुख्येषु तेषु मोदन्ति सुव्रताः ॥१९॥
अतोरता (अनाहता) ब्रह्मघोषाः कथाश्च विविधाः शुभाः ॥
गीतवादित्रघोषाश्च सप्तवाञ्चाः समञ्जसाः ॥२०॥
सप्रहासाश्च तुमुला नानाश्रमक्रियास्तथा ॥
एवमादीनि वर्तन्ते तेषां प्रासादमूर्धसु ॥२१॥
श्रुत्वा चैव प्रतीज्ञानां कथामन्यैर्महात्मभिः ॥
तत्र ये ध्यानमव्यग्राः सुसंयुक्ता जितेन्द्रियाः ॥२२॥
पश्यन्ति हि महात्मातं पुरन्तद्गोवृषात्मनः ॥
मध्ये पुरवरेन्द्रस्य तस्याप्रतिमवर्चसः ॥२३॥
सुमहान्मेरुसङ्काशो दिशाभद्रश्रियान्वितः ॥
सहस्रापादः किरणैस्तपनीयमयः शुभः ॥२४॥
अनौपम्यतरै रत्नैः सूर्यायुतप्रकाशिभिः ॥
स्फटिकैश्चन्द्रकान्ता भै वैंदूर्यैर्मणिसप्रभैः ॥२५॥

बालसूर्यप्रवालाभिः सौवर्णैश्चाग्निसप्रभैः ॥
चुक्रुशुर्ऋषयो हृष्टा नैमिषेयास्तपस्विनः ॥२६॥

॥ ऋषय उचुः ॥

किन्तु तत्र (केते) महात्मानो ये भवस्यानुचारिणः ॥
अनुग्राह्यतमाः सम्यक् प्रमोदन्ते पुरोत्तमे ॥ २७ ॥
ऋषीणां वचनं श्रुत्वा वायुर्वाक्यमुदीरयत् ॥
श्रूयतां देवदेवस्य भक्तिर्येष्वनुकम्पना ॥ २८ ॥
ह्रीमन्तश्चार्जवा दान्ताः शौचेदक्षा ह्यलोलुपाः ॥
मेध्याहाराल्पमात्राश्च आत्मारामा जितक्लमाः ॥ २९ ॥
जितद्वन्दाः महोत्साहाः सौम्या विगतमत्सराः ॥
भावस्थाः सर्वभूतानामव्यापारा जितेन्द्रियाः ॥३०॥
मनसा कर्मणा वाचा विशुद्धेनान्तरात्मना ॥
अनन्यमनसो भूत्वा प्रपन्ना ये महेश्वरं ॥३१॥
तैर्ल्लब्धं रुद्रसायुज्यं शाश्वतं पदमव्ययं ॥
भवस्य रूपसादृश्यं लीला चैवाप्यनुत्तमाः ॥३२॥
वैश्वानरमुखाः सर्वे विश्वरूपाः कपर्दिनः ॥
नीलकण्ठाः शितग्रीवास्तीक्ष्णदंष्ट्रास्त्रिलोचनाः ॥३३॥
अर्द्धचन्द्राः कृतोष्णीषा जटामुकुटधारिणः ॥
सर्वे दशभुजा वीराः पद्मस्रगनुबन्धिनः ॥३४॥
तरुणादित्यसङ्काशाः सर्वे ते नीलवाससः ॥
पिनाकपाणयः सर्वे श्वेतगोवृषवाहनाः ॥३५॥
श्रियान्विताः कुण्डलिनो मुक्ताहारैर्विभूषिताः ॥
तेजसाभ्यधिका देवैः सर्वज्ञाः सर्वदर्शिनः ॥३६॥
विभज्य बहुधात्मानं जरामृत्युविवर्जिताः ॥
क्रीडन्ति विविधैर्भावैर्भोगान् प्राप्य दुरासदान् ॥३७॥
स्वच्छन्दचारिणः सर्वे सिद्धाश्चान्ये सुपूजिताः ॥
एकादशानां रूद्राणां कोट्यनेका महात्मनां ॥३८॥
एभिः सह महात्मासौ देवदेवीमहेश्वरः ॥
भक्तानुकम्पी भगवान् मोदते पार्वतीपतिः ॥३९॥
नाहन्तेषान्तु रुद्राणां भवस्य च महात्मनः ॥
नानात्वमनुपश्यामि सत्यमेव ब्रवीमि च ॥४०॥
मातरिश्वाऽब्रवीत्पुण्यामित्येतामैश्वरीङ्कथां ॥

अथ ते ऋषयः सर्वे दिवाकरसमप्रभाः ॥४१॥
श्रुत्वेमां परमां पुण्यां कथां त्रैयम्बकीन्ततः ॥
भृशं चानुग्रहं प्राप्य हर्षञ्चैवाप्यनुत्तमं ॥४२॥
स्त (स) म्भावयित्वाप्यन्यश्च वायुमूचुर्म्महाबलं ॥

॥ ऋषय ऊचुः ॥

समीरण ! महाभाग ! अस्माकञ्च त्वया प्रभो ! ॥४३॥
ईश्वरस्यापरं पुण्यं अष्टमञ्चापवर्गिकं ॥
तस्य स्थानं प्रमाणञ्च यथावत्परिकीर्त्तितं ॥४४॥
योगेन्धनसमृद्धन्तत् परमं परमात्मनः ॥
महादेवस्य माहात्म्यं दुर्विज्ञेयं सुरैरपि ॥४५॥
स्वेन मांहात्म्ययोगेन सहोमस्यामितौजसः ॥
यः स्वभक्तश्च सम्मो हो ह्यनुकम्पातथैव च ॥४६॥
ब्राह्म्या लक्ष्म्या स्वयञ्जुष्टा या सा प्रतिघनाशनी ॥
व्याप्य ज्योत्स्नेव खञ्चन्द्रे विन्यस्ता विश्वरूपिणी ॥४७॥
विभूतिर्भ्राजतेऽत्यर्थं देवदेवस्य बेश्मनि ॥
महादेवश्य तुल्यानां रुद्राणान्तु सुखात्मनां ॥४८॥
तत् सर्वं निखिलेनेदं वक्त्रादमृतनिस्रवं ॥
आपीतं खलु सर्वस्य भक्त्याास्माभिस्तु सुव्रत ! ॥४९॥
नास्तिकिञ्चिदविज्ञेयँमन्ये चैवापि ते प्रभो ! ॥
प्रश्नं देहवतां प्राण ! यथावद् वक्तुमर्हसि ॥५०॥

॥ सूत उवाच ॥

यः खलूवाच भगवान् किम्भूयावर्त्तयाम्यहं ॥
किम्मया चैव कर्त्तव्यन्तद्वदिच्छामि पृच्छतः ॥५१॥

॥ ऋषय ऊचु : ॥

आदित्यरथवाहाश्च सिंहा ये क्रोधविक्रमा : ॥
बैश्वानरा भूतगणा व्याघ्राश्चैवानुगामिनः ॥५२॥
आभूत सम्ल्पवे घोरे सर्वप्राणभृतां क्षये ॥
किमवस्था भवन्त्ये ते तन्मे ब्रूहि यथार्थवत् ॥५३॥
एते यथा त्वया प्रोक्ता सिंहव्याघ्रगणैः सह ॥
ये चान्ने सिद्धिसम्प्राप्ता इश्वरस्य महात्मनः ॥५४॥
तेषां तद्वचनं श्रुत्वा मातरिश्वा जगाद ह ॥
इदं वः परमं तत्वं समाख्याष्याामि श्रृण्वतां ॥५५॥

ज्ञात्वाचेश्वरसद्भावमव्यक्तप्रभवन्तथा ॥
यत्र पूर्वगतास्तेषु कुमारा ब्रह्मणः सुताः ॥ ५६॥
सनकः सनन्दनश्चैव तृतीयश्च सनातनः ॥
बौद्धाश्च कापिलास्तेषामासुरिश्च महातपाः ॥५७॥
मुनि : पञ्चशिखश्चैव ये चान्येऽप्येवमादयः ॥
ततः कालेऽप्यतिक्रान्ते कल्पानां पर्यये गते ॥५८॥
महाभूतविनाशान्ते प्रलये प्रत्युपस्थिते ॥
अनेकरुद्रकोट्यस्ता याः प्रपन्ना महेश्वरं ॥५९॥
शब्दादीन् विविधान् भोगान् सन्त्यक्त्वाष्टविधाश्रयात् ॥
प्रहृत्य सर्वभूतानि ज्ञानयुक्तेन चेतसा ॥६०॥
विहाय पदमव्यग्रं भक्तानामनुकम्पनं ॥
तत्र यान्ति महात्मानं परमाणुं महेश्वरं ॥६१॥
तरन्त्याशु महावर्त्ताञ्जन्ममृत्यूदकान्नदीं ॥
ततः पश्यत्यथार्वाणन्नरं (परं) ब्रह्माणमेव च ॥६२॥
देवीभिः सहिताः सप्त या देव्याः परिकीर्त्तिताः ॥
यत्तत्सहस्रं सिंहानामादित्यानान्तथैव च ॥६३॥
बैश्वानरा भूतगणा व्याघ्राश्चैवानुगामिन्नः ॥
प्रवेश्यात्मनितान् सर्वान् सांख्ययोगोद्भवांस्तथा ॥६४॥
लोकान् सप्त इमान् प्राप्य महाभूतानि पञ्च च ॥
स्वशक्त्या सह संयुक्तः करोति विकरोति च ॥६५॥
स ऋङ्मयः साममयस्तथैव च यजुर्मयः ॥
स एववोतश्रोतश्च बहिरन्तश्च सत्पुमान् ॥६६॥
एको हि भगवानीश अनादिश्चान्त ऋद्धिषु ॥
केनोपायेन भगवन् ! पुरं तत्परमात्मनः ॥६७॥
प्राप्यते नरशार्दूलैस्त्वन्नो ब्रूहि यथार्थवत् ॥

॥ वायुरुवाच ॥

ततस्ते ऋषयः सर्वे दिवाकरसमप्रभाः ॥६८॥
सन्त्यज्याश्रम संवासमारोप्यात्मनि चाग्नयः ॥
कर्मणा मनसा वाचा विशुद्धेनान्तरात्मना ॥६९॥
अनन्यमनसो भूत्वा प्रपद्यन्ते महेश्वरं ॥
ब्रह्मोपवासनिरताः सर्वभूतदयापराः ॥७०॥

योगं पाशुपतं दिव्यं प्राप्तस्ते छिन्नसंशयाः ॥
प्रपद्य परया भक्तया ज्ञानयुक्तेन चेतसा ॥७१॥
तैर्ल्लब्धं रुद्रसायुज्यं शाश्वतं पदमव्ययं ॥
यः पठेत् सुसमायुक्तो वायुप्रोक्तमिदं श्रुतं ॥७२॥
ब्राह्मणः क्षत्रियो वापि बैश्यो वा देवतत्परः ॥
लभते रुद्रसायुज्यं भक्तिमान् विगतज्वरः ॥७३॥
अ मद्यपश्च यः शूद्रो भवभक्तो जितेन्द्रियः ॥
आभूतसम्प्लवस्थायी अप्रतीघातलक्षणं ॥७४॥
गाणपत्यं भवेत् स्थानं पार्थिवं सार्वकामिकं ॥
मद्यपो मद्यपैः सार्धंभूतसङ्घैस्तु मोदते ॥७५॥
सोऽर्च्यमानो महीपृष्ठे मर्त्यानां वरदो भवेत् ॥
इति होवाच भगवान् वायुर्वाक्यविशारद : ॥७६॥

इति शिवधर्मसंग्रहे द्वादशोऽध्यायः ॥१२॥

॥ शिवाय नमः ॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे चातुर्वर्ण्यविभागो नाम प्रथमोऽध्याय :

ॐ नमः शिवाय

॥ श्री गणेशाय नम : ॥

पर्वते स शुभेरम्ये हिमवन्ते महीधरे ॥
ओषध्यादिभिराच्छन्ने नानाद्रुमलताकुले ॥७७॥१॥
देवगन्धर्वचरिते सिद्धचारणसेविते ॥
नानाविहगसंङ्घुष्टे सिंहशार्दूलनादिते ॥२॥
दिव्यरूपसमाकीर्णे मणिविद्रुमशोभिते ॥
यतः प्रभवते गङ्गा शीततोया महानदी ॥३॥
यत्र श्रृङ्गाणि दृश्यन्ते रूपवर्णानि सर्वतः ॥
शेभमानानि दृश्यन्ते योजनेषु बहुष्वपि ॥४॥
यत्र देवो निवसतेत्र्यम्बकः शंसितव्रतः ॥
उमया सहितो देव्या ब्रह्मण्यो ब्राह्मणप्रियः ॥५॥
सुखोपविष्टमासीनमासने सुशुभे तदा ॥
वज्रवैदूर्यसञ्छन्ने नानाधातुविभूषिते ॥६॥
अभिगम्य तु तन्देवी प्राञ्जलिर्वाक्यमव्रवीत् ॥
उमादेवी तदागम्य महादेवं महाव्रतं ॥७॥
पूज्यते ऋषिभिर्देवैर्विप्रब्रह्मर्षिसेवितैः ॥
देवगन्धर्वसिद्धैश्च सविद्याधरकिन्नरैः ॥८॥
स्तुवभ्दिर्भगवांस्त्र्यक्षो मरुद्भिश्च महोरगैः ॥
सर्वधर्म समाख्याहि सर्वभूतहिताय वै ॥९॥
ब्राम्हणानाञ्च को धर्मः क्षत्रियाणाञ्च कीदृशः ॥
बैश्यानां कीदृशो धर्मः शूद्रधर्मश्च कीदृशः ॥१०॥
तापसानाञ्च को धर्मः कश्च दीक्षाभिकांक्षिणां ॥
उञ्छवृत्तिषु को धर्म ऋषिधर्मश्च कीदृशः ॥११॥
देवर्षीणाञ्च को धर्मः कश्चस्त्री धर्म उच्यते ॥
केन विद्या पदस्थानं प्रत्यागच्छन्ति मानवा : ॥१२॥
ब्राह्मणाश्च कथं यान्ति ब्रह्मलोकं सनातनं ॥
एतन्मे भगवन् ! सर्वं तत्वतो वक्तुमर्हसि ॥१३॥
इत्येतद्वचनं श्रुत्वा प्रत्युवाच वृषध्वजः ॥

सर्वमेतत् प्रवक्ष्यामि यत्वयोक्तं महिधरे ॥१४॥
यच्छ्रुत्वा शास्त्रविहितो धर्मं धर्मेषु युज्यते ॥
ब्राह्मणानामिमं धर्मं प्रथमं कीर्तयामि ते ॥१५॥
वर्तमानो यथा विप्रः प्राप्नोति परमाङ्गतिं ॥
षट्कर्मनिरतो नित्यं शूद्रः सूतक वर्जितः ॥१६
गुरुपूजासु निरतः शान्तो दान्तो जितेन्द्रियः ॥
अनिर्वेदपरो नित्यं सत्यसन्धो दृढव्रतः ॥१७ ॥
व्रतोपवासनिरत ऋृतुकालाभिगामिनः॥
वर्जयेत्सर्वपापानि देवतातिथिपूजकः ॥ १८॥
देवविद्यातिथिज्ञानमन्त्रश्चैव न विक्रयेत् ॥
बाह्मणानां सदा पूजा रक्षणश्च गवान्हिकं ॥१९ ॥
मधुमांसनिवृत्तस्तु सर्वभूतदयारतः ॥
ग्रामान्नपतितान्नश्च शूद्रान्नश्च विवर्जयेत् ॥२०॥
तिललाक्षागुडक्षीरलवणञ्च न विक्रयेत् ॥
कुकर्माणि च वर्जेत कुपश्यानि तथैव च ॥ २१॥
न विक्रयेतकन्याञ्च हन्याच्चासप्तमंकुलं ॥
न विक्रयेद्गां लाभार्थ विक्रयेत्नरकं व्रजेत् ॥२२॥
दाराणामभयन्दद्याद् भृत्यानामनुकम्पकः॥
दयाप्रसंश्यता चैव सततं सत्यसन्धता ॥२३॥
मातापितृभ्यां शुश्रूषा पितृणाञ्चसदार्चना ॥
यजनं याजनञ्चैवाध्ययनाध्यापनन्तथा ॥२४॥
दानं प्रतिग्रहश्चैव होमशान्ति परायणं ॥
उदितो नुदितो वापि तथैव पितरस्तथा ॥२५॥
सायं प्रातश्च प्रोक्तश्च जुहुयाच्चाग्नि दैवतं ॥
पूर्वञ्चापररात्रञ्च नित्यं जागत्ररितस्तथा ॥२६॥
वियोनिं स न गच्छेत ब्रह्मयोनिं स गच्छति ॥
नमस्करोति सततं वेदवेदाङ्गपारगं ॥२७॥
दर्शनं पौर्णमास्याञ्च मन्त्रसूत्रपरायणं ॥
यः स्वयं क्रियमानेन वेदानामनुपालनं ॥२८॥
एवं यो ब्राह्मणः कुर्य्यात् स गच्छेत् परमाङ्गतिम्॥
वियोनि न स गच्छेत ब्रह्मयोनि स गच्छति ॥२९॥
अन्यथा वर्त्तमानोपि ब्रह्मकादभ्रस्यते द्विज ॥
क्षत्रधर्मं प्रवक्ष्यामि यथा तथ्यान्महायशे ॥ ३०॥

यः कुर्यात् क्षत्रियो देवि!स गच्छेत्परमाङ्गतिम् ॥
क्षत्रियस्य परो धर्मः प्रजानां प्रतिपालकम् ॥३१॥
यजनन्देवदानश्च तथैवाध्ययनेषु च॥
व्यवहारो मन्त्रनीतिः शास्त्रेषुविविधेषु च ॥३२॥
रक्षणं नित्ययुध्देषु सन्धिविश्राममोक्षणं ॥
नानायुधप्रहरणं नित्यं युध्देषु लक्षणं ॥३३॥
एवं यः क्षत्रियः कुर्य्या स गच्छेत्परमाङ्गतिं ॥
वियोनिं न स गच्छेत क्षत्रयोनिं स गच्छति ॥३४॥
विपरीतमतः कुर्य्याद् भ्रस्यते क्षत्रियस्पदं ॥
क्षत्रधर्मस्य यत् प्रोक्तं द्वितीयं परिकीर्तितम् ॥३५॥
बैश्यधर्मं प्रवक्ष्यामि यथा वैश्योपजीविने ॥
वर्तमानो यथा बैश्य : प्राप्नोति परमाङ्गतिम्ः ॥३६॥
धनधान्यार्जनं कुर्यात्सर्ववीजाँ च सङ्ग्रहः ॥
कृषिगोरक्षवाणिज्यं वापनं दोहनं तथा ॥३७॥
रक्षणं गोमहिष्याणां सर्वप्राणिषु पालनम् ॥
क्रयविक्रयलोभोपि पण्यानां फलकांक्षिणं ॥३८॥
यजनं चैव दानञ्च सर्वपापविवर्जितः ॥
ब्रह्मक्षत्रस्य शुश्रूषा दीनानाथानुपालनम् ॥३९॥
भरणंचैव दाराणां भृत्यानामथ बन्धुषु ॥
देवतातिथिपूजाश्च सततं दानशीलता ॥४०॥
ऋतुकालाभिगामित्वं स्वदारनिरतेषु च ॥
एवं वैश्यञ्च यः कुर्यात् स गच्छेत्परमांङ्गतिं ॥४१॥
अन्यथा वर्तमानोऽपि बैश्यो योनिषु भ्रस्यते ॥
बैश्यधर्मस्तु यः प्रोक्तस्तृतीयः परिकीर्तित : ॥४२॥
शूद्रधर्मं प्रवक्ष्यामि यथातत्वं निबोध मे ॥
वर्तमानो यथा शूद्रः प्राप्नोति परमाङ्गतिम् ॥४३॥
ब्राह्मणं सततं पूज्य क्षत्रियं बैश्यमेव च ॥
दैवतं सततं पूज्य आतिथ्यं चापि नित्यशः ॥४४॥
दाता च ब्राह्मणो नित्यं यथोक्तवेदपारग : ॥
घृणा प्रशंसता चैव भूतानामनुकम्पना ॥४५॥
मातापितृभ्यां सुश्रूषा अतिथीनाञ्च पूजनम् ॥
एवं यो वर्तते शूद्रः सगच्छेत्परमां गतिम् ॥४६॥

वियोनिं स न गच्छेत शूद्रयोनिं स गच्छति ॥
ब्राह्मणास्येवमन्यन्ते सर्वलोकनमस्कृता ॥४७॥
नरकं यान्ति ते मर्त्य तिर्यग्योनिं व्रजन्ति च ॥
यथोक्तमव्यया देवि यत्करोति शुभाशुभं ॥४८॥
ब्राह्मणः क्षत्रियो बैश्यः शूद्रो वा गिरिराट्सुते ॥
नरकं यान्ति ते मर्त्या अत्र मे नास्ति संशयः ॥४९॥
सुकृतैर्दृष्कृतैर्वापि कर्मभिर्देवि ! नित्यशः ॥
अहङ्कारो न कर्तव्यो ब्राह्मणोस्मीति जानता ॥५०॥
वृत्तयुक्तो हि पूज्येत वृत्तहीनो न पूज्यते ॥
शूद्रो धर्मः स संप्रोक्तश्चतुर्थः परिकीर्तितः ॥५१॥
तापसानाञ्च यो धर्मः प्रवक्ष्याम्यनुपूर्वशः ॥
ऋषयो धर्म न धर्मेण काङ्क्षतां परमाङ्गतिं ॥५२॥
शौचं जटाजि(न)रत्वञ्च कुशलन्तरशायिता ॥
अग्निहोत्र परो नित्यं त्रिकालं स्नानमेव च ॥५३॥
रोपनञ्चैव बृक्षाणां मृगाणामनुपालनं ॥
मधु मांस निवृत्तानां दधि क्षीरं न विक्रयेत् ॥५४॥
विक्रयेत् फलपुष्पाणां शाकम्बदरकेङ्गुदं ॥
तिलधान्ययवान् माषां कुपण्यानि न विक्रयेत् ॥५५॥
देवयज्ञा ब्रह्मयज्ञाः पितृयज्ञाञ्च सर्वदा ॥
भूतयज्ञाग्नियज्ञाश्च सम्भवन्ति मनुष्यता ॥५६॥
स्थालीपाकेषु सर्वेषु अतिथीन्संविभागयेत् ॥
भूतग्रामेषु सर्वेषु सत्वानामभयः प्रद : ॥५७॥
एवन्तापस धर्मेषु गच्छति परमाङ्गतिं ॥
तापसानान्तु धर्मस्य पञ्चमं परिकीर्तितं ॥५८॥
उच्छवृत्तिषु ये धर्मास्तामि वक्ष्यामि तत्वतः ॥
उच्छो वृत्तिर्यथावृत्तो ब्रह्मलोके महीयते ॥५९॥
देवतातिथिपूजा च पितृणाञ्च सदार्चनं ॥
गवान्हिकञ्च दातव्यं गुरुणामभिभोजनं ॥६०॥
ऋतुकालाभिगामित्व स्वदारनिरतेन्द्रियः ॥
नित्यं व्रतोपवासञ्च दानाध्ययनमेव च ॥६१॥
क्षीरादीनाञ्च सर्वेषां विक्रियञ्च विवर्जयेत् ॥
मधुमांसनिवृत्तञ्च परदारविवर्जितः ॥६२॥
द्विषान्नं वर्जयेन्नित्यं पतितानाञ्च शूद्रयोः ॥

तथैव सत्यसन्धत्वं ब्राह्मणाय प्रयच्छति ॥६३॥
शुक्लवासाः शुचिर्भूत्वा नित्यन्ध्यानपरायण : ॥
उञ्छवृत्तेः सदा धर्मो नान्यवृत्तिं समाचरेत् ॥६४॥
पितृकार्याणि कुर्वीतश्राद्धकालञ्च नित्यशः ॥
वैश्वदेवार्चनं कृत्वापश्चात्स्वयमुपाश्नुते ॥६५॥
अतिथीनुञ्छवृत्तिस्तु दुर्मतिर्न च पूजयेत् ॥
वृथा स दीक्षितः प्रायो दम्भस्तस्य व्रते स्थितः ॥६६॥
उच्छवृत्तिषु धर्मस्ते कथितोयं शुभानने ॥
अन्यथा वर्तमानापि भ्रस्यते ब्रह्मणः पथि ॥६७॥
परिव्राजकधर्मस्तुश्रृणु देवि! यथाविधि ॥
धातुरक्तानि वासांसि दशाभिश्च विवर्जयेत् ॥६८॥
धारयेत्कृतच्छिद्राणि स्नातकस्य शुचिर्भवेत् ॥
न कांक्षते च देवत्वं न राज्यं न च यक्षतां ॥६९॥
यो मामकन्तु कांक्षेत सदा ध्यानपरायणः ॥
यथा हि रूपमादर्शे प्रविष्टं पश्यते क्वचित् ॥७०॥
एवमेवात्मनात्मानं योगसिद्धिर्भविष्यति ॥
कायशौचञ्च वाह्यञ्च तथाभ्यन्तरमेव च ॥७१॥
भावशुद्धिश्च सर्वत्र तथा शूद्रान्नभोजनं ॥
सर्वभूतदया चैव मैत्रं कारुण्यमेव च ॥७२॥
स्थावरंजङ्गमं वापि हिंसा भावे न चिन्तयेत् ॥
आत्मार्थे वा परार्थे वा पारुष्यन्न च भाषयेत् ॥७३॥
नानृतां वदते वाणीं वाक् शौचमिति निर्दिशेत् ॥
तपसा शुध्यते सत्वं बुद्धिर्ज्ञानेन शुध्यति ॥७४॥
विद्यातपोभ्याम्भूतात्मा मनः सत्येन शुध्यति ॥
एवमेव यथादृष्टं परिसंख्यानमेव च ॥७५॥
भिन्नग्रन्थिन्त्यजेत्सर्वं रक्षोरागैश्च वध्यते ॥
कामविवर्धमानेऽपि दुःखं शेतेऽत्र रात्र्यहं ॥७६॥
दृष्ट्वा कामं कामभिर्वाध्यमानं कामान् हित्वा कर्मभिर्हेतुबुदध्या ॥
बुद्ध्या चैवाशुद्धया चैव नित्यं दातातिष्ठेत्क्षीण दोषो विशुद्ध : ॥७७॥
स्थितश्च तस्मै विनिवृत्तकर्म्मा प्रशान्तदृष्टिः सततं परेषां ॥
न शोचयेञ्जन्म भयञ्च रागै रक्षेत धीरा मनसाविकारं ॥७८॥
प्राणान्न हन्यान्न च घातयेच्च तथाप्यदत्तं परिवर्जयेत ॥
अव्रह्मचर्यम्मनसा न गच्छेद् ह्यङ्गारकर्षाज्ज्वलितो यथाग्नि ॥७९॥

सत्यस्थितः स्यान्न मृषा वदेत न चापि मद्यन्तु समाचरेत ॥
तथा विलम्बम्मनसा नगच्छेक्षुत्तृष्णपक्षं परिवर्जयेत ॥८०॥
सन्तोषधारैकगतेन तुष्टिः स गन्धमाल्यानि विभूषणार्थे ॥
मुक्ता सुवर्णं रजतं मणिंश्च न धारयेत् प्रव्रजित : कदाचित् ॥८१॥
न चान्यदप्यस्ति विभूषणक्वचित् रक्तानि वस्त्राणि समावृतात्मा ॥
श्मश्रूणि केशांश्च विवर्जयेत ग्रामञ्चरेत् पिण्डमयाचमानः ॥८२॥
विकालतुष्णीन्न च विप्लुताक्षा न धारयेच्छत्रमुपानहौ वा ॥
न मुण्डनं ग्रामगतन्न कुर्यात् कुलेषु रक्तः स मृषेत्-स्पृहायां ॥८३॥
गुप्तेन्द्रिये नित्यमवात्पवित्रं यत् प्रार्थ्यमेतत् प्रविशेतु कुलानिं ॥
रक्षेत धीरो मनसो विकारं रूपेषु शब्देषु तथा रसेषु ॥८४॥
स्पर्शेषु गन्धेषु जहेत रागं स्त्रीभिर्न संसर्गगतो निषीदेत् ॥
द्रोहन्न कुर्यान्न वदेत मिथ्या स्थितेन वार्तान्न विदर्शयेत ॥ ८५॥
तत्प्रेक्षमाणं प्रमुखञ्च पश्येत् न तद्विधं वा क्रयविक्रयं वा ॥
हिंसान्न कुर्यान्न परेतभक्तं तथान्नपेक्षी परदत्तभक्तं ॥८६॥
प्राणागतेश्चैवमुपाददेत अयाचितञ्चैव हि यत् प्रयच्छेत् ॥
यच्छ्रद्धया तस्य उपाददीत दर्शेषु शिक्षा पदयेनुरक्ता : ॥८७॥
मुञ्चन्ति ये व्याधिजराभियादिभिर्गच्छन्ति ते चाक्षयलोकमुक्तमं ॥८८॥
एवं यो वर्तते नित्यं तृष्णां हित्वा जितेन्द्रियः ॥
यथेष्टं परिनिर्वत्तेच्छूक्ष्मेन्धनमिवानलः ॥८९॥
मोक्षं व्रजत्यसौ देही पापकर्मरतोपि च ॥
प्ररिव्राजकधर्मोयं कथितो देवि ! सत्तम : ॥९०॥
स्त्रीणां धर्म्मन्तु वक्ष्यामि श्रणु मे मृदुभाषिणि ! ॥
सुसंमृष्टगृहे नित्यं सदा समनुलेपनं ॥९१॥
बलिं कुर्यात् सदाचैव वायसानाञ्च तर्पणा ॥
देवतानां द्विजानाञ्च बृद्धानामाभिवादनं ॥९२॥
गुरुणाश्च पितृणाञ्चसदा शुश्रूषणप्रियं ॥
अतिथीनां गुरूणां च पूजनान्तर्पयेद् विधि : ॥९३॥
ज्ञातिभिर्भोजयित्वा तु भर्त्तुरिव प्रयच्छति ॥
भोजयित्वा पतिं पूर्वं पश्चात्स्वयमुपाश्नुते ॥९४॥
पतिञ्च दुःखितं ज्ञात्वा दुःखिता भवति सदा ॥
रहस्यानि सदा गुह्येत्सुकृतं दुष्कृतानिवै ॥९५॥
प्रतिव्रता पतिरता नित्यं पतिपरायणा ॥
सततं मङ्गलाचारा सततं प्रियवादिनी ॥९६॥

सततं देवतारक्ता सततं धर्मवत्सला ॥
नित्यमाचारसम्पन्ना नित्यं भर्तुरतिप्रिया ॥९७॥
सङ्गता ऋतुकाले तु संवृतेन्द्रियगोचरा ॥
युक्ताहारी च सततं दीनान्धकृपणातुरा ॥९८॥
रक्ष्यते भर्तुः सा नारी पापकर्मरतोपि यः ॥
रहस्यन्धारयेत्तत्र दुःखितान्यत्र चिन्तयेत् ॥९९॥
मित्राणि चास्य पूज्येत अमित्राणि च वर्जयेत् ॥
एतैर्गुणैस्तुया नारी सा गच्छेत्परमां गतिं ॥१००॥
वियोनिं सा न गच्छेत ब्रह्मयोनिश्च गच्छति ॥
एष धर्मः स्त्रियो देवि ! समाख्यातस्तु तत्वतः ॥१॥
एतैर्गुणैस्तु या हीना पापकारी तु सा स्मृता ॥
प्रेत्य सा नरकं याति याम्यामार्गस्य गामिनी ॥२॥
एषा ते प्रकृतिः प्रोक्ता किम्भूयः श्रोतुमिच्छसि ॥३॥

इति शिवधर्म उमामहेश्वरसंवादे चातुर्वर्ण्यविभागो नाम प्रथमोऽध्यायः ॥१॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मासङ्ग्रहे उमामहेश्वरसंवाद द्वितीयोऽध्याय :

ॐ नमः शिवाय

इत्येतद्वचनं श्रुत्वा देव्युवाच महेश्वरं ॥
सर्वलोकहितार्थाय सर्वलोकहिते रता ॥४॥
कथितं सर्वमेतत्ते चातुर्वण्यस्य ये गुणाः ॥
काममिथ्योपचारीणां ये च प्राणातिपातिनां ॥५॥
क्रूरकर्मरतानाञ्च पदद्रव्यापहारिणां ॥
विषदा गरदाश्चैव ये विकुर्वन्ति ते नराः ॥६॥
तेषां फलं किम्भवति लोकों वा किं प्रवर्तते ॥
एवमुक्तस्तु भगवान् देवीं रुद्रः प्रभाषते ॥७॥

॥ भगवानुवाच ॥

श्रृणु देवि ! यथातथ्यं कर्म पश्यन्ति ये नराः ॥८॥
येन येन विपाकेन फलं सद्यः समश्नुते ॥
प्राणातिपातिनो घोरा ये नराः क्रूरकर्मिणः ॥९॥
भ्रमन्ति हिंसमानास्ते हस्ते रुधिरमक्षिकाः ॥
द्विपदञ्चतुःपदञ्चैव तथा बहुपदान्यपि ॥१०॥
पक्षिकीटपतङ्गानां जलजानाञ्च हिंसका : ॥
गर्भपातनका ये च मधुघाताश्च ये नराः ॥११॥
एवं हिंसासमाचारा दारुणाः पुरुषाधमाः ॥
नरकेषु प्रपच्यन्ते तिर्यग्योनिं व्रजन्ति ते ॥१२॥
यदा मानुष्यतां यान्ति कदाचिकालपर्ययात् ॥
नटमौष्टिकचाण्डालदासयोनिं व्रजन्ति च ॥१३॥
कुम्भीपाकेषु पच्यन्ते सततं पुरुषाधमा : ॥
गर्भस्थाश्च म्रियन्त्येते जातमात्रा म्रियन्ति वा ॥१४॥
परिसर्पमाना यः केचित् द्विवर्षा वा त्रिवर्षकाः ॥
यौवनस्था म्रियन्त्येते नरानार्यो ह्यनेकश : ॥१५॥
शस्त्रेण केचिच्छिद्यन्ते दह्यन्ते च दवाग्निना ॥

पशुमारैश्च मार्यन्ते शूलैर्भिन्दन्ति चापरे ॥१६॥
दण्डेन लोष्टकेनापि पच्यन्ते च विषाग्निना ॥
उदके च म्रियन्त्येते व्यालपाशैस्तथैव च ॥१७॥
छिन्नकर्णोष्ठनासश्च छिन्नपादाश्च हस्तयो ः ॥
मध्ये च केचिच्छिद्यन्ते शतशोऽथसहस्रश ः ॥१८॥
दुःखमारैश्च मार्यन्ते वन्धनस्थाम्रियन्ति वा ॥
छिन्नाङ्गाश्चाङ्गहीनाश्च जायन्ते पुरुषाधमा ः ॥१९॥
हिंसकानामिदं देवि ! फलं समनुकीर्तितं ॥
परद्रव्यापहारीणां श्रृणु देवि ! यथाक्रमं ॥२०॥
अरण्ये यदि वा ग्रामे क्षेत्रे यदि खिले गृहे ॥
द्विपदश्चतुः पदं वापि धनधान्यसुपुष्करं ॥२१॥
हरन्ति सततं पापाः परेषामल्पबुद्धयः ॥
परद्रव्यापहारीणान्तिर्यग्योनिं व्रजन्ति ते ॥२२॥
यदा मानुष्यमायान्ति कदाचित्कालपर्ययात् ॥
नटमुष्टिकचाण्डाल दासयोनिं व्रजन्ति ते ॥२३॥
यच्चतेषां भवेद् द्रव्यं श्रृणु तस्य ह्युपद्रवं ॥
राजा वा तद्धरेद् द्रव्यं चौरो वापि न संशयः ॥२४॥
आक्रम्यापहरन्त्येते दायादैश्च विलुप्यते ॥
ऋणानि चैव मार्गन्ति सर्वकालन्न संशयः ॥२५॥
अपि देशान्तरं गत्वा भवन्ति ऋण भागिनः ॥
यस्मिन्देशे अनावृष्टिस्तस्मिन्देशे भयावहं ॥२६॥
यस्मिन्देशे क्षुधा रोगास्तत्र जायन्ति ते नराः ॥
अमश्नति शिरोरुक्ष हीनाच्छादनभोजनाः ॥२७॥
अनाथा ह्यनपत्याश्च सर्वभोगविवर्जिताः ॥
उद्वर्त्तकाः स्नापनकास्तथैव परिमर्द्धकाः ॥२८॥
परकर्मपरा नित्यं परर्मोपजीविनः ॥
लेखावाहश्च जायन्ते तथा प्रेक्षकरा नराः ॥२९॥
कण्डिप्रियाः कार्पटिकाः कृपणाः कृषिजीविनः ॥
सुवृष्टिमपि देशेषु तस्य क्षेत्रे न वर्षति ॥३०॥
यच्च तेषां भवेद् द्रव्यं श्रृणुतस्य ह्युपद्रवं ॥
चटकाश्च कपोताश्च मूषिकाः शलभाः शुकाः ॥३१॥
शूकराश्च मृगाश्चैव विलुप्यन्ते धनक्षये ॥
निष्पन्नानाञ्च सस्यानां राष्ट्रोत्पालो भविष्यति ॥३२॥

चौरा वापि विलुप्यन्ते क्षेत्रे वा यदि वा गृहे ॥
विद्रवैर्विग्रहैर्वापि तेषां द्रव्यं विनश्यति ॥३३॥
यस्मिन् विक्रयते द्रव्यं मूलन्तस्य विनश्पति ॥
तृष्णया च म्रियन्ते ते तथैव च बुभुक्षया ॥३४॥
नीचा कुलेषु जायन्ते परपिण्डोपजीविनः ॥
एष दोषो मया प्रोक्तः परद्रव्यापहारिणां ॥३५॥
काममिथ्योपचारीणां श्रृणु दोषं यथाविधि ॥
परदाररतानाञ्च ये भ्रमन्ति नराधमाः ॥३६॥
अर्थेन लोभयित्वा वा मूलमन्त्रेण वा पुनः ॥
प्रकाशयित्वा बहुधा दूतीसम्प्रेषणेन वा ॥३७॥
वियोनिषु च रज्यन्ते धर्षयन्ति तथा परे ॥
गुरुपत्नीश्च साध्वीश्च ये भजन्ति नराधमाः ॥३८॥
कुमारीं राजपत्नीश्च वधूं प्रव्रजितामपि ॥
अकामां व्याधिताञ्जीर्णां गुर्विणीन्धर्षयन्ति च ॥३९॥
नियमास्थां स्वगोत्रां वा ये नराकामसेविताः ॥
एवं पापासमाचाराः सततं लोभचक्षुषः ॥४०॥
नरकान् ते प्रपच्यन्ते तिर्यग्योनिं व्रजन्ति ते ॥
यदा मानुष्यमायान्ति हेतुमात्रेण केनचित् ॥४१॥
नपुंसका भवन्त्येते कांममिथ्योपचारिणः ॥
अशक्ताः घाण्डुकाः केचिदृश्यन्ते केचित्षण्ढकाः ॥४२॥
पक्षप्रषण्ढकाः केचित्बलाक्रम्य कृता परे ॥
जात्यन्धषण्ढकाः केचित् पञ्च षण्ढश्चजायते ॥४३॥
दूषिताश्च भवन्त्येते सततं पुरुषाधमाः ॥
स्त्रीवेषं धारन्त्येते गणिकापतयस्तथाः ॥४४॥
विलोमश्चापि दाराणां प्राप्नुयात्पुरुषाधमः ॥
अपाने कृमयश्चैव भवन्ति व्याधिपीडिताः ॥४५॥
अर्शांसि मूत्रकृच्छ्राणि प्रमेहाश्च भगन्दराः ॥
कुरण्डवातवृषणा वृषणा पतिताः परे ॥४६॥
रोगाभिभूताः सततं पीडचन्ते पूर्वसञ्चितैः ॥
कृन्तनैर्वृषणानाञ्च तथा मृत्यूं लभन्ति ते ॥४७॥
कलत्राण्यपि क्षीयन्ते सदा नीचेन कर्मणाः ॥

अर्हतो वातरोगाश्च बातकुष्ठश्च जायते ॥४८॥

या च तेषां भवेत् पत्नी न सा भर्तरितिष्ठति ॥
अन्यै : सह रमन्त्येताः पुरुषाणां दुरात्मनां ॥४९॥
स्त्रीणां वाह्या भवन्त्येते स्त्रीकर्मण्युपजीविता : ॥
स्त्रीवेशाश्च स्त्रीगतयः स्त्रीरुपा : स्त्रीसमगता : ॥५०॥
स्त्रीणां पण्येन जीवन्ति भविष्यन्ति न लज्जिताः ॥
एष ते कथितो देवि ! काममिथ्योपचारिणां ॥५१॥
दुर्भाषिणाञ्च वक्ष्यामि ये दोषा देवि ! तत्वतः ॥
अयुक्तानितु भाषन्ते ये नरः पापबुद्धय : ॥५२॥
मित्रभेदनकार्याश्च सततं कूटभाषिण : ॥
दृष्ट्वााप्यर्थन्न भाषन्ते लोभमोहभयेन वा ॥५३॥
तर्जयन्ति नराः पापास्तथैवापहरन्ति च ॥
परिवारांश्च वक्तारो मिथ्यावचनभाषकाः ॥५४॥
असंवृतमुखद्वाराः सततं धर्मभेदकाः ॥
एवं पापसमाचारा : सततं पुरुषाधमाः ॥५५॥
पतन्ति कृमयस्तेषां नृणान्दुर्भाषितेन तु ॥
मुखरोगाश्च विविधा हनुदन्ताश्च रोगिणः ॥५६॥
उपजिव्हाश्च जायन्ते कृमिदन्ताश्च पीडिताः ॥
तथा विकृतवक्त्राश्च जायन्ते चक्षुवर्जिताः ॥ ५७॥
विवरान्तश्च वै तेषां मुखे कीलश्च कोट्यते ॥
गलोपरोधः परमो गलस्तम्भश्चजायते ॥५८॥
विविधाश्चैव जायन्ते मूकाश्चाव्यक्त भाषिणः ॥
अतिस्थूलोष्ठजिव्हाश्च सम्वन्धश्चैव जायते ॥५९॥
मूका जडाश्च वधिराजायन्ते पूर्वकर्मिणः ॥
मुखनासापूतिगन्धैः पीड्यन्ते पुरुषाधमाः ॥६०॥
प्राणैर्मुखेषु दीर्यन्ते तथा कर्णमलाधिकः ॥
एवं दोषसमाचारा नृषां दुर्भाषितेन च ॥६१॥
मद्यपानेषु ये दोषस्तान् प्रवक्ष्यामि तत्वतः ॥
ये पिवन्ति सदा मद्यं त्यक्त्वा धर्मं सनातनंः॥६२॥
अपस्मारगृहिताश्च कृपणा मन्दबुद्धयः ॥
रहस्यानि प्रकाशन्ते तथा गुह्यानि दर्शयेत् ॥६३॥
मद्यविक्रयिणो येतु येतु सन्धन्ति नित्यशः ॥
परिभुतास्तु वर्णेषु जीवन्त्येते कुजीविकाः ॥६४॥
मद्यपाने ह्ययं दोषो यथाभूतं प्रकाशितः ॥

ते नरा नरकं यान्ति तिर्यग्योनिं व्रजन्ति च ॥६५॥
यदा मानुष्यमायान्ति कदाचित्ते नराधमाः ॥
कुत्सितानां कुले जाता भवन्ति पुरुषाधमाः ॥६६॥
आशाभिभूताः कृतघ्ना कुपुण्या भग्नचेतसः ॥
परिभूता ह्यवज्ञाता जायन्ते च कुचैलिनः ॥६७॥
पद्यपाने मया देवी ! ये देषाः परिकीर्तिताः ॥
मत्सरापहतानान्तु श्रृणु दोषा यथाक्रमं ॥६८॥
न प्रयच्छन्ति ये दानं मत्सरेंणहृता नराः ॥
आत्मार्थे पोषणा नित्यं संविभागविवर्जिताः ॥६९॥
बालेषु प्रेष्यमाणेषु भक्षयन्ति पिबन्ति च ॥
अतिथिं ब्राह्मणं वापि पित्र्यर्थं वापि वा सुहृत् ॥७०॥
आशयासमनुप्राप्तमन्यमाहारकांक्षिणं ॥
दृष्ट्वा पराङ्मुखा यान्ति न ददन्ति कदाचन ॥७२॥
अन्ने वा यदि वा पानं पानीयं वा प्रतिश्रमं ॥
न ददाति परां भोगान् दातारं वारयन्ति चे ॥७३॥
ते नरा नरकं यान्ति तिर्यग्योनिं व्रजन्ति च ॥
यदा मानुष्यमायान्ति कदाचित्कालपर्ययात् ॥७४॥
हीनजाति कुलोत्पन्नाः क्षीणबंशकुलेषु च ॥
जायन्ते पुरुषास्तत्र परप्रेष्यकरा नराः ॥७५॥
अनाथा ह्यनपत्याश्च सर्वभोगविवर्जिताः ॥
भवन्ति सततोद्विग्ना दरिद्राः पुरुषाधमाः ॥७६॥
बुभुक्षया तृषां वापि सततन्ते म्रियन्ति च ॥
एष ते मत्सरो देवी ! दोषास्तु परिकीर्तिताः ॥७७॥
अशुश्रूषकरा ये तु दोषं वक्ष्यामि तत्वतः ॥
ये तु दोषान्न पश्यन्ति गुरुणामवमन्यकाः ॥७८॥
शुश्रूषन्ते न पितरं मातरं च यशस्विनि ! ॥
दैवतं ब्राह्मणं वापि आचार्यं गुरुबृद्धयोः ॥७९॥
मित्रं वा सुहृदं वापि अतिथीन् दीनमागतान् ॥
न पूजयन्त्यबुद्धेन नरा नरकनिर्भयाः ॥८०॥
ते मृता नरकं यान्ति तिर्यग्योनिं व्रजन्ति च ॥
यदा मानुष्यमायान्ति कदास्वित्कालपर्ययात् ॥८१॥
दुर्मेधाश्चापि जायन्ते मूर्खाः श्रुतिविवर्जिताः ॥
न शब्दच्छन्दसोर्विज्ञाः श्रुतिस्मृतिविवर्जिताः ॥८२॥

देवतानां पितृणाञ्च न पूज्यन्ते नराधमाः ॥
अवहास्या भवन्त्येते ज्ञातीनाम्मित्रबन्धुषु ॥८३॥
रागतत्वाश्च सततं मलोपहतचेतसः ॥
वामनाश्चैव कुब्जाश्च विकटाश्च विरूपकाः ॥८४॥
दृट्वा तानवहास्यन्ति परिभूतश्च जायते ॥
ब्राह्मणं वालबृद्धांश्च गुरुमाचार्यमागतान् ॥८५॥
न चासनं प्रयच्छन्ति मूढोपहत चेतसः ॥
नाभिभाषन्ति प्रथमं न च प्रत्युपगच्छति ॥८६॥
असन्मानप्रिया स्तब्धा बालदर्पविमोहिताः ॥
ते मृता नरकं यान्ति स्वकर्मपरिवेष्टिताः ॥८७॥
यदा मानुष्यमायान्ति हेतुमात्रेणकेनचित् ॥
चण्डालशूकरीलुब्धा रजको नटमौष्टिकाः ॥ ८८॥
तेषां कुलेषुजायन्ते परपिण्डोपजीविनः ॥
विकृतैर्हस्तपादैश्च क्रीडनीया भवन्ति ते ॥८९॥
स्वजनैर्वर्जिता नित्यं भोजनाच्छादनेन च ॥
एष मानहतानान्तु दोषस्ते परिकीर्तिताः ॥९०॥
अल्पमल्पापराधेन ये कुर्वन्ति नराधमाः ॥
क्रन्दन्ते रक्तनयनाः क्रोधोपहतचेतसः ॥९१॥
क्षुभ्यन्ते क्रूरकर्माणो रागोपहतचेतसः ॥
यदा क्रोधसमाविष्टा म्रियन्ति पापकर्मणाः ॥९२॥
ते मृता नरकं यान्ति तिर्यग्योनिं व्रजन्ति च ॥
यदा मानुष्यमायान्ति कदाचित्कालपर्ययात् ॥९३॥
रूक्षाङ्ग मसिवर्णाभ विरुपा भ्रमराप्रभाः ॥
दुष्प्रेक्षा दुर्भगाश्चैव कपिलाः पिङ्गलेक्षणाः ॥९४॥
द्वेक्ष्याः सर्वस्य लोकस्य दुर्गन्धा रूपवर्जिता : ॥
एवं पापसमाचारा दारुणाः पुरुषाधमाः ॥९५॥
एवन्ते कथितन्देवि ! किं भूय : श्रोतुमिच्छसि ॥९६॥

इति उमामहेश्वर संवादे द्वितीयोऽध्यायः ॥२॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मासङ्ग्रहे उमामहेश्वरसंवादे

तृतीयोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

किं कर्म सुकृतन्तत्र प्राप्नोति परमाङ्गतिं ॥
दीर्घायुषो निरोगाश्च कथं जायन्तिरुपिण : ॥९७॥
सर्वलक्षणसम्पूर्णः सर्वविद्याप्रतिष्ठिता : ॥
एवमुक्तस्तु देव्यासौ प्रत्युवाच महेश्वर : ॥९८॥

॥ भगवानुवाच ॥

अहिंसकाः सुपुरुषाः सर्वभूतहिते रताः ॥
प्रकाशात्सुखिनो नित्यं चक्षुरूपा भवन्ति ते ॥९९॥
दीर्घायुषा निरोगाश्च सर्वदुःख विवर्जिताः ॥
मुदितेषु च देशेषु जायन्ते पुरुषोत्तमाः ॥२००॥
पूज्यन्ते मानुषे लोके ग्रामेषु नगरेषु च ॥
यदा मृत्युवशं यान्ति कदाचित्कालपर्ययात् ॥१॥
ते मृताः स्वर्गमायान्ति शान्ताः सुकृतिनो यथा ॥
मानुष्यमागता भूयो भवन्ति प्रियदर्शना : ॥२॥
समृद्धे सुकुले तत्र जायन्ते रतिवर्द्धने ॥
आलेख्ययक्षप्रतिमा भवन्ति सुखभागिन : ॥३॥
राजपूजाभिसत्कारं दासीदासैश्च सेव्यते ॥
बहुपुत्रधनाढ्याश्च दासीभृत्यसमावृता : ॥४॥
भवन्ति मानुषे लोके पूज्यमानाः स्वतेजसा ॥
एवमहिंसकानान्तु मया प्रोक्ता यशस्विनि ! ॥५॥
परद्रव्यन्न सेवन्ते अदत्तन्न च गृह्यते ॥
न्यायोपार्जितवित्ताश्च परद्रव्यं न हिंसका : ॥६॥
ते मृताः स्वर्गमायान्ति सर्वपापविवर्जिताः ॥
मानुष्यमागता भूयो भवन्ति सुखभागिनः ॥७॥
यदि तेषां भवेद् द्रव्यं श्रृणु तस्यापि यत्फलं ॥
द्रव्यन्तेषां प्रनष्टं वा क्षिप्रमेव तु लभ्यसे ॥८॥
बृद्धित्वमुपयास्यन्ति अर्थेषु च धनेषु च ॥
प्राप्नुवन्ति महदर्थं महाभोगान् त्रतिं प्रति ॥९॥
एवं देवि ! समाचारा न्यायबृत्तिसमन्विते ॥

ये तु सत्यं प्रभाषन्तेतीक्ष्णा पैशून्यवर्जिताः ॥१०॥
ते मृता स्वर्गमायान्ति सततं धर्मशीलिताः ॥
यदा सत्यक्षये काले कदाचित्कालपर्ययात् ॥११॥
मानुष्यमागता भूयो ब्रह्मक्षेत्रे भवन्ति ते ॥
यदा कुले प्रसूयन्ते सार्थवाहा महाधने ॥१२॥
सम्पन्ने श्रुतिविद्याद्या वेदवेदाङ्गपारगाः ॥
ज्ञानविज्ञानसम्पन्ना नानार्थकुशलं प्रति ॥१३॥
गुणार्थरूपाः सम्पन्ना ज्ञानवेत्प्रियदर्शनाः ॥
शुचिशुल्काम्बरधरा नित्यगन्धानुलेपनाः ॥१४॥
नृपे जनपदे ग्रामे पूजासत्कार लालिताः ॥
यदा तु त्यजतेप्राणैर्ल्लोकं प्राप्नोत्यनुत्तम् ॥१५॥
शरण्यन्तप्रपन्नस्य भीतस्य परिरक्षणे ॥
पञ्चत्स्वे तास्ववस्थासु वक्तव्यमनृतन्तथा ॥१६॥
तत्रानृते भवेत्स्वर्गः ऋतेन रस्को ध्रुवं ॥
एवं देवि ! समाचारा सत्यवादिषु यत्फलं ॥१७॥
मद्यापानेषु वक्ष्यामि ये गुणाः प्रमदोत्तमे ! ॥
न पिबन्ति च ये मद्यं न च सन्धन्ति ये नराः ॥१८॥
देवलोकमितो यान्ति नरा मद्यविवर्जिताः ॥
यदा पुण्यक्षयेक्षीणाः कदाचित्कालपर्ययात् ॥१९॥
पतन्ति मानुषेलोके ब्रह्मक्षेत्रे महाकुले ॥
जायन्ते पुरुषास्तत्र महाभोग धनाढ्यः ॥२०॥
श्रुतिस्मृतिसुसम्पन्ना नानाविद्याङ्गभूषणाः ॥
निरोगाश्च भवन्त्येते पूजनीयाश्च मानवाः ॥२१॥
श्रुतिवकोधिरुपाश्च धर्मशास्त्रपरायणाः ॥
मुदिलेषु च देशेषु भवन्ति शुखभागिनः ॥२२॥
न हिंसन्ति च तान् सर्वान् न पिशाचा न राक्षसाः ॥
एवं गुणसमाचारा मद्यपानविवर्जिताः ॥२३॥
गुरुशुश्रुषको देवि ! ये च पूर्वाभिभाषिणः ॥
ते मृताः स्वर्गमायान्ति गुरुशुश्रूषका नराः ॥२४॥
देवलोकपरिभ्रष्टा मानुष्यं पुनरागताः ॥
महाभोगेकुलेजाता महागोत्रेषु सम्भवे ॥२५॥
शूराश्च ज्ञानसम्पन्ना ब्रह्मक्षेत्रेषुजायते ॥
सुखिनो भोगवन्तश्च ज्ञानवन्तो बहुश्रुताः ॥२६॥

सम्पन्नधनधान्याढ्या जायन्ते विपुले कुले ॥
दीर्घायुषो निरोगाश्च रूपवन्तो जनप्रियाः ॥२७॥
सम्पूर्णलक्षणविधा सम्पूर्णश्चैवजायते ॥
पूजनीयाभवन्त्येते ग्रामेषु नगरेषु च ॥२८॥
नित्यं पूज्याभविष्यन्ति अर्चयन्ति सदा नराः ॥
पूजार्हो दृश्यते देवि ! पूजापूजार्थमेव च ॥२९॥
एवं गुणमयाः प्रोक्ता गुरुशुश्रूषका नराः ॥
मानुष्या ये तु नस्तेयास्तेषां गुणविधिं श्रृणु ॥३०॥
ये नावलिप्या लोकज्ञा धर्मज्ञानस्य पारगाः ॥
देवलोकमितो यान्ति सुकृतेनेह कर्मणा ॥३१॥
यदा पुण्यक्षये क्षीणा मानुष्यं पुनरागताः ॥
ब्रह्मक्षेत्रेषु जायन्ते घनघान्यस्य भोगिनः ॥३२॥
ज्ञानविज्ञानसम्पन्नास्तेजोवन्तो महाबलाः ॥
एवं गुणसमाचारा जायन्ते प्यकुतोभयाः ॥३३॥
दम्भान्येष न कुर्वन्ति च ईर्ष्यालुका नराः ॥
सम्यग्दृष्टिश्च सततं श्रृणु तस्यापि ये गुणाः ॥३४॥
देवलोकमितो यान्ति सुकृतेनेह कर्मणाः ॥
यदा मानुष्यमायान्ति हेतुमात्रेण केनचित् ॥३५॥
श्रेष्ठिनः सार्थवाहाश्च तत्रजायन्ति ते नराः ॥
तेजस्विनो रूपवन्तो बलवन्तो धनेश्वराः ॥३६॥
मेधाविनो महाशब्दा ज्ञानविद्यातपोधनाः ॥
उपभोगाश्च विविधा नैकस्त्री परिचारकाः ॥३७॥
एवं सम्पूज्यते तत्र पुरा सुकृतकर्मणा ॥
एतत्ते सर्वमाख्यातं प्रशस्ताय च नन्दितः ॥३८॥
श्रृणु देवि ! रहस्यन्ते मनुष्याणां सुखावहं ॥
अहिंसा परमोधर्म अहिंसापरमोगुणः ॥३९॥
अहिंसा परमा विद्या अहिंसा शुभमङ्गलं ॥
अहिंसा सर्वभूतेषु यान्ति ब्रह्म सनातनं ॥४०॥
अमद्याः स्वर्गामायान्ति मद्यपान विवर्जिताः ॥
शुश्रूषका महार्था हि नास्ति तपरमोगुणः ॥४१॥
आयुष्मान् भवतेलोके ज्ञानविज्ञानमाप्नुयात् ॥
अनानिनो भवेस्लोका गुणानामभिपूजकः ॥४२॥
अक्रोधनत्वं ब्रह्मत्वं नास्तीतपरमो गुणः ॥

यानिकानि च शास्त्राणि प्रवदन्ति मनीषिण: ॥४३॥
इदं श्रेष्ठतमन्देवि ! इदं देवेषु पठ्यते ॥
इदं धारयते नित्यं य: श्रृणोति पठेत वा ॥४४॥
स्वर्गं व्रजत्यसौ देवि ! न च गच्छति दुर्गतिं ॥
वियोनिं न स गच्छेत ब्रह्मयोनिं सगच्छति ॥४५॥
अत्रग्राह्यमिदन्देवि ! यस्तु धारयते नर: ॥
शिष्य: सुहृद्वा भ्राता वा चातुर्वर्णस्य वा पुन: ॥४६॥
प्रयत्नेन गृहीतव्यं शास्त्रमेतत्सुखावहं ॥
सायं प्रातश्च य: कुर्यात् पठेद्वाथ श्रृणोति वा ॥४७॥
स्वर्गं व्रजति पूतात्मा दुष्कृतश्च प्रणश्यति ॥
सर्वधर्मञ्च विज्ञात्वा भवन्ति प्रमदोत्तमे ! ॥४८॥
न जराश्च न रोगाश्च न व्याधिर्न कुतोभयं ॥
न चान्धो न च वै क्लीबो न मूर्खो न च मूकता ॥४९॥
न जडो नैव वधिरो न कुब्जो न च वामन: ॥
न हीनाङ्गो नातिरिक्त: कदाचिर्ज्जायते नर: ॥५०॥
सर्वलक्षणसम्पूर्णा जायन्ते पुरुषोत्तमा: ॥
इदं तत्परमं शास्त्रं रहस्यं परमाद्भुतं ॥५१॥
उभे सन्ध्ये च ये नित्यं पठन्ते ब्रह्मचारिण : ॥
मुच्यन्ते सर्वपापेम्यो यान्ति ब्रह्म सनातनं ॥५२॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे तृतीयोऽध्याय ॥३॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामेशवरसंवादे अध्यात्मध्यानप्रधान

चतुर्थोऽध्याय:

ॐ नम: शिवाय

॥ भगवानुवाच ॥

तपश्चरणयुध्देषु वेदानान्धारणेषुच ॥
अहिंसा सत्यवाक्येन परदारविवर्जिता: ॥५३॥
व्रतोपवासनियमै स्त्तीर्थाभिगमनेन वा ॥
अनजशनेन शौचेन दानेन च दमेन च ॥५४॥
देवतातिथिपूजाभिर्गुरुशुश्रूषणेन च॥
एवमादिषु धर्मेषु ध्यानन्देवि विशिष्यते ॥५५॥

॥देव्युवाच ॥

किमाचारा:शुभै:कर्म्मै ये यान्ति परमाङ्गतिं ॥
चाण्डालमादित: कृत्वा ये नरा:पापकर्मिण:॥ ५६॥
मनसा कर्मणावाचा अहन्यहनि हिंसका:॥
येषां न ज्ञान न तपो न श्राध्दं नाप्युपोषितं ॥५७॥
कर्मणा केन भावेन तेषां पापविमोचनं॥

॥ भवावानुवाच ॥

नहि सम्यक्तमन्तेन ध्यानेन सद्दशं भवेत ॥५८॥
यथा जीर्णोदकन्देवि! सशैवालं सकर्द्दमं ॥
नवोदकेनाधिहतं विनाशमुपगच्छति ॥ ५९॥
एवं हि दुष्कृतं कर्म हन्याद् ध्यानेन योगवित् ॥
क्षीयते ध्यायमानस्य यथा लोहमिवाग्निना ॥६०॥
तथा ध्यानाग्निना पापं ध्यायमानस्य हीयते ॥
ध्यान शोधयते पापं तुषाग्निरिव काञ्चनं॥ ६१॥
कृत्वा पापसहस्राणि पश्चाद् ध्यानपरो भवेत् ॥
तेषां ध्याने न योगेन दहत्यग्निरिवेन्धनम् ॥ ६२॥
ये हि ध्यानं समाश्रित्य म्रियन्ते पापकर्मिण: ॥
ते मृता: स्वर्गमायान्ति शान्ता: सुकृतिनो यथा ॥६३॥

देव्युवाच

यदुक्तमेतद् भगवन् ! ध्यानस्य फलमुत्तमं॥
तद् ध्यानं श्रोतुमिच्छामि यथान्यायं यथाविधि ॥६४॥
ध्यानं कतिविधं देव ! ध्यायितव्यं कथं भवेत् ॥
अध्यात्मं सर्वमेतेषां भगवन् ! वक्तुमर्हसि ॥६५॥

॥ भगवानुवाच ॥

अध्यात्मं वर्ण्णयिष्यामि श्रूयतां धर्म्मचारिणि ! ॥
ध्यानयोगविधिं कृत्स्नं मोक्षद्वारविघट्टनं ॥ ६६ ॥
सर्वेषामेव भूतानां परमात्मा यशस्विनि ! ॥
स्मर्त्तव्यः सर्वभूतेषु हरस्त्रैलोक्यवर्त्तकः ॥ ६७॥
स्वशरीरं विशेषेण द्रष्टब्यं ध्यानचक्षुषाः ॥
न षट्स्वङ्गुलपर्वसु पाणिपादतलेषु वा ॥६८॥
तथा पाश्र्वेषु सर्वेषु पर्वण्यां सर्वसन्धिषु ॥
पार्शयोरुभयोः पृष्ठे ग्रीवास्कन्धे तथैव च ॥६९॥
उरः कुक्षिप्रदेशेषु तथैवाभ्यन्तरेषुच ॥
चक्षुर्भ्यां श्रवणाभ्याञ्च उभेनासापुटे तथा ॥७०॥
शिरोललाटे चिवुके तालु भ्रुत्यन्तरेहि सः ॥
नाभिमध्ये शरीरेषु तथा हृदयबन्धने ॥७१॥
रश्मिज्वालासहस्रेषु तस्य मध्ये दिवाकरः ॥
रविरश्मिभिस्तद्बिन्दुः शरीरे सर्वदेहिनां ॥७२॥
तस्य मध्येतु विज्ञेयं सौम्यं सोमस्य मण्डलं ॥
सौम्यताया च बालस्य सौमकुमारस्य तद्वपुः ॥७३॥
ज्वालामालासहस्रेषु तस्य मध्ये हुताशनः ॥
योऽसौनिर्दहते सम्यगाहारं सर्वदेहिनां ॥७४॥
तस्य चाग्निशिखामध्ये जीवः शाश्वतकोऽव्ययः ॥
स्थूलकायेषु सर्वेषु यवमात्रप्रमाणतः ॥७५॥
स्थूलकायेषु सर्वेषु वायुभूतस्तु तिष्ठति ॥
कालं प्राप्य यथा जीवो देहमुत्सृजते नृणां ॥७६॥
वायुभूतस्तथा भूत्वा छिन्ने हृदयबन्धने ॥
गलोरुबन्धश्वसते श्वासो घुरघुरायते ॥७७॥
यदा विसंज्ञा भवति जीवोभ्रूत्पन्नरागता : ॥
तालुदेशन्ततो गत्वा देहमुत्सृजते नृणां ॥७८॥

एवमेतेषु स्थानेषु द्रष्टव्यं योगचक्षुषा ॥
ध्यानयोगं समाश्रित्य ध्यायितव्यं यशस्विनि ! ७९॥
ध्यायते भगवान् शम्भुस्तन्मनास्तत्परायण: ॥
प्रदीप्तेनैव रूपेण पश्यत्यात्मानमात्मना ॥८०॥
यथैवादर्शके छायाम्प्रविष्टाम्पश्यते क्वचित् ॥
योगसिद्धास्तथात्मानं पश्यत्यात्मानमात्मना ॥८१॥
एवं ध्यानं समाश्रित्य ध्यायमानस्य नश्यति ॥
योगसिद्धिमवाप्नोति ध्यायमान: स मानव: ॥८२॥
मोक्षं व्रजतिपूतात्मा तद्धि मे परमं पदं ॥
एवं मे परमं ध्यानं माहेशं परिकीर्तितं ॥८३॥
ध्यानं द्वितीयं वक्ष्यामि श्रूयतां धर्मचारिणि ! ॥
शून्यगारे अरण्ये वा वृक्षमूले तथापरे ॥८४॥
आयुधानि हरन्त्येते नरा नरकनिर्भयाः ॥८००॥
असिपत्रवनन्देवि ! मृता गच्छन्ति ते नराः ॥
नीलकण्ठं वधं कृत्वा प्रपद्यन्ते नराधमाः ॥१॥
तर्जितास्तेषु रौद्रेषु नरास्ते पापकर्मिणः ॥
अथ तत्र प्रविष्टस्य पादपस्य महावने ॥२॥
तस्य वृक्षस्य यत्पत्रं शीर्यते मारुताहतं ॥
असिपत्रायुधं भूत्वा क्षणेन संप्रपद्यते ॥३॥
नराणामुपरि तेषान्निपतन्ति सहस्रशः ॥
नित्यं पतन्ति मांसेषु नरकेषु नराधमाः ॥४॥
विद्रवन्ति भयात्तत्र नरास्ते पापकर्मिणः ॥
छिद्यन्ते कर्णनासाश्च हस्तपादास्तथैव च ॥५॥
तेषां सञ्छिन्नगात्राणां पापकर्मक्षयो यदा ॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥६॥
ते मृता नरकं यान्ति महारौरवमेव च ॥
आदिङ्कृत्वा तृणं काष्ठं यत्किञ्चित्सपरिग्रहं ॥७॥
अरण्ये यदि वा ग्रामे क्षेत्रे वा यदि वा गृहे ॥
पितृमातृगृहे वापि लोभात्तृष्णावलेन वा ॥८॥
ये हरन्ति नरा देवि ! पारक्यन्द्रव्यहारिणः ॥
पापकर्मकरन्देवि ! चण्डालास्ते जुगुप्सिताः ॥९॥
देवयज्ञश्च ये देवि ! दानपुण्यविवर्जिताः ॥
गुरुविप्राश्च धर्मी च यैश्च ते संप्रपीडिताः ॥१०॥
ते मृता नरकं यान्ति महारौरवमेव च ॥
पञ्चयोजनविस्तीर्णं समन्तात्परिमण्डलं ॥११॥
घोरं गिरिगुहाकारं ह्युच्छ्रितं पर्वतोपमं ॥
ततोन्धकारं सततं मेघाच्छवेन्न शर्वरी ॥१२॥
तत्र द्वारे स्थिता रौद्रा द्वारपाला महाबलाः ॥
प्रविष्टाश्चैव तद्द्वारे न घृणा करुणा न च ॥१३॥

तर्जितास्तेषु रौद्रेषु प्रविशन्ति भयार्दिताः ॥
तत्र तेषां प्रविष्टानान्नराणां पापकर्म्मिणां ॥१४॥
स्वशरीरास्थितो ह्यग्निर्द्दहत्यङ्गानि देहिनां ॥
सततो दह्यते ह्यग्निः स्वशरीरोत्थितो यदा ॥१५॥
स्वयं कृतेषु कर्म्मेषु नादम्मुञ्चन्ति दह्यतः ॥
यदा कर्मक्षयो क्षीणे नराणाम्पापकर्म्मिणां ॥१६॥
तेषां द्वारं प्रयच्छन्ति तदासौम्या भवन्ति ते ॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥१७॥
प्राप्नुवन्ति नरा देवि ! स्वयं कर्म पुरा कृतैः ॥
यदा मानुष्यतां यान्ति कदाचित्कालपर्ययात् ॥१८॥
एवं पापसमाचारः प्राप्नोति सुकृते कथं ॥१९॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे
पञ्चदशोऽध्यायः ॥१५॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

षोडशोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

एवं पापसमाचारः दारुणापुरुषाधमाः ॥
नरके पच्यमानस्तु प्राप्नोति सुकृतं कथं ॥२०॥
उद्धरेत्पितरं पुत्रः पौत्रो वा ये न कर्मणा ॥
पितुरुद्धरणायेच्छेत्सन्तानं केन कर्मणा ॥२१॥
एतदिच्छामि विज्ञातुं भगवन् ! वक्तुमर्हसि ॥

॥ देवदेव उवाच ॥

तदहन्ते प्रवक्ष्यामि श्रूयतां धर्मचारिणि ! ॥२२॥
ग्रीलषण्ढप्रमोक्षेण अमावास्या तिलोदकं ॥
भूमिदानं सुवर्णञ्चकपिलाश्च यशस्विनि ॥२३ ॥
उद्दिश्य पितरन्दद्याच्छ्रोत्रियेभ्यो यथाविधि ॥
महत्पुण्याहनि प्राप्ते पर्वणी वा शिवाय च ॥२४॥
तिलान् कृष्णान् सुवर्णञ्च भूम्यन्नञ्च प्रदापयेत् ॥
तेन दानेन पितरं मातरं च पितामहं ॥२५॥
उद्धरेन्नरकाद् देवि ! यावदासप्तमं कुलं ॥
अथ पुत्रोथवा पौत्रो ये कुर्वन्ति यशस्विनि ॥२६॥
तेन पुण्येन च पितृन् स्वर्गे मोदन्ति ते नराः ॥
ईश्वरं शिवमादित्यं केशवं स्कन्दपार्वतीं ॥२७॥
भक्तिभावाद्यजेद्यस्तु पितृनुद्दिश्य मानवः ॥
नैवेद्यवस्त्रपानानि स्रग्गन्धश्च सुशोभनाः ॥२८॥
ददन्ति येन वा पुण्यं स्वर्गं भुञ्जन्तिचाक्षयं ॥
गङ्गाद्वारे प्रयागे वा भद्रकर्णह्रदे तथा ॥२९॥
अभिषेकन्नरः कृत्वा ब्रह्मचारी जितेन्द्रियः ॥
पितृदेवार्चनरतो ह्यतिथीनथ याचकान् ॥३०॥
विधूतः सर्वपापेभ्यो याति ब्रह्म सनातनः ॥
यस्य पुत्रोऽथवा पौत्रो गयां गच्छेत पण्डितः ॥३१॥

कुरुक्षेत्रे प्रयागञ्च तीर्थे रुद्राश्रमेषु च ॥
उद्दिश्य पितरं तत्र श्राद्धं कुर्वीत बुद्धिमान् ॥३२॥
वर्ज्जयेद्दीनवृद्धांश्च कुब्जविकटवामनान् ॥
चक्षुर्हीनश्च वर्जेतहीनाङ्गवधिरानपि ॥३३॥
वृषली वर्जयेन्नित्यं श्राद्धकाले तथैव च ॥
विप्रान् श्रेष्ठतमान् श्राद्धे ब्रह्मचारी जितेन्द्रियः ॥३४॥
स्वदाररतिसन्तुष्टानाहिताग्नीनसूयकान् ॥
स्वाध्यायनिरतान्विप्राञ्छाद्धकाले तु भोजयेत् ॥३५॥
शीलवृत्तिसमाधिस्थान् सत्यवादीदृढव्रतान् ॥
एतान् विप्रसमाचाराञ्छ्राद्धकाले नियोजयेत् ॥३६॥
आसनेकुतपोपात्रान्नियुज्यादुत्तरामुखं ॥
शुचिवस्त्रोत्तरश्चापि पिण्डत्रयन्निवेदयेत् ॥३७॥
प्रथमं पितरं मन्ये द्वितीयञ्च पितामहं ॥
तृतीयं नामतः पिण्डमेष मे प्रपितामहः ॥३८॥
एवं स श्रावयित्वा तु यश्च भोजयति द्विजान् ॥
शाल्यन्नं खड्गमांसेन पायसं मधुसर्पिषा ॥३९॥
सुवर्णदक्षिणान्दद्यात्सहिरण्यतिलोदकं ॥
पिण्डनिर्वापणञ्चैव कर्तव्यं दर्भसंस्तरे ॥४०॥
हुत्वाग्निं सर्पिषा युक्तं मन्त्रोयं श्रूयतामिति ॥
भगवन् ! पितरं मह्यं प्रीणये पितृदैवतं ॥४१॥
त्रिसप्तकुलजानान्तु तृप्तिं यास्यन्ति ते दिवं ॥
प्रदक्षिणं कृताः सप्तत्रयो वाथ च कारयेत् ॥४२॥
पिण्डनिर्वापणं कुर्यादपसव्येन पाणिना ॥
प्रथमं निर्वपेत् पिण्डमुद्दिश्य पितरन्नरः ॥४३॥
पितामहन्तथोद्दिश्य निर्वपेत द्वितीयकं ॥
तृतीयन्निर्वपेत् पिण्डमेष मे प्रपितामहः ॥४४॥
तिलोदकेन सिञ्चेत प्रणम्य शिरसा क्षितिं ॥
यदि ते नरकं प्राप्त दुर्गतिं वा तरन्ति ते ॥४५॥
अनेन विधिना दत्वा स्पृशेद्वामेन दक्षिणं ॥
श्राद्धेन सपितृंस्तेन यावदासप्तमं कुलं ॥४६॥
उद्धृत्य नरकाद्देवि ! स्वयं स्वर्गे च मोदते ॥
येषां पुत्रादुराचाराः पितृदैवतवर्जिताः ॥४७॥
न च तीर्थानि सेवन्ते ये नराः पापकर्मिणः ॥

ते नरा नरकं यान्ति दुःखं वा प्राप्नुवन्ति च ॥४८॥
एवं शुभाशुभं कर्मलभन्ते स्वकृतैर्न्नराः ॥
दानेन भोगमैस्वर्यं ब्रह्मचारी जितेन्द्रियः ॥४९॥
शीलवान् रूपसम्पन्न उपवासैस्तु शीलवान् ॥
उभाभ्यां दानपुण्याभ्यां स्वर्गे मर्त्ये च पूज्यते ॥५०॥
तपसा स्वर्गमाप्नोति दीर्घमायुरहिंसकः ॥
गुरुशुश्रूषया विद्यां न्यायान्मोक्षञ्च विन्दति ॥५१॥
जपस्वाध्यायकर्त्ता च दीर्घमायुर्विकिल्विषः ॥
एष श्राद्धविधिः प्रोक्तः किम्भूयः श्रोतुमिच्छसि ॥५२॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे षोडशोऽध्यायः ॥१६॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

सप्तदशो ऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

किं कर्म सुकृतं कृत्वा देहमुत्सृज्य ते नराः ॥
मृत्युलोकमनुप्राप्य नरकन्न प्रपद्यते ॥५३॥
शुभां वा गतिमाप्नोति कां गतिं प्रतिपद्यते ॥
रूपवान् रूपसौभाग्यगुणवन्त कथं भवेत् ।५४॥
एतदिच्छाम्यहं श्रोतुं भगवान् ! वक्तुमर्हसि ॥

॥ महेश्वर उवाच ॥

श्रूयतां कर्मणा येन नरकं चारुहासिनि ॥५५॥
मृत्युलोकमनुप्राप्तः स्वप्नान्तेऽपि न पश्यति ॥
अहिंसकाः कृतज्ञाश्च सत्यवादिदृढव्रताः ॥५६॥
क्षान्ता दान्ता विनीताश्च जितक्रोधो जितेन्द्रियाः ॥
परदारनिवृत्ताश्च स्वदारऋतुगामिनः ॥५७॥
मातापितृभ्यां शुश्रूषा देवतातिथि पूजकाः ॥
निवृत्ता मधुमांसाभ्यां परस्वहरणे तथा ॥५८॥
न पिवन्ति च ये मद्यं सदा ध्यानपरायणाः ॥
माधुर्ययुक्ताः सततं नित्यञ्च प्रियवादिनः ॥५९॥
अतिथिं गुरुवृद्धानां सर्वसत्वहिते रताः ॥
दीनान्धातुरसत्वानामनुकम्पादयापराः ॥६०॥
एवंशीलसमायुक्ताः गच्छन्ति परमाङ्गतिं ॥

॥ देव्युवाच ॥

किं कर्म सुकृतं कृत्वा लोकान्तं लभते नरः ॥६१॥
भगवन् ! कर्मणा केन वर्त्तन्ते ह्यन्तरा भवेत् ॥
कथं पारयते प्राणान्निराहारो निरोदकः ॥६२॥
आहारः कीदृशं वापि भोजनं वा कथं भवेत् ॥
एतदिच्छाम्यहं श्रोतुं भगवन् ! वक्तुमर्हसि ॥६३॥

॥ देवदेव उवाच ॥

श्रूयतां कर्मणा केन लोकान्तं लभते गतिम् ॥
बालं वृद्धं शिशुं वापि गोवृषं कपिलान्तथा ॥६४॥
गुर्विणीं घातयेत्स्वस्थां तथा विश्रम्भघातकाः ॥
बहुभृत्यदरिद्रो वा स्वामिनो लेखकारकः ॥६५॥
एतेषामेव नो हन्ति प्राणैर्वा मोक्षयेद्यदि ॥
तेषां प्राणातिपापानां मृतानां मृत्युशासने ॥६६॥
मृत्युर्विमृश्यते तत्र निश्चयन्नाधिगच्छति ॥
यदा विमृष्यते तत्र किङ्कृतं विकृतम्भवेत् ॥६७॥
मृतं पर्युषितं यत्र तद् गृहं ह्यशुचिर्भवेत् ॥
न तत्र बैश्वपित्र्यं वा कुर्यात्संवत्सरन्नरः ॥६८॥
बलिभिक्षाश्च यो दद्यात् पितृश्राद्धं करोति यः ॥
नहि तस्य फलं दाता भुज्जीतेह परत्र च ॥६९॥
फलन्तस्योपभुञ्जन्ति ये स्वरा भुविका नराः ॥
तस्माद्रात्रौ मृतो देवि ! क्षिप्रं निर्वास्यतां गृहात् ॥७०॥
भूम्या भागे तृतीयायां वाह्यतः स्थापयेन्नरः ॥
एवमल्पेन कालेन तद् गृहं सेवयेच्छुचिः ॥७२॥
ब्राह्मणस्य दशाहेन द्वादशाहेन क्षत्रियाः ॥
तथा विंशतिरात्रेण गृहं वैश्यस्य शुद्ध्यति ॥७३॥
शूद्रस्य तु वरारोहे गृहं मासेन शुद्ध्यति ॥
चतुर्णामपि वर्णानामेतच्छौचंविधीयते ॥७४॥
न क्रिया क्रियते यस्य मृतस्यार्थे तु बान्धवैः ॥
तेषां शपति गोत्राणि निर्घृणा ये च मानवाः ॥७५॥
शपन्ति पितरस्तं हि न शौचं कर्तुमिच्छति ॥
शौचार्यकृतकर्मा यः सोपि याति परां गतिम् ॥७६॥
जायते यत्रदेशेसौ धनवांल्लोकवत्सल : ॥
एतत्तेकथितन्देवि ! किम्भूयःश्रोतुमिच्छसि ॥७७

॥ देव्युवाच ॥

स्वप्नो नानाविधो यश्च दूराध्वानेपि दृश्यते ॥
सचायं जीवभूतस्य देहमाश्रित्य तिष्ठति ॥७८॥
को वा व्रजति देशांस्तु प्रागदृष्टासु भूमिषु ॥
कथं शरीरमुत्सृज्य स्वप्नान्तेप्रति बुद्ध्यते ॥७९॥

अदृष्टमश्रुतन्देशन्तत्र गत्वा च पश्यति ॥
पुनर्निवर्तते जीवः स्वप्नान्ते प्रतिवुद्ध्यते ॥८०॥
यच्छ्रुतं यच्च नो दृष्टं तत्सर्वं कथ्यते पुनः ॥
एतदिच्छाम्यहं श्रोतुं परं कौतुहलं हि मे ॥८१॥
रहस्यमेतद् भवगन् ! कथयस्व महेश्वर ! ॥

॥ देवदेव उवाच ॥

यदिदं मन्यसे देवि ! जीवो देहन्न सन्त्यजेत् ॥८२॥
स्वपतो जाग्रतो वापि नरः स्वप्नानुदर्शनात् ॥
दृष्टन्न स्मरते नित्यं श्लेष्मप्रकृतिमानुषः ॥८३॥
यत्किञ्चित्पश्यते स्वप्ने शुभं वा यदि वा शुभं ॥
विपरीतफलं तेषां स्वप्नानामशुभं व्रजेत् ॥८४॥
यश्चेन्द्रियसमायुक्तं वायोशीघ्रतरंमनः ॥
मनो व्रजति तं देशं जीवस्तत्रैव तिष्ठति ॥८५॥
शरीरं रक्ष्यते जीवः सर्वेषामेव प्राणिनां ॥
न जीवेन विनादेहोदेहो जीवन्न मुञ्चति ॥८६॥
जीवः संरक्षते सर्वं न च जीवः परित्यजेत् ॥
जीवः शरीरन्त्यजति उष्णंशीतं परित्यजेत् ॥८७॥
विपरीतानि पश्यन्ति यदा ह्यायुःक्षयो भवेत् ॥
व्याधयो वधबन्धाश्च वेदना चातुला भवेत् ॥८८॥
दुःखं शोकं भयं क्रोधं तृष्णा भुक्षा पिपासया ॥
वातपित्तविकारेण श्लेष्मणां स्वप्नदर्शनं ॥८९॥
एतत्ते कथितं देवि ! जीवानामागतिङ्गतिं ॥
शुभाशुभानां स्वप्नानां गतिः सा सर्वदेहिनां ॥९०॥
वातिकाः पैत्तिकाश्चैव श्लेष्मिकाः सन्निपातिकाः ॥
रात्रिभागे चतुर्थे तु ग्राह्याः शेषास्तु निस्फलाः ॥९१॥
दुःस्वप्नमशुभं दृष्ट्वा पुनर्निद्रान्निषेवयेत् ॥
प्रसुप्तः सुशुभं दृष्ट्वा ह्यशुभन्तस्य नश्यति ॥९२॥
मृत्युप्राप्ते ह्यरिष्टे वा आदौ संरक्षते शुभं ॥
कल्यमुत्थाय स्वप्नन्ति शुचिर्भूत्वा समाहितः ॥९३॥
स्नानार्द्रशुक्लवासास्तु देवदेवाय शूलिने ॥
उमास्कन्दसमेताभ्यां स्वयम्भुवे महात्मने ॥९४॥
कृत्वा प्रणामं ताम्पूज्य जप्यं दुःस्वप्ननाशनं ॥

यथोत्पन्नेषुस्थानेषु धूपगन्धानुलेपनैः ॥९५॥
एतैर्देवार्चनं कृत्वा ब्रह्मविष्णुमहेश्वरान्॥
प्रणम्य शिरसा शुद्धो वटाश्वत्थौ च पादपौ ॥९६॥
परिपूज्य च बाहुभ्यां पूर्वन्दद्याज्जलान्जलिम् ॥
एवमस्य विधिंकृत्वा दुःस्वप्नस्तस्य नश्यति ॥९७॥
यथाविभववित्तैश्च तिलमाषयवाक्षतान् ॥
दद्याद्विप्रे यथा शक्त्या गोसुवर्णन्च दक्षिणाम् ॥९८॥
ताम्रपात्रेघृतन्चैव दद्यादाभरणानि च ॥
पात्रं द्विजेभ्यो दातव्य दुःस्वप्नन्च प्रणश्यति ॥९९॥
गत्वा गङ्गाह्रदे पुण्ये गत्वां चापि महाह्रदे ॥
धर्मारण्यं गयां गत्वा सावित्रीं सन्ध्ययोर्जपेत् ॥९००॥
जलाभिषेकं कृत्वा तु ब्राह्मणान्तर्पयेच्छुचि ॥
दुःस्वप्नान्मुच्यतें तेन सर्वदुष्कृतनाशनं ॥१॥
एवं शुभाशुभं कर्म मया प्रोक्तं वरानने ॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे

सप्तदशोऽध्याय ॥१७॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

अष्टादशोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

हविर्विप्रा महादेव ! वेदाध्ययनतत्परः ॥
किन्तु वेदस्य तत्पुण्यं भारताद्वा महेश्वर ! ॥३॥
नूनं तुलाधिकं वापि किन्तु वेदेषु भारतः ॥
किं पुण्यं भारतं वापि वेदाध्याये च संशयः ॥४॥
केन वा तपसाग्रेण यजनाध्ययनेन वा ॥
एतदिच्छाम्यहं श्रोतुम्भगवन् ! बक्तुमर्हसि ॥५॥

॥ महेश्वर उवाच ॥

किं पुण्यमन्यसे देवि ! वाक्यं वेदेषु भारते ॥
साङ्गोपाङ्गेषु वेदेषु शास्त्रेषु विविधेषु च ॥६॥
भारतं पञ्चमो वेद इतिहासेति नामतः ॥
अनुग्रहार्थं शूद्राणां व्यासेनामिततेजसा ॥७॥
ज्ञानमुत्पादितं पुण्यं ज्ञात्वा यान्ति पराङ्गतिम् ॥
ज्ञास्यन्ति चतुरा वर्णा वेदाञ्चैव न संशयः ॥८॥
यः समाप्तामिमान्देवि ! पठेद् भारतसंहितां ॥
यजुर्वेदं द्विजो यस्तु भारतज्ञाश्च भामिनि ॥९॥
श्रूयतां कारणन्देवि ! भारतंज्ञो यथाविधि ॥
साङ्गाश्च चतुरोवेदा भारतञ्चैव मेकतः ॥१०॥
एवन्देवैश्च दैत्यैश्च समेत्य तुलया धृतं ॥
अप्रमेयमतीतैश्च वर्तमानैरनागतैः ॥११॥
यस्माच्छ्रुतिशतैश्चापि महात्मशुभविस्तरैः ॥
चतुर्भिरधिकं वेदैर्भारतं न समे तुला ॥१२॥
तस्माच्च त्रिषु लोकेषु महाभारत उच्यते ॥
यः पठेत नरो नित्यं शुचिर्भूत्वा समाहितः ॥१३॥
भारतन्धारयेन्नित्यं श्लोकमेकन्तु यः पठेत् ॥
यदन्हा कुरुते पापं तदन्हा तस्य नश्यति ॥१४॥

किं पुनर्ब्राह्मणो वेद भारतं पठितेति वा ॥
यः पठेद् ब्रह्मचारी तु श्रृणु तस्यापि या गतिः ॥१५॥
यावन्ति रोमकूपानि तस्य गात्रे वरानने ॥
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥१६॥
यदा मानुष्यकेलोके कदाचित्कालपर्ययात् ॥
ज्ञानविज्ञानसम्पन्नश्चतुर्वेदो भवेद् द्विजः ॥ १७॥
शीलवान् रूपसम्पन्नस्सर्वसत्वानुकम्पकः ॥
अहिंसको मृदुर्दान्तो भारतज्ञो भविष्यति ॥१८॥
साङ्गोपाङ्गेषु वेदेषु शास्त्रेषु विविधेषु च ॥
विमृश्यमाणे सर्वापि भारतज्ञः समः श्रुतः ॥१९॥
श्रुतीनामाकरो ह्येष रत्नानामिव सागरः ॥
सदेवासुरगन्धर्वाः सकिन्नरमहोरगाः ॥२०॥
न तद्विद्यति त्रैलोक्ये भारते यन्न गीयते ॥
ज्ञानानां परमं ज्ञानं पवित्राणां पवित्रकं ॥२१॥
माङ्गल्यं मङ्गलानाञ्च योगानां योग एव च ॥
ध्यायन्ति पुण्यकर्माणाः शान्ति परममुत्तमं ॥२२॥
शूद्रयोनिप्रसूतस्य जिह्वाग्रे यस्य तिष्ठति ॥
शान्तिपर्वणि शुद्धात्मा शूद्रः सम्पद्यते द्विजः ॥२३॥
वेदानामितिहासोऽयं सोपि वेदस्य पारगः ॥
सोपिमान्यश्च पूज्यश्च यथाविप्रषडङ्गवित् ॥ २४ ॥
धर्मानुशासनयोनिः पूज्यः शूद्रोपि शीलवान् ॥
अक्षयं लभते दानं शूद्रः शीलगुणान्वितः ॥ २५॥
यः पठेत नरो नित्यं श्रद्धधानो जितेन्द्रियः ॥
यदा देहपरित्यागः कदाचित्कालपर्ययात् ॥२६॥
कल्पकोटिसहस्राणि ब्रह्मलोके महीयते ॥
ब्रह्मलोकपरिभ्रष्टः पुनर्मानुषताङ्गतः ॥२७॥
मानुष्यमागतो भूपो भवन्ति ज्ञानसम्पदः ॥
नानाविद्यार्थश्रोता च श्रुतिस्मृतिपरायणः ॥२८॥
बुद्धिविद्यातपोदानवेदानां पारगस्तथा ॥
विमृष्यमाणः शास्त्रेषु बुद्धिमावुद्धिविस्तरः ॥२९॥
यां यां गतिं चिन्तयते तामेव लभते पुनः ॥
समाहितमना नित्यं श्रावयेत श्रृणोति वा ॥३०॥
नान्धो न वधिरो मूर्खो न हीनो न च दुर्बलः ॥

न जडो न च मूकत्वं न हीनाङ्गो न वामनः ॥३१॥
सर्वलक्षणसम्पन्नः सर्वज्ञानप्रतिष्ठितः ॥
इदं श्रेष्ठतमंलोके भविष्यति न संशयः ॥३२॥
यानि कानि च शास्त्राणि प्रवदन्ति मनीषिणः ॥
नापुत्राय प्रदातव्यन्नाशिष्याय कदाचन ॥३३॥
ना वेदविदुषि विप्रे न चानिर्जितकर्मणि ॥
इदं श्रेष्ठाय शिष्याय पुत्रायानुगताय च ॥३४॥
अत्यर्थं यत्र सुश्रूषां करोति विनयान्वितः ॥
तस्य देयमिदं देवि ! एवं वा विद्यते न वा ॥३५॥
प्रयत्नेन गृहीतव्यं शास्त्रमेतत्सुखावहं ॥
प्रकाशार्थमगूढार्थं हितार्थं सर्वदेहिनां ॥३६॥
वोधनं ह्यबुधानाञ्च बुधानां बुद्धिवर्धनं ॥
श्रद्धेयमेतत् परमं श्रद्धातव्यं सदा बुधैः ॥३७॥
धर्मश्रुतिभूतमिदं संवादमिदमद्भुतं ॥
एतत्सर्वं समाख्यातं यथातत्वमुदाहृतं ॥३८ ॥

इति शिवधर्म उमामहेश्वरसंवादे भारतकीर्तनन्नाम
अष्टादशोऽध्यायः ॥१८॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

ऊनविंशोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

अथ विष्णुस्तथा देवा ऋषयो व्यास एव च ॥
केन ते भगवन् तुष्टः कथम्प्रीतिः प्रजायते ॥३९॥

॥ विष्णुरुवाच ॥

परिवादो ब्राह्मणानां मम विद्वेषणम्भवेत् ॥
ब्राह्मणं पूजयेन्नित्यं पूजितोहं न संशयः ॥४०॥
नित्याभिवादं विप्राणां भुक्ता च चरणौ स्वकौ ॥
तेषां तुष्यामि मर्त्यानां यश्च चक्रे वलिं हरेत् ॥४१॥
वामनं ब्राह्मणन्दृष्ट्वा वाराहं क्रीडितं जले ॥
उद्धृतान्धरणीन्दृष्ट्वा मूर्ध्नि कुर्वन्ति ये नराः ॥४२॥
न तेषामशुभं किञ्चित्कस्मलं च प्रणश्यति ॥
पूजितञ्च जगत्तेषां सदेवासुरपन्नगाः ॥४३॥
स्वेन रूपेण तेषाञ्च पूजां गृह्णामि तत्वतः ॥
पूज्यमानञ्च नान्योस्ति यावल्लोकः प्रतिष्ठितः ॥४४॥
अन्यथा हि सदा पूजामन्ये कुर्वन्त्यशुद्धयः ॥
नाहन्तान् प्रतिगृह्णामि न सन्तुष्ट करी मम ॥४५॥
एतानि पूजयेन्नित्यं तेषां तुष्याम्यहं ध्रुवं ॥

॥ धर्म उवाच ॥

चक्रपादौ वराहश्च ब्राह्मर्णश्चैव वामनं ॥४६॥
उद्धृतान्धरणीश्चैव किमर्थं वै प्रशंसति ॥
भवान् सृजति भूतानि भवान् संहरते प्रजाः ॥४७॥
प्रकृतिः सर्व भूतानां मर्त्यानाञ्च सनातनः ॥
अनादिनिधनो देवः सर्वभूतेश्वरः प्रभुः ॥४८॥
एष ते संशयो मह्यं तत्वतस्तं प्रचक्षते ॥

॥ देवदेव उवाच ॥

संप्रहृष्य ततो विष्णुरिदं वचनमब्रवीत् ॥४९॥
चक्रेण निहता दैत्याः पद्भ्यां क्रान्ता वसुन्धरा ॥
वामनं रूपमास्थाय जितो राजा मया वलि ॥५०॥
परितुष्टोस्म्यहं तेषां कर्मणा सुरसत्तम ॥
ये तेषां पूजयिष्यन्ति नास्ति तेषां पराभव ॥५१॥
अपि वा ब्राह्मणं दृष्ट्वा ब्रह्मचारिणमागतं ॥
ब्राह्मणस्याहुतिं कृत्वा ह्यमृतन्तस्य भोजनं ॥५२॥
ऐन्द्रीशान्तिमुपाश्रित्य आदित्याभिमुखस्थितः ॥
सर्वतीर्थेसु सुस्नातो भवेत् शुद्ध्य किल्विषैः ॥५३॥
पठेद्वा श्रावयेद्वापि श्रुत्वा वा लभते सुखं ॥
भुञ्जन्ति पितरो देवा हव्य कव्यमिवाक्षयं ॥५४॥
यः श्रावयति विप्रेन्द्रः सर्वेषु प्रयतो नरः ॥
ऋषीणान्देवतानाञ्च पितृणाञ्चापि नित्यशः ॥५५॥
भवत्यभिमतश्चैव धर्मेषु नियतात्मनां ॥
कृत्वापि पातकं कर्म महापातकवर्जितः ॥५६॥
रहस्य धर्मश्शृण्वन्तु सर्वपाप प्रमोक्षणं ॥
एष धर्मो रहस्यश्च देवतानामुदाहृतः ॥५७॥
व्यासदृष्टम्मया प्रोक्तं सर्वलोकैर्नमस्कृतं ॥
पृथिव्यां रत्नपूर्णायां ज्ञानं त्वेदमनुत्तमं ॥५८॥
इदमेतत्ततः श्रेय इत्याहुः परमर्षयः ॥
एतत्प्रशस्तं गुह्यानि पुण्यं वेदेषु गीयते ॥५९॥
अधीयते नरोनित्यं प्रयतः स्थितमानसः ॥
आयुष्यं परमन्दिव्यमिह लोके परत्र च ॥६०॥
रक्षोघ्नश्च यशस्यञ्च पुण्यवर्धनमेव च ॥
उभे सन्ध्येस्य शद्यस्तु प्राणायाम करोति यः ॥६१॥
ध्यायेत मनसा युक्तौ यत् किञ्चित्कल्मषं भवेत् ॥
तेषान्तद्ध्यानयोगेन प्रदहेत् सर्वपातकं ॥६२॥
तस्माद् ध्यायेत सततं पुरुषेण विपश्चिता ॥
प्राप्यन्ते गतयस्तेषां संसारपरिवर्त्तिभिः ॥६३॥
तामसोस्तामसी यान्ति राजसा रज एव च ॥
सात्विकं सत्वदीयेन सर्वमेव व्रजन्ति ते ॥६४॥

अधस्तात्तामसी वृत्तिर्मध्यस्थानन्तु राजसं ॥
ब्रह्मलोकन्तु विज्ञेयंस्थानं सत्वस्य तत्वतः ॥६५॥
सर्वभूतेषु यः पापं सोन्धस्तमसि मज्जति ॥
राजसैः कर्मभिः श्रेष्ठैरिन्द्रलोकः प्रपद्यते ॥६६॥
सात्विकैः कर्मभिः श्रेष्ठैर्ब्रह्मलोकं प्रपद्यते ॥
ज्योतिः स्थानानि सर्वाणि गतिः स्यात्पुण्यकर्मणां ॥६७॥
पुण्यपापेन मानुष्यं पापेनैकेनतिर्यगां ॥
ज्योतिःस्थाननिधिष्यामि लोकानाङ्गतयः सदा ॥६८॥
तेषां नित्यस्थितावेतौ द्वारेचन्द्र दिवाकरौ ॥
पितृयानेन ते यान्ति येषां द्वारे निशाकरः ॥६९॥
अयनन्दक्षिणंप्राप्य पितृलोकं व्रजन्ति वै ॥
ये तु श्रद्धा तपोदीक्षा जाप्ये व्रतपरायण ॥७०॥
देवयानेन सूर्यन्ते भित्वा देवि व्रजन्ति वै ॥
ये तु सांख्येन सिद्ध्यन्ति योगयुक्तिसमन्विताः ॥७१॥
न तेषां चन्द्रसूर्याभ्यां विन्दन्ति पवदीं सुराः ॥
निर्मलाः सर्वनिर्मुक्ताः सङ्गस्नेह विवर्जिताः ॥७२॥
सुखावसानं वा व्यक्तं सर्वमुत्सृज्य गच्छति ॥
म्रियते च शुभाचारास्तस्य देवस्तदन्तरं ॥७३॥
अग्निचन्द्रानिलां कृत्वा श्राद्धो वै तमुपाश्नुते ॥
भूमावथ सदर्भायां बान्धवैरुपपादितैः ॥७४॥
निरन्तरमिदं व्याप्तं सोमपुत्रैर्महात्मभिः ॥
आकाशे यत्र चैते वै दृश्यन्ते पुण्यकर्मणा ॥७५॥

इति शिव धर्मशास्त्रे उमामहेश्वरसंवादे
एकोनविंशतितमोऽध्यायः ॥१९॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

विंशोऽध्यायः

ॐ नमः शिवाय

॥ देवदेव उवाच ॥

एकस्तम्भे नवद्वारे त्रिस्थाने पञ्चसाखिके ॥
एतस्मिन्नन्तरे देवि ! सद्वृत्तस्तु सदा वसेत् ॥७६॥
उदितोदितविप्रस्य क्रियायुक्तस्य धीमतः ॥
विदन्ति सखिलान् वेदान् देहे षड्वृषलः स्मृताः ॥७७॥
क्षत्रियाश्च स्मृताः सप्त वैश्याश्चाष्टौ समावृताः ॥
पञ्चविंशत्तथा शूद्रा यच्छेषं सोत्र ब्राह्मणः ॥७८॥
कामक्रोधश्चलोभश्च रागो द्वेषश्च पञ्चमः ॥
महाभोगाश्च इत्येते देहे षड्वृषलाः स्मृताः ॥७९॥
कामः क्रोधस्त्वहङ्कार अभिमानस्त्वमत्सरः ॥
पारुष्यं क्रूरता चैव परिवर्त्तिश्च क्षत्रियाः ॥८०॥
श्लक्ष्णता निकृतिर्मायासूयाशाव्यमनार्जवे ॥
नृशंसता वै कार्पण्यं वैश्यस्याष्टौ प्रकीर्तिताः ॥८१॥
तृष्णा बुभुक्षा निद्रा च पैशुन्यमनृतन्तमः ॥
अश्रद्दधानं शठता आत्मश्लाधा प्रशंसता ॥८२॥
अनिवृत्तविषादश्च प्रमादो हीनसत्वता ॥
भयं विक्लवता क्षुद्रः पापतामन्यसेबताः ॥८३॥
निर्ल्लज्जानाशकाहिंसा अनवस्था न यन्त्रताः ॥
एते शूद्राः पञ्चविंशत्तिष्ठन्तिदेहमाश्रिताः ॥८४॥
यस्मिन् ने तेन दृश्यन्ते स विद्वान् ब्राह्मणः स्मृतः ॥
येषु येषु च भावेषु यत्कालं वर्तते द्विजः ॥८५॥
तेषु तेषु च यत्काले न लिङ्गगतिरुच्यते ॥
यावज्जुहोति जपति यावद्दानं प्रयच्छति ॥८६॥
ब्राह्मणो भवते तावच्छेषकालंयथेतरः ॥८७॥
अलोलजिव्हाः समलोष्टकाञ्चनः गतस्पृहा रागविवर्जितो वशी ॥
जितेन्द्रियः सङ्गविमुक्त दोषवान् भगान्निवृत्तो भगवानिहोच्यते ॥८८॥

इदृशा ध्यानयुक्ता हि ब्राह्मणाः संशितव्रताः ॥
येषां श्राद्धे नियुज्यन्ते तृप्तास्तेषां पितामहाः ॥८९॥
क्लीकुक्कुटमार्जारश्वशूकरखरोरगैः ॥
नारीभिश्चाप्यपूर्वाभिर्न्नस्थेयं पितृकर्मणि ॥९०॥
अक्षयं पितरो श्नन्ति श्राद्धं श्रद्धोपपादितं ॥
परणे विविधा दत्तं मन्त्राग्नि शशिपालितं ॥९१॥
अपां समीपे दुर्वायां दभास्तीर्य्याग्रदक्षिणां ॥
मधुव्यामिश्रभोक्तव्यं तुष्यन्ति प्रपितामहः ॥९२॥
पितरस्तोषिता येन देवतास्तेन तोषिताः ॥
एष ते विधिरुद्दिष्टा बहुविस्तारसोमया ॥९३॥
यानि तानि च गुह्यानि रहस्यानि गुहानि च ॥
प्रकाशितानि सर्वाणि धर्माणि विविधानि च ॥९४॥
योसौ चरति धर्मात्मा स याति परमाङ्गतिं ॥
रुद्रज्ञानानि कर्माणि भाषितानि पुराणि च ॥९५॥
अर्चिता बाचका ये च लिखापयति श्रद्धया ॥
सर्वे यान्ति परं स्थानं यत्र वासा निरञ्जनः ॥९६॥
एतत्ते परमं योगं मया तत्त्वमुदाहृतं ॥९७॥

इति शिवधर्मशास्त्र उमामहेश्वरसंवादेविंशतितमोध्यायः ॥२०॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

एकविंशतितमोऽध्यायः

ॐ नमः शिवाय

उवाच देवी देवेशं शितिकण्ठम्महाप्रभुं ॥
पूज्यते भक्तिमद्देवो विप्रैस्तु ब्रह्मचारीभिः ॥९८॥
सुखोपविष्टमासीनमासने गोवृषध्वजं ॥
वैदूर्यमणिसञ्छन्ने बहुरत्नविभूषिते ॥९९॥
अभिगम्य तु तन्देवी प्राञ्जलिर्वाक्यमब्रवीत् ॥
सर्वो मे धर्म आख्यातः सप्तस्वरपरिच्छदः ॥१०००॥
किं शब्दः कीदृशो वर्णः कथं देवेन कीर्तितः ॥
कथमक्षरसम्प्राप्तः कथमङ्गे प्रतिष्ठितः ॥१॥
कथं हि देवदेवेन प्रोक्त आगीयते नृणां ॥

॥ भगवानुवाच ॥

श्रृणु देवि ! रहस्यानि गूढः स्थाने प्रकाशिताः ॥२॥
षड्जर्षभौ सगान्धारौ मध्यमं पञ्चमं तथा ॥
धैवतः सनिषादश्च स्वराः सप्त प्रकीर्तिताः ॥३॥
षड्जस्तु पद्मवर्णाभ्भ ऋषभः शुक्लवर्णकः ॥
हिरण्याभस्तु गान्धारो मध्यमः कुङ्कुमप्रभः ॥४॥
पञ्चमस्तु स्वरो रक्तो नानावर्णस्तु धैवतः ॥
निशादो मेघर्णवस्तु इत्येते स्वरवर्णकाः ॥५॥
मयूरः षड्जसन्नादी कुक्कुटस्त्वर्षभन्नदेत् ॥
अश्वो वदति गान्धारं मध्यमन्तु गवेदकः ॥६॥
उत्कृष्टं पञ्चमं विद्यात्कोकिलाभीरुतं स्वरं ॥
माण्डूको धैवतो ज्ञेयः कुञ्जरस्तु निषादवान् ॥७॥
अग्निना गीयते षड्ज ऋषभो ब्राह्मणेन तु ॥
सोमो गायति गान्धारं विष्णुना मध्यमः स्वरः ॥८॥
पञ्चमस्तु स्वरो गीतस्त्र्यम्बकेन महात्मना ॥
धैवतो वरुणोद्गीतो निशादो नारदेन तु ॥९॥

कण्ठे उत्तिष्ठते षड्ज ऋषभश्च शिरस्तथा ॥
नासिकायान्तु गान्धार उरसि मध्यमस्तथा ॥१०॥
पञ्चमस्तु स्मृतश्चोरो ललाटे धैवतस्तथा ॥
निशादः सर्वगात्रेषु विज्ञेयः स्वरचिन्तकैः ॥११॥
सप्त स्वरास्तु ये प्रोक्ता एकविंशतिमूर्च्छनाः ॥
ताना एकोनपञ्चाशत् स्थाने दैवतवर्णतः ॥१२॥
षड्जेन प्रीयते देव ऋषभेन महर्षयः ॥
गान्धारस्तु पितृन्नित्यं मध्यमस्तु महोरगान् ॥१३॥
पञ्चमेन स्वरेणाशु सर्वभूतसुखं भवेत् ॥
धैवतो यक्षगन्धर्वा निशादो राक्षसा हि वै ॥१४॥
अ आ षड्जस्वराः प्रोक्ता इ ई गान्धार इष्यते ॥
उ ऊ तु धैवतो ज्ञेय ऋ ॠ तु ऋषभः श्रुतः ॥१५॥
लृ लृ मध्यम इष्यन्ते ए ऐ तु पञ्चमः स्वरः ॥
ओ औ इति निशादस्तु स्वराक्षर विनिर्णयः ॥१६॥
वायव्यः सौम्य ऐशान्य ऐन्द्र आग्नेय एंव च ॥
याम्य नैर्ऋत इत्ये ते स्वराः षड्जादयो बुधैः ॥१७॥
ऊर्ध्वाधो वारुणीभागा मिश्रकस्तु यदृच्छया ॥

॥ देव्युवाच ॥

मासानाञ्च कथं चाष्टौ दिवसानां कथं विभो ! ॥१८॥
एतन्मे संशयो देव ! कथं पर्व च गीयते ॥

॥महेश्वर उवाच ॥

षडर्त्तुद्वादशा मासा दिवसास्त्रिंशदेव तु ॥१९॥
अग्ने प्रतिपदः प्रोक्ता द्वितीया नरसिंह च ॥
तृतीया देवराजस्तु चतुर्थ्यस्तु विनायकः ॥२०॥
पञ्चम्यान्तु श्रिया देवी महागौर्य्यस्तु षष्ठके ॥
सप्तम्यान्तु तथादित्य अष्टम्यामीश्वरस्तथा ॥२१॥
दुर्गा देवी नवम्यान्तु दशम्यान्तु पितामहः ॥
एकादश्यान्तु वसवो द्वादश्यां विष्णुरेव च ॥२२॥
ब्रह्मणस्तु त्रयोदश्यां चतुर्दश्यान्तथा शिवः ॥
पूर्णमास्यान्तथा सोम उभयोरपि पक्षयोः ॥२३॥
दिवसे सप्तमे भागे गीयते मधुरः स्वरः ॥
यदैवङ्गीयते पुंसा स्वरः संपूर्णलक्षणः ॥२४॥

तदा देवगणाः सर्वे दिवि घोषवती तदा ॥
दिव्यं शब्दन्तदा श्रुत्वा तथा हि वरवर्ण्णिनि ! ॥२५॥

॥ देव्युवाच ॥

एवं गायन्ति ये पुंसः स्त्रियो वापि प्रयत्नतः ॥
किं स्वरन्दीयते देव ! श्रोतुमिच्छामि तत्वतः ॥२६॥

॥ देवदेव उवाच ॥

आषाढमासे सम्प्राप्ते शुक्लकृष्णाष्टमी तथा ॥
गीयते सोपवासेनशुक्लवस्त्रशुचिर्न्नरः ॥२७॥
स्वर्गलोकमितो याति सुखञ्च परमम्भवेत् ॥
तथैव श्रावणे मासे शुक्लकृष्णाष्टमी तथा ॥२८॥
गीयते सोपवासेन गोसहस्रफलं भवेत् ॥
शुभे भाद्रपदेमासे शुक्लकृष्णाष्टमी तथा ॥२९॥
गीयन्ते सोपवासेन देवस्तुष्यति शङ्करः ॥
राजसूयस्य यज्ञस्य फलं प्राप्नोति मानवः ॥३०॥
तथैवाश्वयुजे मासे शुक्लकृष्णाष्टमीन्तथा ॥
गीयते उपवासेन नरमेधफलं लभेत् ॥३१॥
गीयते कार्त्तिके मासे शुक्लकृष्णाष्टमीन्तथा ॥
प्रयागेम्रियते यश्च तस्य पुण्यफलं लभेत् ॥३२॥
गीयते मार्गशीर्षेतु शुक्लकृष्णाष्टमीन्तथा ॥
अश्वमेधस्य साहस्रं फलं प्राप्नोति मानवः ॥३३॥
तथैव पौषमासे तु शुक्लकृणाष्टमीन्तथा ॥
गीयते सोपवासेन गोसहस्रफलं लभेत् ॥३४॥
रूपसौभागयसम्पन्नो जायते पूजितो नरः ॥
गीयते माघमासे तु शुक्लकृष्णाष्टमीन्तथा ॥३५॥
इह लोकसुखं प्राप्य परत्र च परां गतिं ॥
तस्य क्षयादिहागत्य जायते स महाधने ॥३६॥
तथैव फाल्गुने मासे शुक्लकृष्णाष्टमीन्तथा ॥
गीयते शुचिवस्त्रेण उपवास समाहितः ॥३७॥
ब्रह्मलोकमतिक्रम्य रुद्रलोके महीयते ॥
तस्यान्ते पुनरागत्य जायतें विपुले कुले ॥३८॥
ईश्वरश्चैव शूरश्चधनाढ्यश्चैव जायते ॥
उत्तमश्चैत्रमासे तु गीयते सुव्रतो यतः ॥३९॥

शङ्करो बासुदेवश्च परितुष्टो न संशयः ॥
सर्वत्र लभते पूजां रूपवान्धनवान्भवेत् ॥४०॥
नवालो म्रियते तस्य न च व्यसनमाप्नुयात् ॥
हंससारसयुक्तेन विमानेन स गच्छति ॥४१॥
बैशाखे गीयते यस्तु उपवासः समाहितः ॥
न मिथ्या न च सन्देहो महादेवश्च तुष्यति ॥४२॥
पुष्पकेन विमानेन स्वर्गलोके महीयते ॥
षष्टिं वर्षसहस्राणि देवलोके स तिष्ठति ॥४३॥
तस्यान्ते पुनरागत्य ज्येष्ठपुत्रश्च जायते ॥
गवाढ्यश्च धनाढ्यश्च पुत्रवान् रूपवान् भवेत् ॥४४॥
ज्येष्ठे मासे तु सम्प्राप्ते उपवासेन गीयते ॥
सर्वयज्ञफलावाप्तिः सर्वदानफलं लभेत् ॥४५॥
सर्वतीर्थफलञ्चैव प्राप्यते नात्र संशयः ॥
एतत्ते कथितन्देवि ! गीयमानेषु सर्वदा ॥४६॥
एतद् धर्म्यं यशस्यञ्च इहलोके परत्र च ॥
यश्चेमां गायते नित्यं यश्चेमां श्रृणुयान्नरः ॥४७॥
दुःखन्तु न तु सेवेत देवं पूज्येत गीयते ॥
श्राद्धकाले च सम्प्राप्ते यस्तुगायति मानवः ॥४८॥
तुष्यन्ति पितरस्तस्य हव्यकव्यमिवाक्षयं ॥
वास्तुमध्ये तु गीयेते वालरोगस्तु नश्यति ॥४९॥
क्षेत्रमध्ये तु गीयेत सर्व सस्याभिवर्धनं ॥
गोष्ठमध्ये तु गीयेत वर्धन्ते सर्वधेनवः ॥५०॥
राजवासे तु गीयेत ध्रुवश्च विजयी भवेत् ॥
जनमध्ये तु गीयेत तथैव कलिनाशनं ॥५१॥
मृत्युकाले श्रुतिं प्राप्य वियोनिं न स गच्छति ॥
पूर्वान्हे चापि गीयेत दुःस्वप्नञ्च प्रणश्यति ॥५२॥
एतत्ते कथितन्देवि ! किम्भूयः श्रोतुमिच्छसि ॥

॥ देव्युवाच ॥

यदि तुष्टोसि भगवन् ! देव ! कौतूहलं हि मे ॥५३॥
अतः परन्तु पृच्छामि व्युत्क्रमेण प्रगीयतां ॥
को दोषो भवते तस्य किञ्च भवति लक्षणं ॥५४॥

॥ देवदेव उवाच ॥

षण्मुहूर्त्तेषु वेलासु सुकृच्चैव प्रगीयते ॥
एवं सर्वानुपूर्वेण येन येन हि गीयते ॥५५॥
स्वरसप्तक्रमेणापि षण्मुहूर्ते तथैव च ॥
ऋषभः षड्जगान्धारौ चतुर्मुहूर्त गीयते ॥५६॥
मध्यम चतुर्म्मुहूर्त्ते पन्चमश्चतथैव च ॥
मध्यमन्चतुमुहूर्त्ते यथाक्रमेण गीयते ॥५७॥
चुतुर्मुहुर्त्तो धैवतो निशादश्च तथैव च ॥
भक्तिभावात्प्रगीतेन नास्ति दोषो मयाविदः ॥५८॥
अशंपूर्णं यदा गीतं विघ्नन्तस्य प्रदृश्यते ॥
पूर्वन्तावत् प्रवक्ष्यामि श्रृणु देवि ! यथाक्रमं ॥५९॥
नारदस्तुम्वुरादीनि गन्धर्वश्च हहा हुहू ॥
गन्धर्वाः सप्त इत्येते तेभ्यो व्याप्तमिदं स्वरैः ॥६०॥
गन्धर्वगीतवाद्येषु जगदासनकारिताः ॥
गीते चार्द्धं प्रमुक्तानां केषु मध्ये प्रगीयते ॥६१॥
प्रभाते तत्र विज्ञेयः सर्वभूतंसमागमं ॥
ऋषीणान्चैव सर्वेषां देवानान्च समागतां ॥६२॥
न प्रभातं प्रभातेन कोपेनाविष्ट देहके ॥
देवलस्य, तु शापेन ग्राहोभूत्तत्क्षणादपि ॥६३॥
तस्य शापप्रभावेन त्रिकूटो नाम पर्वतौ ॥
तस्मिन्दिव्य ह्रदे नूनं गन्धर्वोभूत्पपात सः ॥६४॥
एतस्मिन्नन्तरे काले जनयूथं समागतं ॥
तस्मिन्सरसि दुष्टात्माविरूपान्तर्जलेशयः ॥६५॥
आशीद् ग्राहो गजेन्द्राणां निपुरा केकंरेक्षणः ॥
दन्तोज्ज्वलमुखस्तस्मिन् कदाचिद्गजयूथपः ॥६६॥
शलिले पङ्कजवने यूथमध्यगतः सुखी ॥
खेलत्युत्पङ्कजवने यूथेन महतावृतः ॥६७॥
गृहीतस्तेन रौद्रेण ग्रहेणादृश्यमूर्तिना ॥
पश्यन्तीनां करेणूनां क्रोशन्तीनान्च दारुणां ॥६८॥
ह्रियते पङ्कजवने ग्राहेणादृश्यमूर्तिना ॥
व्यथितः स निरुद्वेगः पश्चिमामगमद् दिशां ॥६९॥
जगाम मनसा देवं शरणंमधुसूदनं ॥
प्रगृह्य पुष्पगग्रेण कान्चनं कमलोत्तमं ॥६०॥

आपद्विमोक्षमन्विच्छन् गजः स्तोत्रमनुस्स्मरन् ॥
भक्तिन्तस्यानुसंचिन्त्य नागस्यामेघसम्भवां ॥६१॥
उज्जहाराप्रमेयात्मा तरसश्चारिसूदनः ॥
सरस्थं दारयामास ग्राहं चक्रेण माधवः ॥६२॥
मोक्षयामास स गजं पापेभ्यः शरणागतः ॥
स हि देवलशापेन हाहा गन्धर्वसत्तमः ॥६३॥
ग्राहत्वमगमत्कृष्णाद्वधं प्राप्य दिवङ्गतः ॥
आपद्विमुक्तो युगपद् गज़ोगन्धर्व एव च ॥६४॥
एवं हि कथयामास तुष्टोस्मि वरवर्णिनि ॥
देवस्य वचनं श्रुत्वा धर्म्मं कथितसंस्मरन् ॥६५॥
हृष्टतुष्टा मया देव शिरसा वन्दितः प्रभुः ॥६६॥

इति भगवतो गीतपुराणे धर्मगुह्ये गजेन्द्रमोक्षणं उमामहेश्वरसंवादे एकविंशतितमोऽध्यायः ॥२१॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

द्वाविंशतितमोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

यदि विष्णुर्भदेद्देव स्वयं स्रष्टाजगत्पतिः ॥
तत्किमर्थंभवेद्देव पुत्रोयं मानुषस्य च ॥६७॥
एतत्कथयदेवेश इह कौतूहलं हि मे ॥

॥ महेश्वर उवाच ॥

भृगु नामसमाख्याातः ब्राह्मण ऋषिरूत्तमः ॥६८॥
तेन संरक्षणार्थाय प्रार्थितो मधुसूदनः ॥
यज्ञे पुरुषमेधन्तु यजेहन्तवतेजसाः ॥६९॥
असुरा राक्षसाः सर्वे तन्मे रक्ष जनार्दन ! ॥
वाचन्दत्वा ततस्तेन ऋषयेस्मै महात्मने ॥७१॥
न रक्षितस्तु धर्मज्ञश्चासुरैस्तु विमर्दितः ॥
ततस्तदोग्रतेजसा भृगुणाकेशवः प्रिये ॥८१॥
शापितस्तु वरारोहे गच्छत्वं नरकादधः ॥
धर्मशापप्रभावेन ऋषयेस्य वरानने ॥८२॥
नरकं शान्तयेद्देवि कथितस्ते जनार्दनः ॥
प्रथमं जन्म मत्स्याश्च वेदोद्धारकृतो यदि ॥८३॥
द्वितियं कूर्म्मजन्मस्तु सांदेह्येन दशां हरिः ॥
तृतीयस्तु वराहस्तु भक्षयेंदशुचिन्तथा ॥८४॥
हिरण्यकशिपोर्न्नाशं कुरुते च जनार्दनः ॥
चतुर्थं नारसिंहस्तु जन्म नारायणस्य तु ॥८५॥
पञ्चमे वामनो देवि प्रार्थयेत महावलीं ॥
उत्तानेन तु हस्ते नवलं वलिनि केशवः ॥८६॥
षष्ठं समस्तु बृष्णीयः सुतो दशरथस्य तु ॥
सप्तमे वासुदेवस्तु गृहकर्मस्वधिष्ठितः ॥८७॥
अष्टमे तु तथा जन्म चतुष्पात्कलिनास्थिते ॥
नवमे कल्किराजस्तु म्लेच्छानामन्तकारकः ॥८८॥

दशमे मत्स्यरुपेण अष्टपादावलम्वकः ॥
ब्राह्मणोपासनस्तस्यस्त्रैलोक्यस्थिति हेतवः ॥८९॥
ये पूजिताः सुराः सर्वे पूजितस्तु न संशयः ॥
विष्णोरपि प्रभुत्वेन शापानुग्रहकारकाः ॥९०॥
मौले तुष्टेन तु स्वर्गं नरकन्तद्विपर्यया ॥
तस्मान्न ब्राह्मणो मूलो भोगाद्याचरणादिषु ॥९१॥
ज्ञानमूलाः क्रियाः सर्वाः फलमूलाभियोजिताः ॥
एतत्ते कथितन्देवि ! किमन्यच्छ्रोतुमिच्छसि ॥९२॥

इति शिवधर्मशास्त्रे उमामहेश्वर संवादे
द्वाविंशतितमोऽध्यायाः ॥२२॥

॥ शिवाय नमः ॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उत्तरोत्तरे उमामहेश्वरसंवादे

प्रथमोऽध्यायः

॥ श्रीगणेशायनमः ॥

ॐ नमः शिवाय

कैलासशिखरासीनं देवदेवं जगद्गुरुम् ॥
पृच्छते शङ्करं देवी धर्माधर्म कथं हि मे ॥१॥
केनकर्मविपाकेन जायन्ते सधना नराः ॥
निर्धना केन जायन्ते कर्मणा पुरुषाधमाः ॥२॥

॥ ईश्वर उवाच ॥

श्रृणु देवि ! यथातथ्यं न चाहमनृतंवदे ॥
येनकर्मविपाकेन जायन्ते सधना नराः ॥३॥
नित्यं स्वद्रव्यसन्तुष्टाः परद्रव्येषु निस्पृहाः ॥
धर्मज्ञाः सत्यवादाश्च सर्वभूतहिते रताः ॥४॥
नित्यं ब्राह्मणदातारो देवतातिथिपूजकाः ॥
अतिथिर्यस्य मृष्टाशी पाकभेदो न विद्यते ॥५॥
प्रतिश्रयतडागानि वापीकूपप्रपाणि च ॥
भोजनानि विचित्राणि ब्राह्मणानां ददन्ति ये ॥६॥
भुञ्जते हुतशेषश्च देवब्रह्मरताः सदा ॥
तेन कर्मविपाकेन जायन्ते सधना नराः ॥७॥
निर्धनाः कर्मणा केन जायन्ते पुरुषाधमाः ॥
मोहिता मायमाविष्णोः परद्रब्येषु कांक्षिणः ॥८॥
नित्यं येऽधर्मसंयुक्ता नित्यं प्राणिवधेरताः ॥
हिंसकाश्चैव वाधन्ते शोणितान्तकरास्तथा ॥९॥
पृष्ठमांसानि खादन्ति मधुघाताश्च ये नराः ॥
भक्षन्ति मद्यमांसानि ब्रह्मघ्ना देवकण्टकाः ॥१०॥
क्षुद्राश्चासत्यवक्तारः पुत्रदारहिते रताः ॥
तेन कर्मविपाकेन जायन्ते निर्धना नराः ॥११॥
एतत्ते कथितं सत्यं धनिनां निर्धनस्य च ॥
श्रोतुमिच्छसि किन्देवि ! कथयस्व यशस्विनि ! ॥१२॥

॥ उमोवाच ॥

द्रव्यवस्त्र सुसम्पन्नाः सर्वाभरणभूषिताः ॥
तुष्टास्तु सर्वकामेषु जायन्ते केन कर्मणा ॥१३॥
दुःखिताः केन जायन्ते कर्मणा पुरुषाधमाः ॥
रजोगुण्ठितसर्वाङ्गा मारुतध्वस्तमूर्धजाः ॥१४॥
कुवर्णवदना दीना निवर्णवद्नास्तथा ॥
अकुलीनाश्चजायन्ते नरा वै केन कर्मणा ॥१५॥

॥ ईश्वर उवाच ॥

श्रृणु देवि ! यथा तथ्यं द्रव्यसम्पन्नमीश्वराः ॥
तृप्तास्तु सर्वकामेषु यथाजायन्ति ते नराः ॥१६॥
देवब्रह्मरता नित्यं सत्यवादी दृढव्रताः ॥
यथा शरीरमात्मानं पोषयन्ति यथेप्सया ॥१७॥
परदेहं तथा देवि ! पोषितं सर्वयत्नतः ॥
कृमिकीटपतङ्गानां वृक्षानाञ्च तथैव हि ॥१८॥
दया सर्वेषु कर्तव्या यथात्मनि तथा परे ॥
पृष्टमांसं न खादन्ति असत्यं न वदन्ति च ॥१९॥
तेन कर्मविपाकेन जायन्ते सधना नराः ॥
दुःखिताः कर्मणायेन क्षुद्रा वै मन्दभागिनः ॥२०॥
परेप्रेरित दुःखार्ता जायन्ते सुखवर्जिताः ॥
परद्रव्यहरा नित्यं भृत्यवृत्तैश्च भञ्जकाः ॥२१॥
खले खेत्रे गृहे वापि परद्रव्यं हरन्ति ये ॥
सुवर्णमणिमुक्तानि वस्त्रान्याभरणानि च ॥२२॥
आसनानि विचित्राणि धन धान्यमुपस्करं ॥
ये हरन्ति नरा नित्यं परद्रव्याणि मानवाः ॥२३॥
इह लोकगतानां तु एष एवविधिः स्मृतः ॥
परलोकगतानां तु धर्मंवक्ष्यामि तं श्रृणु ॥२४॥
नग्नाहीनाः क्षुधार्तास्तु कुचैलाः कुत्सिताः सदा ॥
व्याधिभिः परिभूतास्तु भाग्यभोगविवर्जिताः ॥२५॥
अनाथास्ते नरा नित्यं पीड्यन्ते सुखवर्जिताः ॥
दासत्वे चैव सुश्रोणि ! जायन्ते पुरुषाधमाः ॥२६॥
ते नराः क्षीणसर्वस्वाः परप्रेष्यत्वमागताः ॥
ऋणार्थिप्रार्थयन्ते च दासवृत्तिमुपागताः ॥२७॥

ये नित्यं पापकर्माणः परद्रव्येषु लुब्धकाः ॥
एतत्ते कथितं सर्वं किमन्यच्छ्रोतुमिच्छसि ॥२८॥

॥ उमोवाच ॥

स्वदारनिरता ये च परदारनिवृत्तकाः ॥
मातरं गुरुपत्नीं वा श्वश्रूं दुहितरं तथा ॥२९॥
रमन्ते भगिनीं चैव परनारींञ्च ये नराः ॥
तेषान्तु कीदृशो धर्मः कथयस्व विशेषतः ॥३०॥
परदारप्रशक्तानां नराणां पापकर्मणां ॥
श्रोतुमिच्छाम्यहं देव ! इदं कौतूहलं हि मे ॥३१॥

॥ ईश्वर उवाच ॥

स्वदारनिरतानां च धर्मंवक्ष्यामि तं श्रृणु ॥
नित्यं स्वदारसन्तुष्टाः परदारेषु निस्पृहाः ॥३२॥
ते मर्त्यलोकमुत्सृज्य स्वर्गलोकं व्रजन्ति च ॥
षष्ठिवर्षसहस्राणि वसित्वां च सुरैः सह ॥३३॥
स्वर्गलोक च्युता देवि यदा मानुष्यताङ्गताः ॥
चतुर्वेदास्तु जायन्ते ब्राह्मणा दुःख वर्जिताः ॥३४॥
रूपयौवन सम्पन्नास्सर्वाभरणभूषिताः ॥
परदारानिवृत्तानामेष धर्मविधिः स्मृतः ॥३५॥
परदारप्रसक्तानां श्रृणु तेषां च यत्फलं ॥
यौवनेन तु रूपेण गर्विताः कामकांक्षिणः ॥३६॥
अर्थेन यात्रया चैव दूतीनां प्रेषणेन च ॥
परस्त्रीप्रतारका ये श्रृणुतेषां यथा विधिः ॥३७॥
अशक्ताः पण्डकाः केचित्केचिन्नियमपण्डकाः ॥
यक्षप्रपण्डकाः केचित्केचिन्नियमपण्डकाः ॥३८॥
जात्यन्धपण्डकाः केचित्पञ्चैते पण्डकाः स्मृताः ॥
स्त्रीबेशधारिणश्चान्ये पर्यटन्ति नराधमाः ॥३९॥

स्त्रीणां लीलाविलासेषु नरा रङ्गोपजीविनः ॥
गायकास्त्यक्तलज्जाश्च नृत्तकाश्च भवन्ति ते ॥४०॥
यदा सत्येन म्रियन्ते परलोकंगता अपि ॥
शरीरगतिदोषैश्च गतिमेषाङ्करोम्यहम् ॥४१॥
कुम्भीपाकेषु पच्यन्ते दह्यन्ते पापकर्मणः ॥
षष्ठिवर्षसहस्राणि परदाररता नराः ॥४२॥
स्वदारनिरतानां च परदाराभिगामिनां ॥
एतत्ते कथितं सर्वं किमन्यच्छ्रोतुमिच्छसि ॥४३॥

इति शिवधर्म उत्तरोत्तरे महासंवादे प्रथमोऽध्याय ॥१॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उत्तरोत्तर महासंवादे

द्वितीयोऽध्यायः

ॐ नमः शिवाय

॥ उमोवाच ॥

केचिद्धास्तिनमारूढा नरा अन्येपि वाजिनं ॥
केन कर्मविपाकेन भुविराज्यं लभन्ति ते ॥४४॥
अन्येपि बहवो दीना रजसा विविधाः कृताः ॥
अग्रहो यान्ति धावन्तो नरा रूपविबर्जिताः ॥४५॥
हयपृष्ठगता यान्ति नरा वै केन कर्मणा ॥

॥ ईश्वर उवाच ॥

श्रृणुदेवि ! यथा राज्यं लभन्ति पुरुषोत्तमाः ॥४६॥
मम भक्त्या नरास्सर्वे नित्यं ब्रह्मरताश्च ये ॥
इत्याञ्जलिनमस्कारैर्दानस्नानैस्तथापरैः ॥४७॥
धर्मज्ञाः सत्यवक्तारः सर्वभूतहिते रताः ॥
दातारो होमयुक्ताश्च नित्यं धर्मरताश्चं ये ॥४८॥
परदुःखं न कुर्वीत ते नरा राज्यभागिनः ॥
दुःखिताः कर्मणा येन परंप्रेष्यगता नराः ॥४९॥
एतत्ते कथयिष्यामि श्रृणु सत्यं यशस्विनि ॥
आत्मम्भरा अधर्मज्ञा दैवद्रव्यहरा नराः ॥५०॥
ब्रह्मघ्ना गुरुनिन्दाश्च स्वामिनो निन्दकास्तथा ॥
न तु देवा न विप्राश्च न गावो नाग्नयस्तथा ॥५१॥
नास्तिकाः सततं ये तु ते नराः पापकर्मिणः ॥
परप्रेष्यकरास्ते तु नराणां बशवर्त्तिनः ॥५२॥
यच्च द्रव्यं भवेद् द्रव्यं श्रृणु तस्याप्युपद्रवं ॥
हरन्ति तच्च राजानश्चोराश्च बहवस्तथा ॥५३॥
कृषिश्च कुर्वते ये तु श्रृणु तेषामुपद्रवं ॥
शूकराश्च शुकाश्चैव मूषकाः शलभास्तथा ॥५४॥
मृगाश्च नाशयन्तिस्म अहन्यहनि वापितं ॥

विक्रीणयन्ति यत्किञ्चित्तदाभूतं प्रणश्यति ॥५५॥
कर्मसिद्धिं नपश्यन्ति सर्वारम्भेषु ते नराः ॥
दोषैः शरीरजैस्तीव्रैः प्रलयं यान्ति मानवाः ॥५६॥
मोहिता मायया विष्णोर्जायन्ते तेन दुःखिताः ॥
एकं शरीर मित्याहुः प्रजासु द्विविधं कृतं ॥५७॥
अण्डजाः स्वेदजा वापि तथा स्थावरजङ्गमाः ॥
राजानस्तुत्य देहास्तु स्वकर्मकृतजैर्गुणैः ॥५८॥
एकं जीवं मयासृष्टं शरीरश्च पृथक् पृथक् ॥
अहं देहे वसामिस्म म्लेच्छचाण्डालकस्य वा ॥५९॥
खरोष्ट्र नरहस्तीनां सर्वमध्यगतोह्यहं ॥
देहे तिष्ठामि सर्वस्य जङ्गमस्थावरस्य वा ॥६०॥
मया व्याप्तं जगत्सर्वं नान्यत् किञ्चित्प्रदृश्यते ॥
अहं शयामि देहस्थो मानुष्यस्य भ्रमाम्यहं ॥६१॥
अहं नृत्यामि देहस्थो सूक्ष्मः सर्वस्य देहिनः ॥
विष्णुः कर्त्ता विकर्त्ता च चक्रवत् भ्रामयेज्जगत् ॥६२॥
तेनैव मोहितं सर्वं भगलिङ्गाङ्कितं जगत् ॥
पञ्चभूतसमायुक्तं शरीरं सर्व देहिनां ॥६३॥
आत्मदोषकृतैः पापैः ते प्रयान्ति सुदुःखिताः ॥
नराणां ये नरा देविं नित्यं कर्मरताश्च ये ॥६४॥
ते तु सर्वे पराधीनाः स्वयं विक्रीतदेहिनः ॥
भोगिनां मन्दभाग्यानां यथाधर्मः शरीरजः ॥६५॥
अन्यत्किमिच्छसि श्रोतुं बदशीघ्रं यशस्विनि ॥

॥ उमोवाच ॥

मद्यपानरता नित्यं मद्यव्यसनमोहिताः ॥६६॥
मद्येषु च रतिर्येषामेतदिच्छामि वेंदितुं ॥

॥ ईश्वर उवाच ॥

श्रृणु देवि यथा मद्यं सर्वलोकजुगुप्सितं ॥६७॥
अप्रत्ययं हि लोकस्य अशौचन्न च गौरवं ॥
विनाशन्धनधान्यस्य गर्हितञ्च न लाघवं ॥६८॥

विकीर्तिनरकश्चैव मद्यपानात्प्रवर्तते ॥
प्रतिसिद्धं वरारोहे मुनिभिस्तन्निवारितं ॥६९॥
मद्यभोगप्रवृत्तस्य मूढः सर्वेन्द्रियस्य च ॥
स्मृतिमेधाश्च लज्जाश्च कुलमात्मानमेव च ॥७०॥
उष्णशीतभयं तृष्णां सुखदुःखं तथात्मनिः ॥
सर्व मेतन्न जानन्ति मद्यपाहतचेतसः ॥७१॥
मद्यव्यसनिनो ये च मद्यं ये सन्धयन्ति च ॥
ये शलात्कारमेयुश्च मद्यपानं ददन्ति ये ॥ ७२ ॥
मद्यविक्रयिणो ये तु मद्यं क्रीणन्ति चापि ये ॥
पिवन्ति ये नरा देवि! सर्वे ते फलभागिनः॥७३॥
इहलोकगतानां तु एषं धर्मविधिःस्मृतः॥
परलोकगतानां च पापं वक्ष्यामि तच्छृणु ॥७४॥
नटमुष्टिकचण्डाललुब्धकामस्य घातकाः॥
दासत्वं चैव सुश्रोणीजायन्ते पुरुषाधमाः॥७५॥
तिर्यक्त्वेऽपि समुत्पन्ना यदामृत्युमुपागताः॥
मद्यपानप्रवृत्तस्य श्रृणुदेवि यथागतिः॥७६॥
षष्टिवर्ष सहस्राणि कृमिभूतो महीतले ॥
कृमियोनिक्षये भूते पुनःपापकथाम्यहं॥७७॥
श्वानयोनिशतं गच्छज्जम्बूकः पञ्चविंशतिः॥
मद्यपानरता देवि भवन्ति पापकर्मिणः॥७८॥
मद्यपाननिवृत्तानां श्रृणु तेषां च यत्फलं ॥
सन्त्यक्ते कथयिष्यामि ये मद्यं न पिवन्ति वै ॥७९॥
ते भित्वा ब्रह्मलोकन्तु विष्णो लोकं तथा परं ॥
मद्यपाननिवृत्तास्तु मोदयन्ति सुरैः सह ॥८०॥
शूद्रोभूत्वातुमद्यस्य निवृतिं यस्तु कारयेत् ॥
तेन सर्वं कृतं कर्म त्रैलोक्यःसचराचरं ॥८१॥
लिङ्गन्तु स्थापितं तेनःयष्टा यज्ञाःसहस्रशः॥
गावश्च कोटिशोदत्तास्सदाभ्यस्तं हि निष्फलं ॥८२॥
तडागानां सहस्राणि वापीकूपशतानि च ॥
न तत्फलं लभेत्कृत्वा यत्फलं मद्यवर्जनात् ॥८३॥
न तत्फलं सुवर्णस्य भूमिदानात्तथैव च॥
कन्यादाने च तन्नास्ति यत्फलं मद्यवर्जनात् ॥८४॥

त्रिंशत्कोटि सहहस्राणि मोदयित्वा सुरैः ॥
स्वर्गलोकच्च्युता यदा मर्त्यलोकमुपागताः॥८५॥
तदामानुष्यतां यान्ति ते नराः पुरुषोत्तमाः॥
राजानो मन्त्रिणो राज्ञान्धनिनश्च भवन्ति ते ॥८६॥
पञ्चयज्ञान् प्रकुर्वन्ति यजन्ते भूरिदक्षिणैः ॥
पूर्णकाला म्रियन्ते च वृध्दा सद्येन मृत्युना ॥८७॥
मद्यपाननिवृत्तानामेष धर्मविधिःस्मृतः॥
एतत्ते कथितं सर्वं किमन्यच्छ्रोतुमिच्छसि ॥ ८८॥

॥उमोवाच॥

ये नरा जिह्वला लुब्धामांसम्भक्षन्ति मानवाः॥
तेषान्धर्ममधर्मं वा श्रोतुमिच्छामि वेदितुं ॥८९॥

॥ईश्वरउवाच॥

जिह्वेन्द्रियेण ये मोहान्मांसम्भक्ष्यन्तच्यते ॥
उत्पत्ती रेतसा यस्य सत्वरं विष्टमध्यतः॥९०॥
ईदृशी तस्य उत्पत्तिस्तस्मान्मांसन्न भक्षयेत्॥
विष्टया मध्यमं भूतं योनिद्वारेण निर्गतं ॥९१ ॥
शुक्रशोणितसम्भूतं तस्मान्मांसन्न भक्षयेत् ॥
स्वमांसं परमांसेन यो देहे वृध्दिमिच्छति ॥९२॥
तस्य योनिशतं गत्वा शरीरं व्याधितं भवेत्॥
येषु येषु च जायन्ते नरा वै मांसभक्षणात् ॥९३॥
निवृत्ता ये तु मांसस्य धर्म इत्येव संस्थिताः ॥
नं भक्षयन्ति ये मांस ते नराः पुरुषोत्तमाः ॥९४॥
देवलोकगताः सर्वे न क्षरन्ति स्वलङ्कृताः ॥
तेषां सत्यञ्च शौचञ्च निवृत्या मांस भक्षणे ॥९५॥
धर्मन्तस्य भवेन्नित्यं यस्तु मांसन्न भक्षयेत्॥
दया सत्यं च शौचं च भक्षमाणे न विद्यते ॥९६॥
शूद्रो ब्रह्मसमो भूत्वा शौचाचार समन्वितः॥
ब्रह्मभूतपिशाचाश्च नोपतिष्ठन्ति च क्षुधा॥९७॥
दिव्यं वर्षसहस्रन्तु वसित्वा स सुरैःसह ॥
चतुर्वेदस्तु जायेत यदा मर्त्यमुपागतः॥९८॥
पुष्करे तु तपस्तप्ते यत्फलं लभते नरः॥
तस्मादष्टगुणं तस्य यस्तु मांसन्न भक्षयेत् ॥९९॥

किमन्यैर्बहुभिर्धर्मैरेश्वमेधस्य यत्फलं ॥
तेन लब्धं ततः सर्वं यस्तु मांसं न भक्षयेत् ॥१००॥
भक्षयन्ति च ये मांसं न भक्षन्ति च ये नराः॥
तन्मया कथितं सर्वं श्रोतुमिच्छसि किं पुनः ॥ १ ॥

॥उमोवाच॥

आत्मम्भरा दुराचारा नित्यमात्मनि पोषिकाः॥
मृष्टान्नं स्वयमश्नन्ति कन्दमूलफलान्यपि ॥२॥
तेषान्तु कीदृशं कर्म्ममपुण्यं चापि कीदृशं ॥
कथयस्व महेशान इदं कौतूहलं मम॥३॥

॥महेश्वर उवाच॥

आत्मन पोषकानांतु नराणां पापकर्मिणां ॥
आत्मार्थे हितयुक्तानां गतिमेषा कथाम्यहं ॥४॥
मृष्टान्नं न तु चात्मानं पोषयन्ति नराधमाः॥
बालानां पश्यमानानां न ददन्ति च निस्पृहाः ॥५॥
न हुतन्न तपस्तप्तं न दत्तं ब्राह्मणाय च॥
आत्मानं पोषितं येन तस्य पाप कथाम्यहं ॥६॥
यत्र देशेअनावृष्टिर्यत्र वायोर्महद् भयं ॥
तस्मिन् देशे क्षुधार्तस्तु जायते पापकर्मिणः ॥७॥
यदा तु सृष्टितं योगात् भुञ्जते पापकर्मणा ॥
तेन पापेन तत्सर्व भुक्तं चापि न जीयते ॥८॥
जलोदरकृतेनैव भगन्दरविसूचकैः ॥
मूत्रकृच्छ्रेण शूलेन म्रियन्ते चात्मपोषकाः ॥९॥
तृड्वुभुक्षादिरोगेण पात्यमाना नराधमाः ॥
अनिष्टनरकं यान्ति तेन पापेन मानवाः॥१०॥
परस्य हितयुक्तानां मानवानां यशस्विनि ॥
कथयामि प्रयत्नेन यत्त्वया पृच्छितो ह्यहं ॥११॥
आत्मवत्पोषिका ये च बालवृध्दातिथीन्नरा ॥
दयालुकाश्च सर्वेषां तेषां धर्मस्वदेहतः॥१२॥
एकग्रासं सहस्रैस्तु भुंजते सह मानवैः॥
मृष्टान्नं सह सर्वैस्तु तेन यान्ति पराङ्गतिं ॥१३॥
आसनं शयनं यानं येन दत्तं यशस्विनि ॥
समं सर्वेषु भूतेषु तस्य दुःखं न विद्यते ॥१४ ॥

परे च संतन्देवि ! यस्य चित्तं सुनिश्चलं ॥
अहंदेहस्थितस्तस्य धर्मरूपी महेश्वरः ॥१५॥
पूर्णे वर्षशते दिव्ये स्वर्गलोकेः सुरै सह॥
मोदते सुचिरं कालं दिव्यभोग समन्वितः ॥१६॥
यदा मनुष्यतां याति तत्सर्वं कथयाम्यहं ॥
यत्र देशे सुभिक्षं वैस्फीता गोब्राह्मणस्तथा ॥१७॥
तत्र देशे तु जायन्ते उत्तमे विपुले कुले ॥
रूपयौवनसम्पन्ना बन्धुवर्गेणपूरिताः॥१८॥
समृध्दो धनधान्येन दातार प्रियवादिनः ॥
मृष्टान्नञ्च वरस्त्री च ताम्बूलं शयनं तथाः॥१९॥
वराश्च सर्वरत्नानि गृहे तिष्ठन्ति धर्मिणः ॥
यानि यानि च कर्माणि प्रार्थयन्ति वरानने ॥२०॥
तानि तानि च सर्वाणि देहे तिष्ठन्ति धर्मिणां ॥
आत्मनः पोषका ये च येचान्ये परपोषकाः॥ २१॥
तेषांतु कथितं सर्वं कि भूयः परिपृच्छसि ॥

॥उमोवाच॥

राजानो मण्डलीकास्तु सोमन्ताः प्रतिराज्यकाः ॥२२॥
पृथ्वीपालाश्च जायन्ते नरा वै केन कर्मणाः॥

॥ईश्वर उवाच॥

राजानः कर्मणा येन भवन्ति पुरुषोत्तमाः ॥२३॥
तद्धर्मं कथयिष्यामि यथात्वं परिपृच्छसि ॥
दीक्षिताः शिवयज्ञेषु मम भक्ताश्च ये नराः ॥२४॥
ते तु राज्यं सुसंप्राप्ता मण्डलीकास्तु मानवाः ॥
कृष्णाष्टमीममावास्यामुभे पक्षे चतुर्दशी ॥२५॥
अहन्तु पूजितो यैस्तु मण्डलीकास्तु ते नराः ॥
उग्रेण तपसा नित्यं पूजितो गृहगह्वरे ॥२६॥
जपहोमेन स्नानेन धात्रीसम्प्रेषणेन च ॥
उपलेपेन वा नित्यं गृहस्थेन तपस्विना ॥२७॥
ते मृता यान्ति राजानो मम भक्ताश्च ये नराः ॥
शुध्दा ब्रह्मरता देवि ! देवकर्मसु ये रताः ॥२८॥
ते मृता यान्ति राजानो मम भक्ताश्च ये नराः ॥
ये तु ब्राह्मणमुद्रास्तु ज्ञास्यन्ते सकलनिष्कलं ॥२९॥

अनुगृह्णन्ति ये शिष्यान्तेषु मोक्षन्ददाम्यहं ॥
दीक्षिताः शिवमन्त्रेषु मद्भक्तामत्परायणाः ॥३०॥
सर्वलोकेषु ते देवि ! सुरेन्द्रैरपिपूजिताः ॥
त्रिकालमेक कालं वा षण्मासानब्दमध्यता :॥३१॥
ये स्मरन्ति च मान्देवि ! ते राजानोभवन्ति वै ॥
ये स्मरन्ति च मान्देवि ! शाठ्येनापि यशस्विनि ! ॥३२॥
राजानस्ते नरा मर्त्य वित्तशाठ्येन रूपतः ॥
योपि वर्षसहस्रेण नमस्कारं प्रयुञ्जंति ॥३३॥
सोपि येकेन ग्रामेन राजा भवति सुन्दरि ! ॥
एवं भावैरभावैर्वा स्मरेद्यो मान्नरस्सदा ॥३४॥
तस्याहन्न प्रणश्यामि अपिकल्पशतैरपि ॥
कर्मणा येन राजानो भवन्ति पुरुषोत्तमाः ॥३५॥
तन्मया कथितन्देवि ! किं भूयः श्रोतुमिच्छसि ॥

॥उमोवाच॥

यस्त्वयि स्थापिते पुण्यमर्चिते पूजितेऽथवा ॥३६॥
कथयस्व प्रयत्नेन ममशीघ्रञ्जगत्पते ! ॥

॥ईश्वर उवाच॥

अहन्ते कथायिष्यामि त्वत्प्रियार्थं वरानने ! ॥३७॥
स्थापितेपि च यत्पुण्यमर्चिते पूजितेथवा ॥
सगरो नाम यो राजा निविष्टा येन सागराः ॥३८॥
अश्वमेधः कृतस्तेन निष्पन्नं तस्य तद्भवेत् ॥
तेषां शतसहस्रेण यत्पुण्यं सुरसुन्दरि ! ॥३९॥
तत्फलं स्थापिते लिङ्गे सत्वन्न कथितं मया ॥
स्थापयन्ति च ये देवि! त्वामादित्यञ्च केशवं ॥४०॥
अहन्तैः स्थापितो नित्यमहं सर्वासु मूर्तिषु ॥
स्थापयन्ति च ये रुद्रं देवद्रोणीषु कारकाः ॥४१॥
भवन्ति मम तुल्यास्तु त्रिनेत्राः शूलपाणिनः ॥
यावतै स्थापितं लिङ्गं मर्त्यलोकेषु तिष्ठति ॥४२॥
ममांशेनावतिष्ठन्ते गणास्ते शूलपाणिनः ॥
तस्य क्षये च ते स्वर्गाद्यदा मर्त्यमुपागताः ॥४३॥
तदा ते कर्मणा तेन राजानस्तु भवन्ति वै ॥
निरुपद्रवा बहुभृत्याः सुखिनश्च विकण्टकाः ॥४४॥

मम भक्ताः पुनस्ते तु भवस्य लिङ्गस्थापकाः ॥
राज्यं कृत्वा ततः स्वर्गे गत्वा च पुनरागताः ॥४५॥
स्थापयन्ति पुनर्लिङ्गं मम ध्यानपरायणाः ॥
स्थापितेन मया देवि ! यत्पुण्यं परमेश्वरे ॥४६॥
तन्मया कथितं सर्वं किमन्यत्परिपृच्छसि ॥

॥उमोवाच॥

कलौ युगेऽल्पसत्वाश्च दरिद्रा मानवाः प्रभो ! ॥४७॥
यथोक्तं चैव प्रासादं कथं शक्नोति मानवः ॥

॥ईश्वरउवाच॥

प्रासादास्तु मयाप्रोक्ता अधमाश्चोत्तमास्तथा ॥४८॥
मध्यमाश्च तथा देवि ! कथयामि तवप्रिये ! ॥
वित्तशाठ्यानुरूपेण यः कुर्यात्तु शिवालयं ॥४९॥
स्वदेहें तस्यतिष्ठामि मद्भक्तः श्वपचोपि यः ॥
सर्वरत्नमयं राजा प्रासादं यः प्रयच्छति ॥५०॥
तृणच्छन्नं दरिद्रस्तु समं तदुभयं स्मृतं॥
दर्भपत्रे दरिद्रोपि भावेन घ्कुरुते गृहं ॥५१॥
सोपि रुद्रत्वमासाद्योद्धरेत्कुलशतानिवै ॥
यस्तु द्रव्या नुसारेण विधिपूर्णङ्करोति च ॥५२॥
सोपि कुलसहस्रं तु उद्धरेन्नरकागतं ॥
समुद्धृत्य त्वसौ तानि सपुत्रपशुवान्धवः॥५३॥
षष्टिं वर्षसहस्राणि शिवलोके महीयते ॥
शैलं कुर्यात्तु यो देवि ! प्रासादं सर्वतोरणे ॥५४॥
गीतवाद्येन संयुक्तं तस्य पुण्य फलं श्रृणु॥
त्रिनेत्र शूलपाणिश्च मम तुल्यपराक्रमः ॥ ५५॥
क्रीडते सुचिरं कालं यावदाभूतसंप्लवं॥
तस्यान्ते पतितो भूमिं कदाचित्कालपर्ययात् ॥५६॥
पृथ्वीपतिस्तदा भूत्वा रुद्रलोकं व्रजेत्पुनः ॥
यादृशन्तत्वया देवि! पृष्टोहं लोकसौख्यदे! ॥५७॥
तादृशं कथितं सत्यं किमन्यत्परिपृच्छसि ॥५८॥
इति श्री शिवधर्म उत्तरोत्तरमहासंवादे द्वितीयोऽध्यायः ॥२॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उत्तरोत्तरमहासंवादे

तृतीयोऽध्यायः

ॐ नमः शिवाय

॥ उमोवाच॥

यत्वया कथितं सर्वमर्चनं पूजनं तथा॥
पुष्पाणां च विधानन्तु एतदाख्यातुमर्हसि ॥५९॥

॥ईश्वर उवाच॥

हिमवद्दुहितः! सत्यं पुष्पाणां च यशस्विनि! ॥
यानि मे देवि ! रुच्यन्ते कथयामि विशेषतः॥ ६०॥
करवीरो वुकश्चैव अर्क उन्मत्तकस्तथा ॥
पाटला बृहती जातिस्तथा च गिरिकर्णिका ॥६१॥
अशोक कुशपुष्पाणि मन्दारश्चापराजिता ॥
शमी पुष्पाणि चान्यानि कुब्जकं शंखिनी तथा ॥६२॥
अपामार्गस्तथा पद्मं चम्पा जाती समुत्तमा॥
चम्पकःपिण्डं तगरन्तथा वै नागकेशरं ॥६३॥
पुन्नागः किङ्किरातश्च द्रोणपुष्पन्तथैव च॥
शिंशपोदुम्वर श्चैंव श्यामवल्ली तथैव च ॥६४॥
पुष्पाणि यज्ञवृक्षस्य विल्वश्चैव शिवप्रियः॥
कुसुम्भस्य च पुष्पाणि तथान्यं कुङ्कुमस्य च॥६५॥
नीलोत्पलञ्च कुसुमं तथा रक्तोत्पलानि च॥
सुरभीणि च सर्वाणि स्थलजान्युदजानि च ॥६६॥
सद्भावेनैव दत्तानि वासांसि कुसुमानि च॥
गृह्णामि शिरसा देवि! यो मां कश्चिन्निवेदयेत् ॥ ६७॥

॥उमोवाच॥

केषु केषु च पुष्पेषु प्रभो ! कर्त्तुः स्पृहा तव॥
याज्ञिकानि तु पुष्पाणि शुभानि कथयस्व मे ॥६८॥

॥ईश्वर उवाच॥

पृष्टोहं यत्वया देवि! मम कौतूहलं हितत् ॥
कथयामि प्रयत्नेन लोकानां हितकाम्यया ॥६९॥

आषाढस्य तु मासस्य स्नाना कृष्णचतुर्दशी ॥
सकृच्च गुग्लुन्दाश्च तेपि यान्ति पराङ्गतिं ॥७०॥
श्रावणस्य तु मासस्य एकाहारेण यो नरः॥
अर्च्चयेत्करवीरेण गोसहस्रफलं लभेत् ॥ ७१॥
भाद्रपदस्य मासस्य अपामार्गेण योर्चयेत् ॥
हंसध्वजेन युक्तेन विमानेन स गच्छति ॥७२॥
आश्वयुजस्य मासस्य अर्कपुष्पैस्तु योर्चयेत्॥
मयूर ध्वजयुक्तेन विमानेन स गच्छति ॥७३॥
कार्त्तिकस्य तु मासस्य मम क्षीरेण स्नापयेत्॥
अर्चयेज्जातिपुष्पैस्तु शिवं पश्येन्नि रञ्जनं ॥७४॥
मार्गशीर्षस्य मासस्य वुकेनार्चयते पुनः॥
स त्रैलोक्यमतिक्रम्य यत्राहं तत्र गच्छति ॥७५॥
पौषस्यैव तु मासस्य धत्तूरेण तु योर्चयेत् ॥
तुष्टया स मया देवि! लभते परमम्पदं ॥७६॥
माघे चैव तु यो देवि ! हरं विल्वेन अर्चयेत् ॥
वालार्क शशियुक्तेन विमानेन स गच्छति ॥७७॥
फाल्गुनस्य च मासस्य गन्धतोयेन स्नापयेत् ॥
अर्चयेद् द्रोणपुष्पैस्तु इन्द्रस्यार्धासनं लभेत् ॥७८॥
चैत्रे चैव ततो मासि नृत्तगीत्तेन शङ्करं ॥
योर्चयेद्दर्भपुष्पैस्तु लभेद् बहु सुवर्णकं ॥७९॥
वैशाखस्य तु मासस्य घृतेन स्नापयेत्सदा ॥
अर्चयेच्छुक्लमन्दारैरश्वमेधफलं लभेत्॥८०॥
ज्येष्ठे मासि ततोदध्न्ना स्नापयेत्सततं नरः ॥
अर्चयेत्पद्मपुष्पैस्तु सोपि गच्छेत्परां गतिं ॥८१॥
संवत्सरं मम देवि! ऐकाहारेण योर्चयेत् ॥
न तस्य पुनरावृतिःसत्यमेतद् व्रवीम्यहं ॥८२॥
पुष्पाणां कथितं देवि ! मासानां च तथैव च ॥
अन्यत्किमिच्छसि श्रोतुं कथयस्व वरानने॥ ८३॥

॥उमोवाच॥

किं धर्मं के गुणा धर्मे किंवा धर्मस्य लक्षणं ॥
केन वा निर्मितं धर्मं किंवा धर्मं विधीयते ॥ ८४॥
धर्मेषु देवता देव! अधर्मेषु च को भवेत् ॥

श्रोतुमिच्छामि देवेश इदं कौतूहलम्मम ॥८५॥

॥ईश्वर उवाच॥

अहं धर्मः स्वयं देवि !अधर्मस्त्वं वरानने ! ॥
अहं तु पुरुषो देवि! प्रकृतिस्त्वं प्रकीर्तिता ॥ ८६॥
अहं धर्मे मतिन्दद्यां मानुषाणां यशस्विनि !॥
विमतिं कुरु मे देवि !आत्मानं च न्यवुध्यसे ॥८७॥
त्वच्छरीरे स्थितो विष्णुरधर्मोयं प्रकीर्तितः ॥
तेनैव मोहितं सर्व भगलिङ्गाङ्कितं जगत्॥ ८८॥
जानन्तिचैव धर्माणि अधर्माणि च ये नरा : ॥
ते त्वया मोहिताः सर्वे स्त्रीषु स्नेहवशङ्गता ॥ ८९॥
पुत्रदार कुटुम्बेषु तृष्णया विवृत्ता नराः ॥
तत्वया मोहिताःसर्वेत्वंरकं यान्ति मानवाः॥९०॥
यथा नद्यादयःसर्वे समं यान्ति महोदधौ ॥
अहं सर्वेषु भूतेषु लिङ्गं त्वंच भगाकृति :॥९१॥
अहं यः स स्वयं ब्रह्मा यो ब्रह्मा स स्वयं हरिः ॥
या देवि सा स्वयं विष्णो यो विष्णु स च चन्द्रमाः ॥ ९२॥
यःसोमः स स्वयं रुद्रो यो रुद्रः सतु भास्करः ॥
एवं शक्ति विशेषेण स्थितः सर्वासु मूर्तिषु ॥९३॥
स्थावरो जङ्गमः सर्वोह्यण्डजः ससरीसृपः ॥
अहं सर्वगतो देवि वाङ्मयः सचराचरं ॥९४॥
पञ्चभूतसमायुक्ते शरीरे सर्वदेहिनां ॥
यत्रत्वहंच भगा देवि ! तत्रा लिङ्गमेवच ॥९५॥
एवं धर्मो ह्यहं देवि !अधर्मस्त्वं वरानने ॥
न बुध्यन्ति च ये मूढा नरकं यान्ति मानवाः ॥९६॥
एवं धर्ममधर्मं वा यस्तुभ्यं कथितं मया ॥
किमन्यकौतुकं देवि ! पुनःपृच्छसि मां यतः ॥९७॥

॥उमोवाच॥

सप्तद्वीपसमायुक्ताः सप्तपातालसंयुताः ॥
कुलपर्वत सप्तापि समुद्रास्सप्त एव च ॥९८॥
किं रूपं किं प्रमाणन्तुकिन्नाम कस्य वा प्रभोः ॥
स्थानञ्च नरका यत्र कथयस्व महेश्वरः ॥९९॥

॥ईश्वर उवाच॥

केचिद्वस्तिस्थिता देवि! केचिद्वयर्धोपरि स्थिताः॥
द्वियोनिनरकाः केचित्केचित्पातालदारुणाः ॥२००॥
प्रत्यक्षाः केचिद्दृश्यन्ते त्रिपरोक्षास्तथैव च॥
केचिच्छरीरमध्यस्थाः पीडयन्ति वलान्विताः ॥१॥
श्रृणुष्वेकमना भद्रे! नरका घोर दारुणाः ॥
अहन्ते कथयिष्यामि पृष्टोहंयत्वया पुनः ॥२॥
नरके वज्र भूमिस्तु कालकाक्षेसलोहितः ॥
सूचीमुखो महाकायस्तथा रौरव एव च ॥ ३ ॥
महारौरवविख्यातो ह्यवीचीनरकस्तथा ॥
कूटशाल्मलिमित्याहुस्तथा यमलपर्वतः ॥ ४ ॥
अमेध्यो दुःख सन्तापःकर्षाग्निः पूतिमृत्तिकाः ॥
तप्तत्रपुश्च विख्यात शिलोवर्षस्तथैव च ॥ ५॥
एक पादैकहस्तश्च भुक्तानिरशनस्तथा ॥
तथा वृश्चिकराशिश्च सर्पराशिस्तथैव च ॥ ६॥
इक्षुयन्त्राकृतिश्चैव चक्रपीठः कृमिव्रणं ॥
ज्वालामुखञ्च विख्यातस्तप्तवालुक एव च ॥७॥
क्रकचः सूकरश्चैव वन्धनाकार एव च॥
हडीनिगडसंधातः तुलालक्षोष्टकुन्जरः ॥ ८॥
शवलः पूतिमांसश्च वहुरोगस्तथैव च ॥
धूमपानादरिदृश्य कल्पान्तो रात्रिवन्धनः॥ ९॥
असितालवणं घोरं तथा वै तीक्ष्ण कण्टकः ॥
घण्टामुखांस्त्रसंघट्ट वायसः कुत्सितस्तथा ॥१०॥
खरमुखोन्धकारश्च श्वयोनिः कृमिभक्षकः ॥
सम्पीञ्चस्चैव विख्यातः असिपत्रस्तथैव च ॥ ११॥
कुम्भीरो दुष्टगृध्रश्च नीलमक्षिकसञ्चयंः ॥
उष्मपा रुधिर श्रावः कृतान्तो विकृतस्तथा ॥ १२॥
दहनो ज्वलनश्चैव तप्तकुम्भशिलानि तु ॥
कलेवरच संघातो मूले पूयवहस्तथा ॥ १३॥
कालः संवर्त्तकश्चैव सुदीर्घोमुषलस्तथा ॥
अस्थिचूर्णास्थिभङ्गश्च गर्जनो वर्षणस्तथा ॥१४॥
चुल्यकालस्च विख्यातः क्रीडामुख महावलाः ॥
सप्तलोहस्य प्राकारा वज्रसंपुट एव च ॥१५॥

दहनं भ्रामणं चैव श्रृङ्खले विद्युदेव च ॥
हिमराशि घर्मराशिर्विल धूमः क्षारेजकः॥ १६॥
जलूकोदंशमशको. भ्रमरो जीवजस्तथा ॥
वज्रकपाटघातस्तु लोहदण्डतस्तथैव च ॥ १७॥
गवाश्वो हस्ति पादश्च जिह्वोत्पाटन एवं च ॥
पूर्णनक्तस्तथा चैव शूलो मुग्दर एवं च॥ १८॥
शक्ति कुन्तो न्दुमश्चैव खादकः कृभिमिस्तथा ॥
शिलाघातो वज्रकुण्ड विकृतः शूलपट्टिशै : ॥१९॥
घोरश्च यमजिह्श्व तथा च गिरिभञ्जकाः ॥
गिरिदुर्द्धरः शौलोच्च तथा शूलो ह्योमुखा : ॥२०॥
निश्छन्नो मकरग्राही तप्तोष्णः क्रोधमूर्च्छित : ॥
हाहारवो मरुत्पाती दुःशीलो जाजकस्तथा ॥२१॥
दुःखकारी प्रभङ्गश्च सूचकस्त्रासकस्तथा ॥
कूटकारस्तु विज्ञेयो ब्रह्ममुद्गर एव च ॥२२॥
वानरो विकटो नादी महाजंघोत्क एव च ॥
अन्धकारो महानीलः सुतप्तो विषकर्षकः ॥२३॥
जलोदरो महास्थूलःनिःशौचस्तु परः स्मृतः ॥
अशून्य मध्यकोशश्च निस्थलालोहशर्करः ॥२४॥
न श्रृणोति नरः कश्चिन्नरकमतिदारुणं ॥
महानरकम्प्रवक्ष्यामि अधस्तात्सर्वतः स्थितं ॥२५ ॥
योजनानां सहस्राणि विस्तीर्णम्पञ्चविंशतिः ॥
यत्रते पापकर्माणःपुरुषाब्रह्मयघातकाः ॥२६॥
यान्तिवैतरणीं घोरां छिन्नमूला इवद्रुमाः ॥
वसारुधिरमांसेन पूयशोणितकर्द्दमाः॥२७॥
कृमिभिश्चसमाकीर्णाः सर्पवृश्चिक संकुलाः॥
भ्रमरैर्नीलपक्षीभिर्दंशैश्च मशकैस्तथा ॥२८॥
कण्टकैश्च समाकीर्णाः नानायन्त्रैस्तथैव च ॥
व्याघ्रैर्ऋक्षैस्तथा चित्रैः श्वापदैर्दंष्ट्रिभिस्तथा ॥२९॥
उग्रैरेवंविधैः सर्वैर्महाघोरैः समाकुलाः॥
ये नरा भूमिहर्त्तारो घातयन्ति च ब्राह्मणं ॥३०॥
यान्ति वैतरणीं घोरां पातालतलवाहिनीं ॥
दत्वा देवस्य यो भूमिं ब्राह्मणस्य च वा हरेत् ॥३१॥

स्वदत्ताम्परदत्तां वा यान्ति वैतरणीं तु सः ॥
यस्तु वै ब्राह्मणो भूत्वा मद्यपाने प्रवर्त्तते ॥३२॥
सोपि वै नरके गत्वा चिरं तिष्ठति पापकृत् ॥
शूद्रो भूत्वा तु यो देवि ! ब्राह्मणीम्प्रति गच्छति ॥३३॥
याति वैतरणीं घोरां पुनर्जन्मविवर्जितः॥
अन्येपि क्रूरकर्माण पापछद्मनि मानवाः ॥३४॥
अनिष्टनरकं यान्ति पातालतलगोचरं ॥
यो दुष्टेन तु भावेन कुलमाकुलतान्नयेत् ॥३५॥
सोपिवैतरणीं गच्छेत्सुचिरं तिष्ठते नरः ॥
मित्रद्रोही गुरुद्रोही स्वामिद्रोही तथैव च ॥३६॥
पापकर्मादुराचारो नरकं याति सोधमः ॥
एवम्पापविशेषेणपापात्मा पापकर्मणा ॥३७॥
दुराचारोवरारोहे याति वैतरणीन्नदीं ॥
एवं पापविशेषेण वामशक्त्या प्रचोदितः ॥३८॥
न विदन्ति स्मृति मूढाः पापकर्मरता नराः ॥
एते वै नरका घोराः कथितास्तु यथा स्थिताः ॥३९॥
किन्तत्पृच्छसि मे भूयः कथय सुरसुन्दरी ॥

॥उमोवाच॥

विष्णुन्तेन तु विप्रेण गृहस्थेन तु शङ्करः॥४०॥
व्रतस्थेन हि किं पुण्यमेतदारव्यतु मर्हसि ॥
आचार्येण हि किं पुण्यं किं य पुण्यं ब्रह्मचारिणा ॥४१॥
भगवद्भिक्षुकश्चैव नग्नैः क्षपणकैस्तथा ॥
किं पुण्यं रक्तशाठ्येतु धार्मिके वापि कीदृ ॥४२॥
भस्मोद्धूतशरीरेण किं पुण्यं कथयस्व मे ॥

॥ईश्वर उवाच॥

अर्हन्तस्य च ये भक्ताः सुगतस्य तथा परे ॥४३॥
एषान्दत्ते गृहस्थस्य विप्रस्याष्टगुणंभवेत् ॥
संश्रितं ब्राह्मणंज्ञात्वा वेदव्रतपरायणं ॥४४॥
वालाग्निहोत्रमासीनं तापसमृतुगामिनं ॥
तेषु दद्यागृहस्थेषु संक्रान्त्तिविबुवेषु च ॥४५॥
गृहस्थस्य हि यत्पुण्यं मद्भक्तस्य परस्य च ॥
तत्समं ब्राह्मणं दानं द्विगुणं ब्राह्मणंब्रुवे ॥४६॥

सहस्रगुणमाचार्ये अनन्तं वेदपारगे ॥
न विप्रे विश्ववेदस्य ज्ञायते परमंपदं ॥४७॥
अविदिते शरीरेण आलेरव्यं चक्षुहीनवत् ॥
वेदानां परमं ज्ञानं वेदानां परमं पदं ॥४८॥
आत्मानं विदितं येन सभवेद्वेदपारगः ॥
अनुगृह्णाति यः शिष्यान् शिवदीक्षान्तपारगः ॥
अग्नयो विदिताः सर्वे सभवेद् वेद पारगः ॥
शिवमष्टविधं ज्ञात्वा यो दीक्षामभिवाञ्छति ॥५०॥
समंपश्यति भूतानि स भवेद्वेदपारगः ॥
अष्टषष्ट्यधिकं देवमष्टतत्वेश्वरं विभुं ॥५१॥
यो मां पश्यति देहस्थमाचार्यस्तु स उच्यते ॥
तेन भुक्तेन यत्पुण्यं गृहस्थस्य सकृद्भवेत् ॥५२॥
यावत्सूर्यकृता लोकास्तावत्तदक्षयं भवेत् ॥
आचार्यदानं स्वल्पं वा काले देयं यशस्विनि ! ॥५३॥
अनन्तमक्षयं तावत्तावत्तिष्ठन्ति सागराः ॥
यत्र भुञ्जन्ति भस्माङ्गा मूर्खा,वा यदि पण्डिताः॥५४॥
तत्र भुञ्जास्यहन्देवि ! सपत्नीको वृषध्वजः ॥
चतुर्वेदसहस्राणि व्यतीपातेषु भुञ्जते ॥५५॥
एवं शूद्रो व्रतस्थोस्य कलान्नार्हन्ति षोडशीं ॥
श्रृङ्गिणाञ्च शतन्दद्यात्सहस्रञ्च सहस्रवान् ॥५६॥
दरिद्राश्चापि एकन्तु तानि तानि तु तत्समं ॥
राज्ञाश्चैव सहस्त्राणि अथवापि शतानि च ॥५७॥
न पीड्यन्ति च दानेन दरिद्रस्तेन पीड्यते ॥
अनावृष्टिहते देशे धान्ये च प्रलयङ्गते ॥५८॥
एकं भोजयते, विप्रं कोटिर्भवति भोजितं ॥
भस्माङ्गिब्राह्मणस्यापि व्रतस्थस्यापि यत्फलं ॥५९॥
तन्मया कथितं सर्वं किं भूयः परिपृच्छसि ॥

॥उमोवाच॥

राक्षसाश्च पिशाचाश्च प्रेता भूताश्च सर्वतः ॥६०॥
केन कर्मविपाकेन गच्छन्ति ताङ्गतिं वद ॥

॥ईश्वर उवाच ॥

कथयामि वरारोहे ! येन पापेन मानवाः ॥६१॥

राक्षसा भूतप्रेताश्च पिशाचाश्च श्रृणुष्व मे ॥
अपदृत्य च विप्रस्वं देवश्वञ्च तथापरं ॥६२॥
दत्तोच्छिष्टानि दत्तानि पिशाचा यान्ति मानवाः ॥
दानन्दत्वा तु ये देवि ! नोपपादन्ति कर्मणां ॥६३॥
मृताश्चैव तु ते देवि ! पिशाचा यान्ति मानवाः ॥
प्रतिग्रहं ततो लुब्धं वाचयावापि कर्मणा ॥६४॥
न ज्ञापयन्ति दातारं पिशाचा यान्ति मानवः ॥
दानंदत्वा तु यो देवि ! नोपपादन्ति कर्मणा ॥६५॥
मृताश्चैव तु ते देवि ! पिशाचायान्ति मानवाः ॥
प्रतिग्रहं ततोलब्धं वाचया वापि कर्मणा ॥६६॥
न ज्ञापयन्ति दातारं पिशाचा यान्ति मानवाः ॥
स्वामिकार्यन्तु यो देवि ! अहितेन तु कारयेत् ॥६७॥
सोपि याति पिशाचत्वं गुरुभक्ति विवर्जितः ॥
देवद्रव्यविनाशास्तु गुरुद्रव्यस्य हारकाः ॥६८॥
हरन्ति तृष्णया मूढा भवन्ति ब्रह्मराक्षसाः ॥
मृतापत्यञ्च ये देवि ! कुर्वन्ति तमसान्विताः ॥६९॥
मम द्रव्य विनाशन्ति भवन्ति ब्रह्नराक्षसाः ॥
यो मां संस्थापयित्वा च नोपजीवति मानवः ॥७०॥
वृथा तस्य च तद्धर्मं मृतो भवति राक्षसः ॥
मम द्रव्यं तु ये देवि! दासदासीं ददन्ति ये ॥७१॥
अन्यायेन विनाशन्ति मृतास्ते यान्ति राक्षसाः ॥
धारयित्वा तु यो लिङ्गं विकर्मं यस्तु कारयेत् ॥७२॥
लिङ्गंद्रोहस्तु यो देवि ! भवन्ति ब्रह्मराक्षसाः॥
अदीक्षितस्तु यो भूत्वा प्रव्रज्यामधिगच्छति ॥७३॥
उपजीवेत्तथा लिङ्गं स भवेद् ब्रह्मराक्षसः ॥
दन्तान्तरविलग्ने न देवस्वेन तु सुन्दरि ! ॥७४॥
दिव्यवर्षसहस्राणि स भवेद् ब्रह्मराक्षसः ॥
सूचीमुखो महाकायो विकृतः पर्वतोपमः ॥७५॥
पीड्यन्ते तृड्बुभुक्षाभ्यां लयन्ते विक्लवान्वितः ॥
इन्द्रियाणि च रौद्राणि स्कन्धेन तु वहन्ति ते ॥७६॥
तेन पूर्वकृतेनैव पापेन हि यशस्विनि ॥
देवद्रव्यविनाशेन निर्माल्यस्य च भक्षणे ॥७७॥

दिव्यं वर्षसहस्रंतु स भवेद् ब्रह्मराक्षसः ॥
शीतस्थाने च हेमन्ते वर्षा वह्वोदके भवेत् ॥७८॥
मरुदेशे भवेद्ग्रीष्मे यातना ब्रह्मराक्षसां ॥
देवस्वेन तु आत्मानं पोषयन्ति च ये नराः ॥७९॥
तेपि तेष्वेव जायन्ते दुराचाराश्च मानवाः ॥
भक्षयन्ति च निर्माल्यं सेवन्ति विषयाणि च ॥८०॥
तेपि यान्ति दुराचारा नरके पूतिगन्धिके ॥
दिव्यं वर्षसहस्रंतु यात्यमाना नराधमाः ॥८१॥
मर्त्यलोकेषु जायन्ते म्लेच्छाऽवर्गबुभुक्षिताः॥
कुचैला दुःखिता नित्यं मम निर्माल्यभक्षकाः॥८२॥
गवाशनकुले रौद्रे तेन पापेन मानवाः ॥८३॥

इति शिवधर्मोत्तरे महासंवादे तृतीयोऽध्याय : ।।३।।

अथपशुपतिमते शिवधर्ममहाशास्त्रे उत्तरोत्तरमहासंवादे

चतुर्थोऽध्यायः

ॐ नमः शिवाय

।।उमोवाच।।

भगवन् ! कर्मणा केन शुभेन अशुभेन वा ॥
कुब्जवामनहीनाङ्गा जायन्ते च नराधमाः ॥८४॥
बधिरा वामनाः केन अन्धकाश्च तथा परे ॥
मूकाश्च केन पापेन कथयस्व महेश्वर ! ॥८५ ॥

।।ईश्वर उवाच।।

घण्टाशब्दा निनादानि शंखभेरीस्वनानि च ॥
ये हरन्ति तमो मूढा वधिरास्ते च मानवाः ॥८६॥
ये हरन्ति च तुर्याणि शब्दानि विविधानि च ॥
तेन पापेन ते देवि ! जायन्ते वधिरा नराः॥८७॥
अन्धाश्च येन पापेन जायन्ते पुरुषाधमाः ॥
तत्पापं कथयिष्यामि भद्रे ! ह्येकमनाः श्रृणु ॥८८॥
प्रासादेषु च ये देवि ! दीपानपि हरन्ति वै ॥
गृहे चैव तु विप्राणां जायन्ते तेन तेऽन्धकाः॥८९॥
मम नाम्नातु ये देवि ! तैलं दधि घृतं पयः ॥
आत्मानमुपजीवन्ति जायन्ते तेन तेदन्धकाः ॥९०॥
येतुवैक्षुद्रभावेनस्ने हविच्छेदकारकाः ॥
तेपि चान्धत्वमायान्ति तस्य पापस्य कर्मणा ॥९१॥
मूकताङ्कर्मणा येन नराः पतितबुद्धयः॥
दुष्टात्मानो लभन्तीह तन्मे निगदतः श्रृणु ॥९२॥
हरन्ति ब्रह्मसूत्राणि अक्षसूत्राणि वा पुनः ॥
मूकाश्च तेन जायन्ते नष्टधर्म विवर्जिताः॥९३॥
पट्टिकां लेखनीं चैव तथा संपुटकामपि ॥
हरन्ति ये नरा मूढामूकाश्चैतेन कर्मणा ॥९४॥
जप होमस्य मात्राणि मात्राणि गणितस्य च ॥

हरन्ति धर्मशास्त्राणि जायन्ते तेन मूकताः ॥९५॥
ये नरा हस्ति हर्त्तारो हर्त्तारस्तुरगस्य च ॥
हरन्ति रथ युग्मानि हीनाङ्गास्तेन मानवः ॥९६॥
धान्यचौरास्तु हीनाङ्गा अन्नस्याप्यपहारकाः ॥
षडङ्गुला ध्वजाहर्ता कुब्जाः पुष्पं हरन्ति ये ॥९७॥
एतत्ते विविधैः पापैः परद्रव्यैर्हतैस्तथा ॥
जायन्ते पापकर्माण उपहास्या जनस्य तु ॥९८॥
मूका अन्धाश्च वधिराः पराधीनाश्च ये नराः ॥
सर्वे ते कथिता देवि ! किमन्यत्परिपृच्छसि ॥९९॥

॥उमोवाच॥

देवताश्च सुराः सर्वे सिद्धविद्याधराश्च ये ॥
गन्धर्वाप्सरसश्चैव मृगपक्षिसरीसृपाः॥
पर्वताश्च समुद्राश्च द्वीपाश्च बहवस्तथा ॥
देवाश्च अग्नयः सर्वे कथं जाताः सुरेश्वर ! ॥१॥
तृणवल्ल्यादिगुल्माश्च जङ्गमास्थावराणि च ॥
कथं देव ! समुत्पन्ना विविधाश्च प्रजाः शुभाः ॥२॥

॥ईश्वर उवाच॥

पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे ॥
परमेको ह्यहन्देवि ! अन्यजीवो न विद्यते ॥३॥
पर्वताश्च समुद्राश्च नाकाशन्नैव मेदिनी ॥
नैव दानवगन्धर्वा न यक्षाश्चैव किन्नराः॥४॥
नैव वेदो न गायत्री न ब्रह्मा नैव केशवः ॥
नैव ते सिद्धसघङ्घाश्च न विद्या नाग्नयस्तथा ॥५॥
नैव कालाग्निरुद्रश्च नाधर्मो धर्मएव च ॥
नैव मातृगणाः सर्वे न नागो गरुडस्तथा ॥६॥
न नक्षत्रन्न चन्द्रस्तु नादित्या द्वादश स्थिताः ॥
न अधोनापि ऊर्ध्वंतु न सन्ध्या न द्विशस्तथा ॥७॥
न कूर्मो नैव मेघश्च न शीतं न च दुर्दिनं ॥
न पशुर्नैव धान्यानि न प्रजा नैव मानुषाः ॥८॥
अहमेकः स्वयं देवि ! स्वयं कर्ता च ईश्वरः ॥
अनादिनिधनो ह्येष सर्वज्ञः सर्वतः स्थितः ॥९॥
मया तूद्विग्नचित्तेन एकेनैव तु सुन्दरि॥
चिन्तितं प्रजया कार्यं शीघ्रन्तु सृजयास्यहं ॥ १०॥

दिव्यं वर्षसहस्रन्तु ध्यायितो वरुणो मया ॥
मम गात्रे समुत्पन्ना वरुणस्वेद रूपवान् ॥ ११॥
मया करतले देवि! पुत्रवत्परिपालितः ॥
दिव्यवर्षसहस्रन्तु अङ्गुल्यामशितो मया ॥१२॥
तेनैव बुद्बुदंजातं बुब्दुदात्कललम्महत्॥
तदण्डन्तु समुद्‌भूतं ब्रह्माण्डं तद्विधीयते॥१३॥
रक्षयित्वा तदण्डन्तु कालेन परिपूरितं ॥
धृतं करतले देवि ! लोकानां हितकाम्यया ॥१४ ॥
अण्डमध्ये समुत्पन्ना विविधा मे प्रजाःशुभाः ॥
प्रथमं वायुरुत्पन्नस्ततश्चैव त्रयोऽग्नयः ॥ १५॥
पर्वतास्तत्र जाताश्च भुवनानि चतुर्दश ॥
तत्रकालाग्निरुद्रश्च कूर्मश्चैव महाद्युतिः ॥ १६॥
ॐकारस्तत्र उत्पन्नो द्वादशादित्यसप्रभः ॥
एते देवि! त्रयो वेदा द्वादशादित्य एव च ॥ १७॥
अन्येपि शतरुद्रास्तु दिशानां चैव रक्षकाः ॥
सत्वं रजस्तमश्चैव बुद्धिःप्रकृतिरेव च ॥ १८॥
कामक्रोध अहङ्कारो ब्रह्माण्डे तु विनिःसृतः ॥
प्रजा लोकाश्च धान्यानि बीजानि विविधानि च ॥१९॥
उत्पन्नानि च ब्रह्माण्डे स्थावराणि चराणि च॥
किम्पृच्छसि हि मान्देवि ! मातेव हितकारिणि ! ॥२०॥
लोकस्य तारणार्थाय पृच्छ पृच्छ पुनः पुनः ॥

॥उमोवाच॥

या त्वया देव ! मे दत्ता अनुज्ञा परमेश्वर! ॥ २१॥
प्रणयेन तु हृवष्टाङ्गी कमलोत्फुल्ललोचना ॥
कथं तु नश्यते सर्वं विनाशमुपगच्छति ॥२२॥
कुतो गच्छन्ति देवास्तु कुतोवेदाःकुतः प्रजाः ॥
कुतो गच्छति ब्रह्मा वा कुतो गच्छति केशवः ॥२३॥
ते वेदाः कुत्र गच्छन्ति सषडङ्गपदक्रमाः ॥
अग्नयः पर्वता सर्वे समुद्रा द्वीपसंयुताः॥ २४॥
सिद्‌धास्सर्वे सनक्षत्राः सचन्द्राः सदिवाकराः ॥

॥ईश्वर उवाच॥

कथयामि परं गुह्यं सृष्टिसंहारकारणं ॥

प्रलयं सर्वभूतानि स्थावराणि चराणि च ॥
मम गात्रे तु लीयन्ते विनष्टं व्यापकं जगत्॥
शून्यं च तद् भवेत्सर्वं जगदुत्पातमन्तकं ॥
अधः कालाग्नि रुद्रस्तु स तिष्ठति महीतले ॥
कालेन सहितो देवि ! प्रलये दीपयेज्जगत्॥
शिखा प्रवर्त्तते तस्य शतकोटिप्रविस्तरा ॥
तेनैव दह्यते सर्वं त्रैलोक्यं सचराचरं ॥
यदा भूत्तिष्ठते वन्हिर्विस्फुरत्तु अनेकधा ॥
ततो दह्यति गायत्री वेदत्रयसमन्विता॥
ततो योगेश्वरं दिव्यं कूर्मरूपंमहाद्युतिं ॥
दहते नरकावस्थं यदासौ ज्वलते महान् ॥
दाहित्वा चैव पातालं नागानां भुवनानि तु ॥
कालरुद्रेण दग्धानि भुवनानि चतुर्दश ॥
ज्वाला मालाकुलीभूतं वाङ्यं सचराचरं ॥
निविष्टे व्यापकस्थाने सशैलवनकानने॥
मायातत्वे निविष्टे च त्रैगुण्ये प्रलयं गते॥
तत्र ब्रह्मा विनश्येत भूतैस्तु सह दैवतैः ॥
विनशित्वा च भूतानि ब्रह्माण्डं सह दैवतैः ॥
एवं हि अग्निमध्यस्थः शय्यामहमचेतनः ॥
मयि जाग्रति जागर्ति सुप्ते सुप्यति चैव हिं ॥
शयाति तत्र शान्तात्मा तदा सर्वं निमीलते ॥
एकीप्राप्तेषु भूतेषु तदाहं चेतनां लभे ॥
सज्जितश्च मया सर्वं प्रलयं च तथा गतं ॥
कथितन्ते वरारोहे पृच्छ भत्तया विशेषतः ॥

॥उमोवाच॥

शयन्ति येनराः देव ! स्वप्नान् पश्यन्ति ये नराः ॥
व्रजन्ति दूरमध्वानं तन्मे कथ सुरेश्वर ॥
वनस्पति तडागानि ग्रामाश्च नगराणि च ॥
हस्त्यश्वरथयानानि प्रासाद शिखराणि च॥
मणिमुक्ता सुवर्णानि नदीपूरजलाश्रयः ॥
देहे तिष्ठति को देव ! को वा देशान्तरं व्रजेत् ॥

॥ईश्वर उवाच॥

त्रिधातुकं शरीर वै मनुजस्य च देहिनां ॥
श्लेप्मा पित्तञ्च वायुश्च शरीरं तेन व्यापितं ॥
यदा तु प्रवलो वायुर्दूरदेशन्तदा व्रजेत् ॥
पित्तेन हि सुवर्णश्च श्लेष्मणा हि जलाश्रयं ॥
न जीवं मानुपानाञ्च देहन्त्यक्त्वा यशस्विनि ! ॥
अहं प्राप्तस्तु भावेन निर्गतेन मया प्रिये ! ॥
मनः पश्यति देशांस्तु नगराणि पुराणि तु ॥
बुध्दिः कर्म्मेन्द्रियाःपञ्च भूततन्मात्रपञ्चकं ॥
मनो बुध्दिरहङ्कारो गुणत्रयसमन्वितः ॥
एपांहि पञ्चविंशस्तु पुरुषो निर्मितो मया ॥
अश्रद्धेयन्न वक्तव्यं यथा नास्तीति एव च ॥
सर्वञ्च श्रद्दधातव्यं यथावत्कथयामि ते ॥
वायुना सह गच्छन्ति अनेन सहितानि तु॥
त्वचा रुधिरमांसंच स्वदेहे तिष्ठति ध्रुवं ॥
यस्य ते सुख दुःखानि राज्यं वा नरकस्तथा ॥
नृत्यगीतानि कुर्वीत वर्णना स्फोटनानि तु ॥
भयञ्चैव विनाशश्च मैथुनं चौर्यमेव च ॥
पश्यन्ति सततं सर्वं पञ्चभिः प्रत्ययैर्महान् ॥
मनेन्द्रिय प्रयुक्तस्तु सहितो ह्यन्तरात्मना ॥
वायुना प्रेरितो गच्छेज्जीवस्तत्रैव तिष्ठति ॥
यमलोकं समुद्राश्च सप्त द्वीपाश्च मेदिनी ॥
क्षणेन भ्रमते देवि! मनश्च वायुना सह ॥
येन स्वन्नानि पश्यन्ति यान्ति देशान्तरं तथा ॥
कण्टका वै सुतीक्ष्णाश्च विविधा घोरदारुणाः ॥
तैस्तु पथसर्वंव्याप्तं हुताशेनैव पीडितं ॥
न तत्र दृश्यते छाया यत्र विश्रमते क्वचित् ॥
गृहीतं कालपुरुषैः कृतैः कर्म्मशुभाशुभैः ॥
न तत्र देवि! अन्नाद्यं येन प्राणान् समुद्धरेत् ॥
न जलं दृश्यते तत्र तृषितस्तु पिवेत यत् ॥
वुभुक्षातत्र वै रौद्रा दहते मानवन्तपः ॥
शीतेन दुर्गमन्देवि! यमलोकस्य तत्फलम्॥
यं यस्य सदृशं पापंतस्य तादृक्कृतं फलं ॥
तन्मया कथितं ! सर्वं किंभूयः परिपृच्छसि ॥
इति शिवधर्म उत्तरोत्तरे महासम्वादे चतुर्थोऽध्यायः ॥४॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उत्तरोत्तर महासंवादे

पञ्चमोऽध्यायः

ॐ नमः शिवाय

॥उमोवाच॥

यमलोककथा देव! श्रूयते सचराचरैः ॥
विस्तारस्तु कथन्तस्य अध्वानश्चापि कीदृशं ॥
कृतेन कर्मणा केन अशुभेन शुभेन वा॥
गच्छन्ति मानवास्तस्मिन् कथयस्व प्रसीद च ॥

॥ईश्वर उवाच॥

षडशीतिसहस्राणि योजनानां प्रमाणतः ॥
अधुना यमलोकस्य ह्यन्तरम् मानुषस्य च ॥
अदातृकृपणा मूढा दुःखान्तन्निस्तरन्ति ते ॥
केचिद्रुदन्ति कारुण्यं केचिदूर्ध्वतमूर्धजा ॥
आत्मदोषकृतैः पापैःपच्यमाना मुहुर्मुहुः ॥
कथं वा ईदृशं देवि ! दुर्गमं घोर दारुणम् ॥
वितृष्णा ये नरा देवि ! सुखात्तन्निस्तरन्ति ते ॥

॥उमोवाच॥

यत्तवया कथितः पन्था दुस्तरो दुःख संकुलः ॥
केन केन हि दानेन मानवा निस्तरन्ति ते ॥
कथंवा आतपः शीतः कथंवा कण्टकौ विभो ॥
कथं तृष्णा बुभुक्षा च प्रपीडयति मानवान् ॥
कथं दानेन ते देव ! धर्मेण नियमेन च॥
षडशीतिसहस्राणि यथा निस्तरते पथां ॥

॥ईश्वर उवाच॥

तरंति दुर्गमं घोरं पन्थानं कण्टकान्विते ॥
सुखेनोपानहौ दत्वा अश्वारुढा व्रजन्ति वै ॥
आतपेन तु रौद्रेण दह्यन्ते देवि! मानवाः ॥
ये तु छत्रस्य दातारो निस्तरन्ति सुखेन ते ॥
अन्धकारेतमे घोरे अमूर्त्ते लक्ष्य वर्जिते ॥
उद्योतेनैव यास्यान्ति दीपदानरता नराः ॥
तरवो रोपिता यैस्तु तडागायतनेषु च ॥

आतपैर्दह्यमानानामुपतिष्ठन्ति ते पथि ॥
ज्वलिते दुर्गमे घोरे आतपेन तु पीडिते ॥
वनं कृत्वा सुखं यान्ति इन्धनानाम्प्रदानतः ॥
सुवर्णानि नरो देवि ! वस्त्राणि च ददाति यः ॥
स तेन तु पथा याति सर्वाभरणभूषित : ॥
ग्रासादर्द्धमपि ग्रासं यैस्तु दत्तं यशस्विनि:! ॥
तृप्तास्तेन पथा यान्ति अन्नदानरता नरा : ॥
तृप्ताश्च भूषिताश्चैव गन्धधूपसमन्विता ॥
भूमिन्दत्वा सुखंयान्ति सर्वकामेषु पूजिताः ॥
मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च ॥
तेन सर्वमिदं दत्तं येन दत्ता वसुन्धराः ॥
यानि यानि च दानानि स्वयं दत्तानि मानवैः ॥
यमलोकपथैतानि उपतिष्ठन्ति चाग्रतः ॥
व्यञ्जनानि विचित्राणि भस्यभोज्यपरापिच ॥
स्वयं दत्तानि हस्तेन उपतिष्ठन्ति चाग्रता :॥
लभन्ते पापकर्माणाः परद्रव्याणि मानवाः ॥
यत् किञ्चिद्दुष्कृतं देवि! सुकृतं वापि यत्कृतम् ॥
मार्गे तत्रोपतिष्ठेत शुभं वा यदि वाऽशुभम् ॥
ईदृशं तु पथे देवि! यन्मया तव नोदितं ॥
पुनर्वै कथयिष्यामि यमलोकस्थितिं प्रिये! ॥
याम्यनैर्ऋतयोर्म्मध्ये पुरं वैवस्वतस्य तु ॥
सर्ववज्रमयं दिव्यं अभेद्यं तत्सुरैरपि ॥
चतुरस्रंचतुर्द्वारं सर्वप्राकारतोरणं ॥
तस्य मध्ये तु तिष्ठामि अशून्यं तन्मयं पुरं ॥
योजनं शतसाहस्रं प्रमाणं तस्यतद्भवेत् ॥
सर्वरत्नमयं दिव्यं विद्युज्जालार्कवर्चसं ॥
गृहन्तु धर्मराजस्य विस्तीर्णं काञ्चनं शुभं ॥
सहस्राणान्तु पञ्चाशद्योजनानां समुच्छ्रितं ॥
उर्ध्वस्तम्भ सहस्रैश्च वैदूर्यमणि मण्डितम् ॥
मुक्ताजालगवाक्षाद्यं पताकानेकशोभितं ॥
घण्टाशब्दनिनादाद्यं शततोरणसंयुतं ॥
सर्वत्र हेमजा भूमि कुट्टिमामणिमण्डिता ॥

अनेकचित्रकर्माद्यैरासनैर्दत्तकारितैः ॥
शयनैर्दिव्यभोगाङ्गैर्हेमदण्डसुशोभितैः ॥
मन्दमारुतसम्भोगैरुत्क्षेपैर्विविधैस्तथा ॥
नृत्तगीतसमायुक्तैः स्त्रीभिश्च बहुभिर्युतं ॥
शंखवादित्रनिर्घोषैर्गृहं वैवस्वतस्य तु ॥
तत्रासौ भगवान् धर्मआसने परमे शुभे ॥
शतयोजन विस्तीर्णे नीलजीमूतसन्निभे ॥
धर्मज्ञो धर्मशीलस्तु अधर्माद्रहितो यमः ॥
अवध्यः सर्वकार्येषु मम शक्तय नियोजितः ॥
पुरीमध्यप्रदेशे तु चित्रगुप्तस्य तत्पुरं ॥
पञ्चविंशप्रमाणेन योजनानां यशस्विनि ॥
उच्छ्रितं भुवनं दिव्यं लोहप्राकारवेष्टितं ॥
प्रतोलीशतसञ्चार गीतध्वनिसमाकुलं ॥
स्वयं च चित्रगुप्तेन चित्रितश्चित्रकर्मणा ॥
दन्तिकैर्द्वारपत्रैश्च सोपानै स्ताम्रसञ्चितै ः ॥
चामरोत्क्षिप्तदण्डैश्च वीज्यमानो ह्यनेकधा ॥
तत्र हाहासशब्देन वीणातन्त्रीमनोरमं ॥
वेश्याभिस्तु समाकीर्णं नित्यञ्च सततोत्सवं ॥
क्रीडमानो महाविद्यैरासने परमे शुभे ॥
तत्रोपविष्टो गणत्रे आयुर्वै मानुषस्य च ॥
न चासौमुह्यते देवि ! मम शक्त्या नियोजितः ॥
यन्मया निर्मितं पूर्वमायुर्वै मानुषस्य तु ॥
न शक्नोत्यधिकं कर्त्तुं न च हर्तुं वरानने ॥
गणेद्दिनानि सर्वाणि अशुभानि शुभानि च ॥
चित्रगुप्तस्य पूर्वेणज्वरस्यतु महांगृहं ॥
दक्षिणेन च शूलस्य तथा विस्फोटकस्य वा ॥
पश्चिमे कालपाशस्य अजीर्णमशुभस्य च ॥
पितका उत्तरे ज्ञेया तथा चैव विसूचिका ॥
ऐशान्यान्तु शिरोर्त्तिस्तु आग्नेयाश्चैवमूर्च्छना ॥
वैश्रवाणान्तु नैर्ऋत्यां वायव्यान्ताप एव च ॥
तैस्तु परिवृतो नित्यं चित्रगुप्तस्तु तिष्ठति ॥
मम शक्ति निपातेन योजिता कारणेप्सया ॥

धर्मराजस्य पूर्वेण प्राच्यामैन्द्रीदिशा तथा ॥
तिष्ठन्ति पापकर्माणः पात्यमाना नराधमा ॥
यमदूतैर्महाघोरैर्हन्यमानास्तु निर्वरैः ॥
रुदन्ति विविधैः शब्दैः पूर्वकर्मकृतैस्तथा ॥
नाना प्रहरणैरुग्रैर्नानायन्त्रैस्तथा परैः ॥
छिद्यन्ते पापकर्माणः क्रकचैः काष्टयन्त्रवत् ॥
अन्ये च जलमानेषु अङ्गारेषु यशस्विनि ॥
पूर्वकर्मकृतैरेव धाम्यन्ते लोहपिण्डवत् ॥
अन्येऽपि वै दुराचाराः पीडिता धरणीतले ॥
कुठारेण तु छिद्यन्ते विमनोदुःखिताः सदा ॥
केचिच्च गुडपाकेन तैलयन्त्रैस्तथा परैः ॥
अन्येऽपि विविधा देवि ! हन्यमाना महावलैः ॥
उच्चैश्चैव महाघोरैर्महाशव्दै रुदन्ति च ॥
हन्यमानास्तु ते दूतैः शक्तिमुद्गर यष्टिभिः ॥
अन्योन्यकेशसम्बद्धा गृहीता यमदूतकैः ॥
ऋणानि प्रार्थयन्ते च प्राप्ता यमपुरन्तथा ॥
इहलोकेऽप्यसन्तुष्टा मानुषास्ते यशस्विनि ॥
न त्यजन्ति परद्रव्यं मनोवाक्कायकर्मभिः ॥
अङ्कुशैर्मुग्दरैः शूलैर्हन्यमानास्तु ते नराः ॥
महाहुङ्कारनादैस्तु ख्यापयन्ति पुरा कृतं ॥
नैव तत्र भवेत्साधुर्यस्ताङ्कश्चिन्निवारयेत् ॥
स्वकर्मकृतदोषेण नास्ति त्राता वरानने ॥
एवं प्रेतपुरीं घोरां पापचित्तानुसारिणीं ॥
ये नराः पापसंयुक्तास्तत्र गच्छन्ति मानवाः ॥
यमलोके पथं देवि ! दानेन च पृथक् पृथक् ॥
पूरितन्धर्मराजस्य कथितं तु वरानने ! ॥
किन्त्वं पृच्छसि मां देवि ! न कश्चिद्रहितो मया ॥
किमन्यत्कौतुकं देवि ! यन्मां त्वम्परिपृच्छसि ॥

॥उमोवाच॥

म्रियन्ते प्राप्तकालास्तु अनित्या मानवाः प्रभो ! ॥
सुषिरं न च पश्यामि पृथिव्यापस्तथा मनः ॥
ते नो गच्छन्ति वा कुत्र वायुराकाश एव च ॥

कर्मेन्द्रियाणि कुत्रैव पञ्च बुद्धीन्द्रियाणि च ॥
वायवः पञ्च तन्मात्रं कुतो गच्छन्ति शङ्करः ॥
कामक्रोधश्च लोभश्च मोहश्चैव तु कुत्र वा ॥
अहङ्कारस्तथा पुण्यं पापंवा कथयस्व मे ॥
नष्टे देहे कुतो यान्ति पवना विविधाश्च ये ॥
तत्सर्वं श्रोतुमिच्छामि भगवन्वक्तुमर्हसि ॥

॥ईश्वर उवाच॥

चोद्यंसश्चातितन्देवि शिवसिध्दान्तवेदनं॥
यन्न दृष्टं सुरेन्द्रैस्तु प्रवुध्दै : शास्त्रचिन्तकैः ॥
पूर्णकाले मृतानांच प्राणिनां तु यशस्विनि ! ॥
सूक्ष्मो भूत्वा अहन्तस्य निर्गच्छामि तदा प्रिये ! ॥
अथवा नवभिद्वारै रोमकूपेंन याम्यहम् ॥
ज्ञानवादिषु मूद्धर्नेण गुदया ब्रह्मवादिनं ॥
मयि विनिर्गते देवि निर्गच्छन्ति च देवताः ॥
मया विना निराधारः क्षिप्रं पतति काष्ठवत् ॥
कठिने लीयते पृथ्वी यैवेष्वापस्तथैव च ॥
तेजस्तेजसिलीयेत मारुते मारुते तथा ॥
आकाशश्चैव आकाशे सर्वव्यापि तु शङ्करः ॥
ततः कर्म च बुध्दिश्च वायवः पञ्च एव च ॥
कामः क्रोध अहंकार मन एकाग्रनायकं ॥
संहरामि अहन्देवि ! पुण्यं पापञ्च यद्भवेत् ॥
पुनर्देहोपि मुञ्चामि सुकृतं दुष्कृतं च यत् ॥
इन्द्रियैः पञ्चभिर्युक्तो देवतैः सर्वभिः सह ॥
न च देहे प्रविशामि गृहेदग्धेंगृही यथा ॥
यस्य देहे न तिष्ठामिं पराधीनस्य मानवे ॥
षट्कौशिकसमुत्पन्ने मातृजा पितृजास्तथा ॥
तांश्चसर्वान् त्यजिष्याम्यिवयवा ये च देहिनां ॥
मूत्रपुरीषसंयोगाद्ये चान्य इन्द्रियास्तथा ॥
पित्तं श्लेष्मा तथा मज्जा मान्स मेदस्तथैव च॥
अग्नि शुक्रवहे देहे देवता न चदह्यते ॥
एतद्गुणसमायुक्तं शरीरं सर्वदेहिनां ॥
कथयामि पुनस्तेषां शरीरस्य यथाविधि ॥

आत्मानं ये न जानन्ति ते मर्त्ये पशवः स्थिताः ॥
एवञ्च दवतैर्देवि! शरीरं सर्वदेहिनां कथयामि पुनस्तेषां शरीरस्य यथाविधि ॥
एकस्तम्भमया प्रोक्तं स्थाणैस्तिसृभिरावृतं ॥
इन्द्रियैः पञ्चभिर्युक्तं शरीरं द्वारभिर्न्नवैः॥
विषयैस्तु समाक्रान्तं कामक्रोधसमाकुलं ॥
रागद्वेषसमाकीर्णं तृष्णा तस्करदुर्गमः ॥
लोभजाल परिच्छन्नं मोहवस्त्रेण वेष्टितं ॥
सुवद्धवैष्णवीमायां चेतनाधिष्ठितं पुरं ॥
तिष्ठन्ति देवताः सर्वे भुवनानि चतुर्दश ॥
एवमेतत्समाख्यातं शरीरं सर्वदेहिनां ॥
यथा सृष्टि विसृष्टिश्च तत्सर्वकथितं मया ॥

॥उमोवाच॥

पुत्रदारकुटुम्बेषु अर्थेषु च सुरेश्वर ! ॥
कुर्वन्ति पातकं मूढा तन्मे निगद हे प्रभो ! ॥
गोवधं ब्रह्महत्याञ्च परद्रव्यं हरन्ति ये ॥
किञ्चिद्भागं कुटुम्बस्य न वा भवति ईश्वर ॥

॥महेश्वर उवाच॥

न हन्यमानो पुत्रोऽस्य न भ्राता नैव तत्पिता ॥
भवन्ति भागिनो चैव कुटुम्बार्थे करोति यः ॥
पुरुषो भृत्यवर्गस्य भ्राते पुत्रकुटुम्बयोः ॥
कस्यार्थङ्कुरुते पापं सर्वम्भवति चात्मने ॥
यानि यानि च पापामि कुर्वन्ति तमसान्विताः ॥
स्वशरीरे तु तत्सर्वन्निस्तरन्ति यशस्विनि ! ॥
भार्या यत्कुरुते धर्मन्नतद् भवति भर्त्तरि ॥
अदत्तं चैव नारीणान्न धर्मः प्राप्यते क्वचित् ॥
भृत्यसम्बन्धयो भार्या पुष्कलेन धनेन च ॥
स्वामिसम्बन्धिनोर्भृत्यो दोष नैव तु गृह्यते ॥
अधर्म्मं कुरुते नारी भर्तृधर्मेण मोहिता ॥
स्त्रियः सर्वं भवेद् देवि ! न भर्त्ता भागमर्हति ॥
भिक्षास्तु पञ्च शौचञ्च यच्च भर्त्तुरसम्मतं ॥
सर्वं भवति नारीणां न भर्त्ता भागमर्हति ॥
भृत्यवर्गादिसम्बन्धा यानि पापानि मानवे ॥

स्वदेहे तानि सर्वाणि उपतिष्ठन्ति नान्यथा ॥
मृतेन यान्ति नो भार्या न पुत्रा न च बान्धवाः ॥
तत्र धर्मो ह्यधर्मो वा जीवेन सह गच्छति ॥
न च यास्यति मित्राणि न माता भ्रातरस्तथाः ॥
नैव ते बन्धुवर्गाश्च न चात्मनि व्रतङ्गृहं ॥
पुत्रदार कुटुम्बाश्च भार्याः प्रियतराश्च याः ॥
गृहा दग्घा निवर्तन्ते श्मशाने देवबान्धवाः ॥
प्रिया भार्या प्रियं मित्रं प्रिय पुत्रः प्रियोजनः ॥
निश्वसित्वा प्रियो याति धर्मा एको व्रजेत्सकृत् ॥
धर्माधर्मसमो वन्धुस्त्रैलोक्य सचराचरे ॥
गृहीते कालपुरुषैः सहायो वा न विद्यते ॥
न चार्था नैव पुत्राश्च न भार्या न च वान्धवाः ॥
आधूनान्तानिवर्त्तन्ते गच्छन्तस्तु महापथे ॥
सुकृतं दुष्कृतं वापि गच्छन्तमनुगच्छति ॥
पितायत्कुरुते धर्मं पुत्रो वापि करिष्यति ॥
यस्तु धर्ममधर्मं वा पिता पुत्रो परोजनः ॥
स्वशरीरेण ते पापान्निस्तरिष्यन्ति मानवः ॥
पृच्छ पृच्छ च मां देवि : ! कथयामि पुनः पुनः ॥
उग्रे स्मरसि यत्किञ्चित् तत् सर्वं कथयाम्यहम् ॥

॥उमोवाच॥

भगवन् ! कर्मणा केन यान्ति यमपुरीन्नराः ॥
अन्ये ऽपि बहवो जीवा न यास्यन्ति च ताम्पुरीं ॥
कर्मणा केन यास्यन्ति न यास्यन्ति च केन ते ॥
अधर्मेण क्वयास्यन्ति क्वच धर्मेण मानवाः ॥

॥ईश्वर उवाच॥

श्रृणुदेवि ! परन्धर्ममधर्मश्चापरं श्रृणु ॥
धर्मेण यत्र यास्यन्ति अधर्मेण च ये नराः ॥
क्षुद्राश्च ये नरा देवि ! नित्यमप्रियवादिनः ॥
कुत्सिता व्यवहारेषु याम्यांगच्छन्ति तां पुरीं ॥
मिथ्यावाक्याश्च ये देवि ! ये चान्ये कुत्सिताः सदा ॥
पुरी यमस्य गच्छन्ति तेन पापेन मानवाः ॥
ये गाः स्पृशन्ति पादेन अधिक्षिपन्ति च द्विजान् ॥

तान्ते दुष्टा दुराचाराः पुरी गच्छन्ति ॥
कन्यानृतश्च ये देवि ! कुर्वन्ति तमस ॥
ते पि यान्ति न सन्देहो यमस्य तु पुरीं ॥
एकारात्रोषितो राजा व्यापारं यः करेत्सकृत् ॥
स यास्यति पुरीं घोरान्तेन पापेन कर्मणा ॥
मित्रद्रोही च यो देवि ! परद्रव्यापहारकः ॥
नित्यमसत्यवादी च पुरं तां स प्रपद्यते ॥
अश्वानृतश्च ये देवि ! तथान्यंच्चगवानृतं ॥
ये वदन्ति तमो मूढास्तेपि यान्ति यमालयं ॥
हृदये कल्मषं येषां तेषु दोषास्तु कारयेत् ॥
गुरौ चक्षुश्च संक्रुध्द्वं तेपि यान्ति यमालयं ॥
ये चान्ये दुष्टभावेन नराः पतितवुद्धयः ॥
कुर्वन्ति राज्यकर्मित्त्वं तेपि यान्ति यमालयं ॥
एकमप्यक्षरं देवि ! यो गृहीत्वा गुरोर्न्नरः ॥
नेच्छते स ततो ज्ञानं सोपि याति यमालयं ॥
अन्ये ऽ पि पुण्यकर्म्माणो नराः स्वच्छन्द देहिनः ॥
तां पुरी येन यास्यन्ति तान् सर्वान् कथयास्यहं ॥
तीर्थस्थाने म्रियन्ते ये पुण्य क्षेत्रे यशस्विंनि ! ॥
मम ध्यानपरा ये तु न ते यान्ति यमालयं ॥
उत्तरे च कुरौ देवि ! हिमवन्ते च ये मृताः ॥
पुरीन्तेपि न यास्यन्ति कृतपुण्याश्च ये नराः ॥
केदारे चैव ये देवि ! म्रियन्ते च महालये ॥
तुङ्गीशे च मृता ये तु न पश्यन्ति यमालयं ॥
कर्मादीपतने देवि ! ये चान्ये मरकण्टके ॥
यक्षेश्वरे वैद्यनाथे खेचरे रत्नचूडके ॥
देवघट्टे महेशे च क्षेत्रे पाशुपते मृतः ॥
वाराहक्षेत्रे जानक्या मातृवेणी स्थले मृताः ॥
श्रीशैले च मृता ये तु न ते यान्ति यमालयं ॥
महेन्द्रे मलये विन्ध्ये सज्ये (ह्ये) च मरुकेश्वरे ॥
भद्रेश्वरे मृता ये तु नते यान्ति यमालयं ॥
कालञ्जरे प्रभासे च गङ्गासागरसङ्गमे ॥
श्रीकण्ठे च मृता ये तु न ते यान्ति यमालयं ॥

नैमिषे च म्रियन्ते य न ते यास्यन्ति तां पुरीं ॥
अम्रातिकेश्वरे देवि ! त्ये चान्येकुक्कुटेश्वरे ॥
चण्डेश्वरे मृता ये च न ते यान्ति यमालयं ॥
रुद्र कोदृचापि ये देवि ॥म्रियन्ते चैव मानवाः ॥
मह्यं गवां प्रदानेन न ते यान्ति यमालयं ॥
ये मृता दक्षिणे मूर्त्तौ मम ध्यानरताश्च ये ॥
पृथूदके मृता ये तु न ते यान्ति यमालयं ॥
एवमेतानि गुह्यानि पुण्य क्षेत्राणि यानि वै ॥
मृतास्तेषु न पश्यन्ति मम भक्ताश्च ये नराः ॥
सर्वमेतत्समाख्यातं यत्किञ्चिद्धृदि संस्थितं ॥
अद्यापि किन्न प्रर्य्याप्तं यत्पृच्छसिपुनर्म्मते ! ॥

॥उमोवाच॥

प्रयागं पुष्करं देव ! तुङ्गीशं विमलेश्वरं ॥
देवदारुवनं चापि सहस्रेश्वरमेव च ॥
केदारम्मध्यमश्चैव तथा चाम्रातिकेश्वरं ॥
वाराणसीं देवघट्टं श्रीशैलञ्च महाव्रतं ॥
कालञ्जरं प्रभासञ्च श्रीकण्ठं कुक्कुटेश्वरं ॥
गोकर्णञ्चैव कर्म्मारिं वाराहं वीरभद्रकं ॥
एतेषु च मृता गावो नरा देवास्तथा परे ॥
पशुपते केन कार्येण इदं कौतूहलं मम ॥
किङ्गावः किङ्गुणा गावः किंवा गौरिति लक्षणं ॥
देवताः किं शरीरेऽस्मिन् किंवा दानफलं भवेत्
कम्बलं ककुदश्चैव केन वा निर्म्मितं प्रभो ! ॥
उत्पन्नाश्च कुतोगाव एतदिच्छामि वेदितुं ॥

॥ईश्वर उवाच॥

अमृते मथ्यमाने तु क्षीरोदे सागरे शुभे ॥
तत्रगावः समुत्पन्नाः कामिकाऽमृतसम्भवाः॥
समुद्राः पर्वता द्वीपाः पातालवसुधास्तथा ॥
गवां गात्रेषु तिष्ठन्ति निर्विकारास्तु सुन्दरि ! ॥
स्कन्धे साक्षात् स्थितो ब्रह्माय ग्रीवायां नन्दिकेश्वरः॥
नव ग्रहा ललाटेषु श्रृङ्गे तौ मेरुमन्दरौ ॥

कर्णेतु अशिवनौ देवौ नेत्रे चन्द्रदिवाकरौ ॥
पिशाचा वक्त्रमध्येतु दन्तमध्येतु राक्षसाः ॥
जठरे हुतभुङ् नित्यं जिह्वाग्रे च सरस्वती ॥
खुरमध्ये तु गन्धर्वाः खुराग्रेषु च पन्नगाः ॥
ऋषयो रोमकूपेषु पृष्ठवंशे पुरन्दरः ॥
भद्रकाली स्थिता पुच्छे जङ्घांयां वायुरेव च॥
वरुणो मूत्र विष्टेच अपाने जान्हवीतथा ॥
स्थिता देवाश्च हुङ्कारे समुद्राश्च पयोधराः ॥
असुरा अस्थिमध्ये तु मज्जायां किन्नराः स्थिताः॥
यक्षास्तु रोममध्यस्थाः श्रीश्च पृष्ठेप्रतिष्ठिताः ॥
सर्वदेवसमायुक्ता सर्वविद्याङ्ग सम्भवाः ॥
सर्वपापहरा नित्यमेतद्गुणशतोत्तमाः॥
ये स्पृशन्ति पदा देवि ! उच्छिष्टश्च ददत्यपि ॥
ब्रह्नहत्यादिकं पापं लभन्ते ते न संशयः ॥
पापकर्म दुराचार मया क्रुध्देन सुन्दरि ! ॥
वेशण्ढा इव जायन्ते मृता योनिचतुर्दश ॥
एतद्गुणसमायुक्ता गावस्तु कथिता मया ॥
वर्णन्तु कथयिष्यामि दानस्य च यथा फलं ॥
पीतरक्तास्तथा शुक्ला धूम्रा वै पाटला तथा ॥
श्यामा च कपिला नीला कृष्णा चैव तु सुन्दरि ! ॥
शुक्लया मम सन्तोषः शक्रः पाटलया तथा ॥
रक्तया तुष्यते ब्रह्मा श्यामया च हुताशनः ॥
ग्रहास्तुष्यन्ति धूम्राभिः पीताभिः पितरस्तथा ॥
कपिलानां प्रदानेन नरकस्थान् समुद्धरेत् ॥
अन्ये च पापकर्माणः पितरो ये च बान्धवाः ॥
नीला प्रापयते स्वर्गे कृष्णा दत्ता च (तथा) अक्षया ॥
वर्णस्तु कथितो देवि ! दानश्चैव यथाफलं ॥
सद्भावेन मया देवि ! त्वात्प्रयार्थं वरानने ! ॥

इति शिवधर्म उत्तरोत्तरे महासंवादे गोगुणो नाम पञ्चमोऽध्यायः

॥५॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उत्तरोत्तरे महासंवादे वृषगुणो नाम षष्ठोऽध्यायः

ॐ नमः शिवाय

॥उमोवाच ॥

एतद्गुणसमायुक्ता यथा गौः कथिता मम ॥
वृषश्चापि च को धर्मो वदशीघ्रं जगत्पते ! ॥

॥ईश्वर उवाच॥

नजानन्ति च लोकेऽस्मिन् मानवा मूढचेतसः ॥
चतुष्पादो भवेद्धर्मः शुक्लोऽयं मम वाहनः ॥
अग्निहोत्रस्य यज्ञस्य भक्ष्य भोज्यस्य वा फलं ॥
लोकस्य धनधान्यानि प्रजापतिप्रतिष्ठितं॥
दशानां यत्फलं देवि ! कपिलानां यशस्विनि ॥
एकदत्ते अनड्वाहें फलम्भवति सुन्दरि ! ॥
ब्राह्मणस्य दरिद्रस्य कुटुम्बापहतस्य च ॥
तेन यज्ञशतं चेष्टमनड्वाह ददाति यः ॥
अनड्वाहद्वयं दद्यात् सफलं युगधारिणं ॥
भूमिश्च सहवीजेन श्रृणु तस्यापि यत्फलं ॥
न पश्यामि क्षयं तस्य न मर्त्ये पुनरागमं ॥
दैवतैः सहितस्तिष्ठेद्यावत्तिष्ठति मेदिनी ॥
कपिलायास्तु यो धर्मो यो धर्मो वृषदानतः ॥
तन्मया कथितं सर्वं यच्चान्यत्कौतुकन्तव ॥

॥उमोवाच॥

अग्निहोत्राणि विप्राणामावसथ्यानि चापरे ॥

के तत्र अग्नयो देव ! यज्ञपात्राणि कानि च ॥
किमर्थं मण्डलं कुण्डः किमर्थं धनुराकृतिः ॥
चतुष्कोणेषु को ह्यग्निरेतत्पृच्छामि शङ्कर ! ॥
आहवनीये तु को देवो गार्हपत्येतथैव च ॥
दक्षिणाग्नौ तु को देवः को देवः समिधासु च ॥
दर्भे वा को भवेत्तत्र प्रणीतायां श्रुवेषु च ॥
घृतेषु उदकेष्वेव विष्टरेषु चको भवेत् ॥
अग्निषु कानिचाङ्गानि अङ्गारश्च तथा भवेत्॥
को होता हूयते कश्च किंवा कस्य तु दीयते ॥

॥ईश्वर उवाच॥

ॐ

इश्वर उवाच

साधु साधु महाप्राज्ञे पदं परमदुर्ल्लभं ।
त्वमेकां वर्ज्जयित्वा तु कस्यशक्तिर्वरानने ॥
अग्नयः कथयिष्यामि देवतास्तिथयस्तथा ।
ऋत्विजा यज्ञपात्राणि ये वा गृह्णान्ति आहुतिं ॥
मण्डले हूयते ब्रह्मा विष्णुश्च धनुषाकृतिः ।
चतुष्कोणे ह्यहन्देवि एवं वेदेप्रतिष्ठितम् ॥
दर्भेषु देवतानागाः प्रणीतापृथिवी तथा ।
श्रुक्श्रुवौवसवो देवि समिधायांवनस्पति : ॥
घृतेषुधेनवश्चैव अन्नाद्ये तु प्रजापतिः ।
आहूति स्वयं गृह्णामि होताश्चैव वृहस्पतिः ॥
उपस्पृश्यशुचिर्भूत्वा स्नातो वा मन्त्रवारिणा ।
वेदमन्त्रैस्तुसन्नद्धस्ततः कर्म्माणिकारयेत् ॥
आहुत्या च ततो ह्यग्निं गायत्रीं हृदयेन तु ।
प्रत्यंक्षो जायते विप्रः कुण्डं ह्यग्निर्यशस्विनि ॥
पराङ्मुखस्तु आहूय यज्ञपात्रं समाहरेत् ।
कुशान्दद्यात्तु पूर्व्वस्यांश्चतुरस्रमथापि वा ॥
अभ्युक्षे ये च पात्राणि श्रुक्श्रुवौ च प्रतापयेत् ।
ब्रह्माणन्दक्षिणं स्थाप्य प्रणीताश्चोत्तरे न्यसेत् ॥
आहिताग्निस्तु सान्निध्यमङ्गान्येव तु चिन्तयेत् ।
मुखङ्कृत्वा तु मेधावी होमयेत्तं विचक्षणः ॥
ॐ कारेणशिखांतस्य उकारेण शिरस्तथा ।
हूंकारेण ललाटन्तु वकारोवक्त्रमेव च ॥
चकारो हृदयं तस्य वकारो जठरः स्मृतः ।
सकारस्तस्यकवचं अग्नेश्चतस्रच प्रिये ॥
तकारस्तस्य वै ग्रीवा छिकारस्त्वंशयोस्तथा ।
तस्यमेढः पकारस्तु यकारमूरुमेव च ॥
सेकाराः जानुसन्धिश्च भकारो पृष्ठतोन्यसेत् ।
गोकारश्च भवेत्पादौ पुनरन्यङ्कथाम्यहम् ॥
देकारश्च वकारश्च केशास्तु परिकीर्तिताः ।
सकारस्य तु धीकारो जिह्वाग्नेस्तु प्रकीर्तिताः ॥
यो कारस्तस्य अग्नेस्तु नेत्राणि च विनिर्द्दिशेत् ।
मकारो दशनास्तस्य यकारः पद्म हृदयम् ॥

अग्नेयस्तस्य वाकारो स्त्रयाणां परिकीर्तितः ।
सर्व्वकर्म्मसु विज्ञेयो दकारश्च भकारकः ॥
एवं वैश्वानरो ज्ञात्वा देवि अङ्गानि वुद्धिमान् ।
अविदितेषुचाङ्गेषु होमञ्च नजुहेन्नरः ॥
वन्हिर्लीलायते यस्तु शुद्धस्फटिकनिर्म्मलः ।
तन्मुखञ्चैव विज्ञेयं चतुरङ्गुलमानतः ॥
तस्य मध्ये तु होतव्यं ततो गृह्णाति आहुतिं ।
एवं यो ज्ञायते ह्यग्निन्तस्य पुण्यफलंशृणु ॥
दैविकानांयुगानां च सहस्रपरिसंख्यया ।
शतं पैतामहन्तस्य अहोरात्रं प्रर्कीतितं ॥
तावत्ते पुण्ययष्टारोविधिलोक मुपागता ।
तिष्ठन्ति पुण्यकर्म्माणो जापिनो हि विधानतः ॥
पञ्चचैवमहायज्ञा ब्रह्मणा परिकीर्तिताः ।
कर्तव्यानि च कर्म्माणि अग्निहोत्रमुपासकाः ॥
तिथयः पूजनञ्चैव अतिथ्यागमनस्य च ।
चातुर्म्मास्यां यस्यरति ऋतुकालाभिगामिनाम् ॥
उषिते चैव होतव्य तथा मध्यन्दिनेषु च ।
आरण्यजोषधो चैव न तु ग्रामसमुद्भवे ॥
श्यामाकैर्विल्वपत्रैश्च कन्दमूलैर्फलैस्तथा ।
होमयेदग्निहोत्राणि न गृह्णीयात्प्रतिग्रहम् ॥
यथा वै कर्षको देवि भागंलभतिपञ्चमं ।
परद्रव्येण होता च तद्वद्भागेन युज्यते ॥
एवञ्चैव यथोक्तन्तु अग्निहोत्रमुपासते ।
ते यान्ति परमं स्थानं यत्र देवो पितामहः ॥
अग्निहोत्र फलावेदाः सषडङ्गपदक्रमाः ।
अग्निहोत्र समो धर्म्मो नभूतो न भविष्यति ॥

इति पशुपतिमते शिवधर्मोत्तरे महासंवादे षष्ठोऽध्यायः ॥

अथ पशुपतिमते शिवधर्मोत्तरे महासंवादे
सप्तमोऽध्याय ॥

ॐ नमः शिवाय

॥इश्वर उवाच॥

गुणा एते समाख्याता दोषान्वक्ष्यामि ताञ्छृणु ।
प्रयत्नेनापि ते देवि वर्ज्जनीयाद्विजादिभिः ॥१॥
अज्ञानेन तु यो देवि होमयेन्मूढचेतसः ॥
स वै वर्षसहस्रं तु जायते ब्रह्मराक्षसः ॥२॥
यो मतेन तु दम्भेन जीवसंरक्षणाय च ।
होमयेत्परवित्तेन नरकं स प्रपद्यते ॥३॥
अग्निहोत्रमिमंकृत्वा यो वृत्तिमुपरक्षति ।
कर्म्महानिर्भवेत्तस्य आत्मानं स विडम्वति ॥४॥
अशुद्धे न तु भावेन नैव जानन्ति देवताः ।
दम्भेनापि च ते देवि न तस्य फलमश्नुते ॥५॥
फलेन अग्निहोत्रस्य ये गुणास्ते यशश्विनि ।
लभन्ते नैव तां मूढा नित्यं क्लेशस्यभाजनाः ॥६॥
परद्रव्येणहोमस्य यक्षास्तस्य तु देवताः ।
विनामन्त्रेण होमस्य असुरास्तत्रदेवताः ॥७॥
वेलातिक्रमहोमस्य राक्षसास्तत्रदेवताः ।
अशुचेरन्नहोमस्य पिशाचास्तत्रदेवताः ॥८॥
पुत्रं पत्नीन्तथा शिष्यं होमकर्म्मसु कारयेत् ।
आहुतीं परदत्तास्तु क्षिप्रंगृह्णन्ति गुह्यकाः ॥९॥
ब्राह्मणानां हितार्थाय त्वमेवपरिपृच्छसि ।
तेन देवि मयाख्यातमग्निहोत्रस्य ये गुणाः ॥१०॥
दोषास्तु ये मयाप्रोक्तास्ते त्वयाविदिताः प्रिये ।
सर्व्वंव्रतानि वेदेषु ब्राह्मणायोदितानि वै ॥११॥
किमन्यत्कथयिष्यामि तत्प्रचोद्यं प्रियेमम ॥१२॥

॥उमोवाच ॥

को वेदः केगुणावेदे किञ्च वेदस्यलक्षणम् ॥
केन वा निर्म्मितावेदाः कथम्वेदोभिधीयते ॥१३॥

स्वरैश्च कीदृशैः शम्भो वेदमध्यापयन्ति ते ।
वेदस्यकीदृशीभूमि ब्राह्मणैर्यत्रपठ्यते ॥१४॥
त्यजन्ति कीदृशीं विप्रा भूमिमध्ययनार्थिनः ॥
ये च वेदं विनासन्ति ये चान्ये वेद विघ्नकाः ॥१५॥
तान्सर्व्वान्कथयास्माकं ये च वेदोपजीविनः ॥१६॥

॥ईश्वर उवाच॥

पर्व्वते चत्वरे वापि वने वा कन्दरेतथा ॥
विजने च समेवापि सदा वेदमुदीरयेत् ॥१७॥
यज्ञवाटेगवांगोष्ठेतीर्थेष्वायतनेषु च ॥
वेदानुदीरयेत्तत्र एकान्ते म्लेच्छवर्ज्जिते ॥१८॥
शालायामग्निहोत्रस्य देवतागुरुसन्निधौ ॥
एतेष्वेव हि पठ्यन्ते शेषभूमास्तु वर्ज्जयेत् ॥१९॥
यः पठेत्स्वरहीनम्वा लक्षणेनविवर्ज्जितं ॥
संकीर्णे ग्राममध्ये च सभवेद्वेदविघ्नकः ॥२०॥
रथ्यापर्य्यटमानस्तु चण्डालः शृणुतेक्वचित् ॥
तत्क्षणाज्जायते शूद्रे मृतः श्वानोऽभिजायते ॥२१॥
चितिवृक्षन्तु यः स्पृष्ट्वा यज्ञयूपंतथैव च ॥
वेदस्य विघ्नकं दृष्ट्वा स्नानमेवविधीयते ॥२२॥
आसनस्थः सुखासीनः सप्तस्वरविभूषितः ॥
न च सङ्कुचितग्रीवो वेदमभ्यसने सदा ॥२३॥
उत्तानौ तु करौकृत्वा लग्नोवैजानुसन्धिषु ॥
पश्यतो अंगुलीस्सर्व्वा उदात्तमनुदात्तकम् ॥२४॥
स्वरान्तत्रप्रवक्ष्यामि ये सूक्ष्मा वेदसम्भवाः ॥
सप्ताश्चैवतु विख्याताः यैरिदं वेष्टितंजगत् ॥२५॥
नतैर्व्विरहितावेदाः न तु विद्याविशेषतः ॥
वेदार्थे च मयासृष्टाः स्वराः सप्तप्रकीर्तिताः ॥२६॥
उदात्तौनिषधगान्धारौ अनुदात्तौ ऋषभधैवतौ ॥
शेषास्तु स्वरिताज्ञेयाः षड्जमध्यमपञ्चमाः ॥२७॥
एवं वै ये न जानन्ति स्वरलक्षणवर्जिताः ॥
ते रूपस्य यथान्धो वै नैवकिञ्चिद्विवुध्यति ॥२८॥
पठन्तिवेदान् ये देवि न तु विन्दन्तिदेवतां ॥
नरकंयान्ति ते घोरं भारवाहीचगर्द्दभः ॥२९॥

यत्तेपरतरंशास्त्रं मया वेदेषुभाषितं ॥
तद्वेदान्ते च वेदादौनविन्दन्तिद्विजातयः ॥३०॥
यच्चवेदमयंशास्त्रं सर्व्ववेदमयंजगत् ॥
शरीरं वेदजासर्व्वासिद्धान्तम्वेद सम्भवम् ॥३१॥
अहं वेदा अहम्विद्या अहं यज्ञा अहं तपः ॥
अग्निर्ज्योतिरहंवायुरहम्पर्ज्जन्यरेव च ॥३२॥
अहं ब्रह्मा अहं विष्णुरहमिन्द्रः प्रजापतिः ।
अहं यज्ञेषुपुरुषो अहं होता अहं क्रतुः ॥३३॥
विप्रायजन्तिमामेव स्वयमेवयजाम्यहं ।
रुद्राश्च वसवोदेवाः नक्षत्राणि च सागराः ॥३४॥
यज्ञपात्राणि मन्त्राश्च येचान्ये विप्रनायकाः ॥
अव्यक्तेन तु तिष्ठामि त्रैलोक्येसचराचरे ॥३५॥
येन्दे जानन्तिमावि न ते वेदस्यपारगाः ।
वेदञ्च ये न जानन्ति यो वेदः स तु शंकरः ॥३६॥
नकिञ्चिदन्तंरदेवि मूढाविन्दन्तिचान्यथा ॥
वेदात्परतरोधर्म्मो न वेदाच्च परन्तपः ॥३७॥
ये तु विन्दन्तिवेदार्थन्तएवज्ञानिनोमताः ॥
उपजीवन्ति ये वेदं पापकर्म्मद्विजातयः ॥३८॥
दिव्यवर्षसहस्रन्तु शूद्रोच्छिष्टेनजीविनः ॥
वेदोपजीविनो विप्राः स्त्रीलौल्यात्सततञ्च ये ॥३९॥
कोकाभवन्ति ते देवि सुचिरंविष्टीभक्षकाः ॥
आदेशात्पठते यस्तु राजद्वारेद्विजाधमः ॥४०॥
सोपिवृक्षोभवेद्देवि उषरेकण्टकावृतः ॥
वेदादेशेनगृह्णाति राजद्रव्यञ्च यो द्विजः ॥४१॥
पच्यते आमगर्भे तु वर्षकोटीशतानि च ॥
आदेशात्पठते यस्तु आदेशञ्च ददाति यः ॥४२॥
द्वावेतौपापकर्म्माणौ पातालतलवासिनौ ॥
स्वराणां ब्राह्मणानाञ्च कथितंतवसुव्रते ॥४३॥
किमन्यत्कारणन्देवि कथायामि पुनः पुनः ॥४४॥

॥उमोवाच॥

एते वेदस्वराः सप्तकथिता वेदकारणाः ॥
कीदृशास्ते तु विज्ञेयाः किंवर्णम्किञ्चलक्षणम् ॥४५॥

अष्टौ भावास्ततो देव मूर्च्छना एकविंशति ॥
एकैकस्य तु किन्नाम वदशम्भोप्रसीद मे ॥४६॥

॥इश्वर उवाच॥

स्वराश्चैव प्रवक्ष्यामि यैरिदं वर्तते जगत् ॥
स्वरहीनानिवर्तन्ते वायवः स्वरलक्षणाः ॥४७॥
स्वरं नदन्तिश्रोत्राणि वातश्चाङ्गिरते श्वरम् ॥
स्वरप्रणीतं त्रैलोक्यं स्वरेशब्दाः प्रतिष्ठिताः ॥४८॥
मयूरो वदतेषड्जं निषादंवदतेगजः ॥४९॥
कालेप्रावृषि वै देवि दर्दुरोधैवतंवदेत् ॥
पुष्पसाधारणेकाले कोकिलापञ्चमं वदेत् ॥५०॥
विप्यकाको ? वदेद्देवि स्वरमृषभमेव च ॥
एतेचैव स्वराः प्रोक्ताः वर्णम्वैकथयाम्यहम् ॥५१॥
षड्ज आरक्तवर्णाभो दाडिमीकुसुमप्रभः ॥
ऋषभस्तु भवेत्पीतः किंकरातसमप्रशः ॥५२॥
गान्धारः पाण्डराभञ्च शुक्लञ्चैव तु मध्यमः ॥
पञ्चमः श्यामवर्णस्तु अतसीकुसुमप्रभः ॥५३॥
कृष्णवर्णनिषादस्तु कोकिलाग्रीवसन्निभः ॥
एते देवि त्रयोग्रामे ब्रह्मंविष्णुमहेश्वराः ॥५४॥
शादवप्रमुखाज्ञेयाः स्वरान्योन्यप्रभेदकाः ॥
सजातीषु विज़ातीषु सहस्रगुणविस्तराः ॥५५॥
पितृवन्हि समुत्पन्नाः पञ्च ये पञ्चमाः स्मृताः ॥
ऋषभागकुले देवि उत्पन्ना ऋषभ धैवताः ॥५६॥
जितान्यन्योन्य भेदेन प्रकृतं संस्कृतेन च ।
देवजातीकुलोत्पन्नाः षड्जगान्धारगध्यमाः ॥५७॥
असुराणां समुत्पन्नानिषदस्तु यशस्विनि ॥
मध्यान्हे शादवं कुर्यादपरान्हे च गध्यमम् ॥५८॥
सन्ध्याकाले तु संप्राप्ते कुर्यान्मालवकौशिकम् ॥
रात्रौ तु प्रथमेयामे निषादङ्कारयेद्बुधः ॥५९॥
द्वितीयेप्रहरे चैव धैवतन्तु विचक्षणः ॥
यामे तृतीयके चैव यानिभिन्नानिपञ्चमं ॥६०॥
तानि सर्व्वाणि मेधावी गायते शावितात्मवान् ॥
यामके तु चतुर्थेस्मिन् भिन्नषड्जंसमाश्रयेत् ॥६१॥

गान्धारं पूर्व्वमादित्यैर्देविकायां प्रयुञ्जते ॥
दिवसेप्रथमेयामे कुर्याद्विरक्र्ककैशिकं ॥६२॥
भुक्तेन्तरे तु कर्तव्यः सौराष्ट्रं पञ्चमानि तु ॥
एवं वेलाविशेषेण गान्धर्वंसुविचारितम् ॥६३॥
मूर्च्छनां कथयिष्यामि यथानामानि सुन्दरी ॥
नन्दीविशालासुमुखी चित्राचित्रवती तथा ॥६४॥
शुभावेला तु विज्ञेया देवानां सप्तमूर्च्छना ॥
आप्यायनी विश्वधृता चन्द्रहेमकपर्द्दिनी ॥६५॥
चैत्रीचावाहनीचैव पितृणां सप्तमूर्च्छनाः ॥
उत्तरा च तथा मन्दा द्वितीया चातिरङ्गिकाः ॥६६॥
अश्वक्रान्ता च भौम्येषु शुद्धषड्जस्तथैव च ॥
नारायणीतिरजनी ऋषीणां सप्तमूर्च्छना ॥६७॥
ये गायन्ति नरा देवि जायन्ते ते न मानुषा ॥
उपवेदाः स्मृता देवि वेदाँश्चैव मया पुरा ॥६८॥
कर्तव्या च प्रयत्नेन मानवैर्वेदचिन्तकैः ॥
यजुर्वेदस्य वेदोप धनुर्वेद यशस्विनि ॥६९॥
सामवेदस्य गान्धर्व्वमुपवेदः स्मृतो मया ॥
ऋग्वेदोऽ थर्ववेदश्च अर्थशास्त्राणि वा पुनः ॥७०॥
एतेचैव तु वेदाँश्च सामान्य नात्र शंसयः ॥
लिङ्गस्याश्रयणं कृत्वा लक्षभूतं मम प्रिये ॥७१॥
गायते मम भक्तस्तु तस्य पुण्यफलं शृणु ॥
अशुद्धं स्वरहीनं वा ये गायन्ति शिवालये ॥७२॥
सप्तक्रतु शतन्देवि तेषां पुण्य फलं भवेत् ॥
गायन्ति मम भक्तास्तु ताल लक्षण संयुता ॥७३॥
भविताश्चान्तरात्मानस्तेषां मोक्षं ददाम्यहम् ॥
यो पि गायती शाठ्येन परार्थे तु शिवालये ॥७४॥
सोपि क्रतुसहस्रस्य फलं प्राप्नोतिमानवः ॥
वृत्ति लोभेन यो देवि गायते च ममाग्रतः ॥७५॥
सोपि वर्षसहस्रन्तु ममतुल्यो भवेन्नरः ॥
भावस्यैव तु दानस्य नास्तिसंख्यायशस्विनि ॥७६॥
एवं समासृते गेये तस्यसंख्यानविद्यते ॥
नघृते तादृशीतृप्तिर्नक्षीरे न च गुग्गुलौ ॥७७॥
यादृशी चैव गान्धर्व्वैर्ममतृप्तिर्वरानने ॥
नोत्पलेन न विल्वेन न तु पद्मैः सुगन्धिभिः ॥७८॥

गन्धर्व्वैश्चैव तुस्यामिताललक्षणवर्ज्जितैः ॥
हिमवन्ते च कैलासे अहं तिष्ठामि यद्यपि ॥७९॥
मम गायन्ति ये देवि तेषु तिष्ठामिचाग्रतः ॥
लभ्यते यन्न वेदेषु सिद्धान्तेषु विचक्षणैः ॥८०॥
लभन्ते गायकास्तानि मयितुष्टे स्वयंविभु ॥
गान्धर्व्वस्य मया देवि कथितं लक्षणं प्रिये ॥८१॥
अन्यद्वा पृच्छ यत्किञ्चिद्धितं लोकस्य सुन्दरि ॥८२॥

॥उमोवाच॥

तिर्थानि मर्त्यलोकेस्मिन् भवन्ति विविधानि च ॥
भस्मस्नानस्य किं पुण्यं येन स्नातः सुरेश्वरः ॥८३॥

॥इश्वर उवाच॥

इदंस्नानञ्च मे दिव्यन्दुर्वोध्यन्दैवतैरपि ।
स्नानन्देवो न वुध्यन्ति वर्ज्जयित्वा च मां प्रिये ॥८४॥
यत्फलं सर्व्वतीर्थेषु सर्व्वयज्ञेषु यत्फलम् ॥
तत्फलं लभते देवि मन्त्रहीनस्तु मानवः ॥८५॥
दीक्षांप्राप्य तु यो देवि भस्मस्नानं समाचरेत् ॥
न तं युगसहस्रेषु लभन्ते वेदचिन्तकाः ॥८६॥
भस्मं ये मन्त्रसंयुक्तं गुरुभक्त्या लभन्ति वै ॥
लब्धन्तैर्मुक्तिदंज्ञानं पदं परमदुर्ल्लभं ॥८७॥
दिनमेकं तु यो भस्म मन्त्रैसह समन्विते ॥
सूर्यग्रहे तु सुस्नातः फलं भवति मन्त्रविद् ॥८८॥
ब्रह्मचर्येण यो भस्म एकरात्रन्तु धारयेत् ॥
अग्निष्टोमस्य यज्ञस्य फलं भवति भष्मविद् ॥८९॥
त्रिकालञ्चापि यो भस्म यावज्जीवेन धारयेत् ॥
तस्य मोक्षो भवेद्देवि सत्यन्ते कथितं मया ॥९०॥
तस्मात्भूत शरीरस्तु सेवते यदि मैथुनम् ॥
यावती रेणुसंख्यास्यात्तावत्स नरकं व्रजेत् ॥९१॥
जटामुकुटधारी तु भस्मोद्भूतस्तु सुव्रते ॥
सेवते मैथुनं यस्तु तस्य पापङ्कथाम्यहम् ॥९२॥
जटायां चैव केशानां परिमाणन्तु तेपु यत् ॥
तावद्वर्षसहस्राणि नरके पच्यतेऽवुधः ॥९३॥

क्षीयन्ते ते यदा दोषा दीक्षितानां वरानने ॥
इष्टाँल्लभन्ते तस्यान्ते सुरलोकं हि मानवाः ॥९४॥
मम भक्तास्तु ये देवि पापेन नरकं गताः ॥
क्षयान्ते तस्य पापस्य उद्धरेहं गुणेन तु ॥९५॥
मयाख्यातं प्रिये तुभ्यं पृच्छसे किमतः परं ॥
कथयामि न संदेहस्तवस्नेहाद्विशेषतः ॥९६॥

॥ उमोवाचः ॥

देव देवीति मां ब्रूयात्कादेवीति अहं प्रभो ॥
अत्र मे शंसयो देव प्रसीद कथयस्व मे ॥९७॥

॥इश्वर उवाच ॥

किन्न वुध्यसि आत्मानं लोकसन्तान कारिणीं ॥
प्रकृतिस्त्वं महादेवि पुरुषोऽहं न शंसयः ॥९८॥
ब्रह्मरूपेण स्रष्टाहं विष्णोः स्थितिर्लयं स्वयं ॥
त्वया मया वरारोहे सर्व्वव्याप्तमिदं जगत् ॥९९॥
उमादेवीति गौरीति गायन्ति वरसुन्दरी ॥
कालिकाकालरात्री च सावित्री च वसुन्धरा ॥१००॥
शरण्यावरदा देवि भक्तानां भक्तिवत्सला ॥
कात्यायनीस्वधास्वाहावेतालीब्रह्मवादिनी ॥१०१॥
रौद्री च भद्रकाली च दुर्गादेवि वरप्रदा ॥
ब्रह्माणी चैव ऐशानी कौमारी च वरानने ॥१०२॥
वैष्णवी चैव वाराही माहेन्द्री वायेवेति च ॥
चामुण्डा चैव विज्ञेया महायोगेश्वरेश्वरी ॥१०३॥
आचार्या योगविद्या च विख्याता सुरसुन्दरि ॥
क्रिया पुष्टिः सुधा तुष्टिः द्युतिर्लक्ष्मी सरस्वती ॥१०४॥
मेधावुद्धिमतितृष्णानिद्राप्रीतिस्तडिच्छुभे ॥
लज्जाक्षान्तिरहिं सा च प्रकृतिस्त्रिगुणात्मिका ॥१०५॥
मन्दाकिनी तथा गङ्गा यमुना चैव नर्म्मदा ॥
गोदावरी तथातापी भीमगङ्गानदी शुभा ॥१०६॥
तुङ्गगङ्गा पद्मवती वेण्याचैव सरस्वती ॥
विपाशा घर्घराश्चैव सिन्धुश्चैव महानदी ॥१०७॥
कावेरी कपिलाख्याता याच्चान्या पुण्यवाहिनी ॥
नन्दा च उपनन्दा च करतोया महानदी ॥१०८॥

पातालेयाश्च मर्त्ये च सुरलोके च यास्त्रियः ॥
स्वर्लोके अन्तरिक्षे च दुर्गे चैव समेषु च ॥१०९॥
दिशायाम्विदिशायाञ्च सप्तलोकेषु यास्थिताः ॥
सर्व्वत्रैवस्थितादेवि यथाहं सर्वतोमुखः ॥११०॥
अरुन्धती तथा सीता देवीमन्दोदरी तथा ॥
लोकेयास्त्रीस्वरूपेण दीव्या वै देवि प्रोच्यते ॥१११॥
त्वयामया इदं व्याप्तं त्रैलोक्ये सचराचरे ॥
एतत्त्वंकथितादेवि किं भूय श्रोतुमिच्छसि ॥११२॥

॥उमोवाच ॥

यद्यहं सर्व्वगा शर्व्व सर्व्वलोके व्यवस्थिता ॥
गौरी सरस्वतीलक्ष्मी धरणी लोकधारणी ॥११३॥
सीता च पत्नीरामस्य दयितारावणस्य च ॥
तत्किमर्थमिमं जन्म गृहे वै जनकस्य तु ॥११४॥

॥महेश्वर उवाच॥

विश्वावसुर्न्नामऋषिः कुलसन्ततिकारकः ॥
तस्यपुत्रो महाभागः दशग्रीवो महावलः ॥११५॥
दशवर्षसहस्राणि वायुभक्षेण तेन वै ॥
आराधितो ह्यहं देवि छिन्दयित्वा शिराँसि च ॥११६॥
पश्चाद्गान्धर्व्वशब्देन अहं तुष्टो वरानने ॥
प्रजापति मुखेनैवं दत्तमिष्टवरम्मया ॥११७॥
पातालं मानुषं स्वर्गं त्रैलोक्यं सचराचरं ॥
स्ववश्यानि करिष्यन्ति मत्प्रसादाच्चराचरं ॥११८॥
एवं लब्धवरो देवि राक्षसो मदमोहितः ॥
त्वयावचोदितः पूर्व्वम् वरमिष्टन्ददाम्यहम् ॥११९॥
प्रत्युवाच स दीनात्मा स्त्रियायानेच्छतिवरं ॥
एवं ब्रुवतपौलस्त्य त्वञ्चापि रुषितानना: ॥१२०॥
यस्मात्त्वं नेच्छतेमूढ स्त्रीहेतोर्म्मरणं भव ॥
नन्दिना च तथैवोक्तं वरमिष्टं ददाम्यहम् ॥१२१॥
वानरेण वरंदत्तन्नकार्यं किञ्चिदस्ति मे ॥
त्वयाशप्तोदुरात्मानो मन्दवुद्धिस्तु राक्षसः ॥१२२॥
शापितो नन्दिकेशेन वानरैश्च वधिष्यसि ॥
तेन सीताभवेद्देवि रावणस्य वधाय वै ॥१२३॥

स्त्रीरूपेण सुवेषेण कृत्वामुत्पादितामया ॥
रावणस्यवधार्थाय नन्दिशाप प्रभावतः ॥१२४॥
देवतुल्यवलाः सर्व्वे वानराः सृजितामया ॥
येनासौ रामदेवेन मयादेवैस्तु वर्ज्जितः ॥१२५॥
वानरैस्तु विनादेवि को योधयति रावणं ॥
कथितं जन्मदेवेशि जनकस्य गृहे तव ॥१२६॥
पत्नीत्वं रामदेवस्य किमन्यत्कथयामि च ॥

॥उमोवाच ॥

कोदेवो रामदेवोयं कस्यपुत्रो सुरेश्वरः ॥
किंवीर्यं वानराणाञ्च के वा वानरपुंगवाः ॥१२७॥
एतत्कथय मे सर्व्वं प्रसीद भवशंकरः ॥

॥महेश्वर उवाच ॥

राजादशरथो नाम इक्ष्वाकुकुलसम्भवः ॥
अपुत्रस्त्वभवत्सो वै धर्म्मज्ञोसत्यवाक् नृपः ॥१२८॥
वेश्याभिर्मुनिरूपाभि रानयिष्यन्नृषेः सुतं ॥
लोभयित्वाउपायेन स्वपुरं पितुराश्रमात् ॥१२९॥
राज्ञश्चापत्यलाभाय ऋष्य शृङ्गं महामुनिं ॥
अश्वमेधं क्रतुश्रेष्ठमिष्ट्वावहु सुवर्णकं ।
रामश्च लक्ष्मणश्चैव शत्रुघ्नो भरतस्तथा ॥१३०॥
एते पुत्राः समुत्पन्नाः महावीर्यपराक्रमाः ॥
स एव रामदेवस्तु विख्यातगुणपौरुषः ॥१३१॥
नीलोत्पलदलश्याम अतसीपुष्प सन्निभः ॥
दीर्घवाहुर्विशालाक्षः पीनस्कन्धो महाद्युतिः ॥१३२॥
चापहस्तो वरारोहे अयोध्यस्त्रिदशैरपि ॥
स्वयंकृष्णश्च यो देवि शंखचक्रगदाधरः ॥१३३॥
सहस्रभुजशीर्षञ्च सहस्रायुधधृक्प्रभुः ॥
असुराणाम्बधार्थाय अवतीर्णोस्तुभूतले ॥१३४॥
ब्रह्मादीनां नियोगाद्धि विष्णुर्मानुष्यताङ्गतः ॥
त्वच्छापस्य प्रभावाच्च नन्दीशस्य च सुन्दरि ॥१३५॥
निवासितं वनेदेवि सीताहरणमोहितः ॥
वानराश्चैव ये देवि महावीर्या महावलाः ॥१३६॥

नियुक्तास्तु वरारोहे वधार्थंरावणस्य तु ॥
जम्भवस्तु भवेद्ब्रह्मा वालिइन्द्रः प्रकीर्तितः ॥१३७॥
सुग्रीवश्चैव आदित्य रुद्रोहं हनुमान्स्मृतः ॥
गवाक्षस्तु भवेद्यक्षो धनदः स्वयमेव तु ॥१३८॥
गवयरश्विनौदेवौ नलस्तु वरुणः स्मृतः ॥
वैश्वानरो भवेन्नीलो द्विजराजस्तु अंगदः ॥१३९॥
सुसेनस्तु महावीर्यः सोपि धन्वन्तरिः स्मृतः ॥
एवं रामः स्वयं विष्णुर्देवो वै वानराः स्मृताः ॥१४०॥
अशक्ता रावणं जेतुं देवरूपेण सुन्दरि ॥
विभीषणसहायस्तु रामः लक्ष्मण मारुतिः ॥
सुग्रीवप्रमुखा देवि देवकार्यं प्रचक्रिरे ॥
इत्येतत्कथितं देवि रामवानरराक्षसां ॥
अद्यापि त्वं न पर्याप्तं किंपृच्छसि वरानने

॥उमोवाच ॥

यदि विष्णुर्भवेद्देवः स्वयं स्रष्टा जगत्पतिः ॥
तत्किमर्थं भवेद्देव पुत्रोयं मानुषस्य तु ॥
एतत्कथय देवेश इदं कौतूहलं हि मे ॥

॥महेश्वर उवाच ॥

शृणुदेवि परं गुह्यं विष्णोर्जन्म महात्मनः ॥
ब्रह्मशाप प्रभावेन श्वांशेन निरयङ्गतः ॥
भृगुर्नाममहाभागो ब्राह्मण ऋषिरुत्तमः ॥
तेन संरक्षणार्थाय प्रार्थितो मधुसूदनः ॥
यज्ञं पुरुषमेधस्तु यजेहं तवतेजसा ॥
असुराद्राक्षसात्सर्व्वे तन्मेरक्षजनार्द्दनः ॥
वाचंदत्वा ततस्तेन ऋषयेस्मै महात्मने ॥
न रक्षितस्तु तद्यज्ञ असुरैस्तु विमर्द्दितः ॥
ततस्तंदोग्रतेजसा भृगुणा केशवः प्रिये ॥
शपितस्तुवरारोहे गच्छत्वं नरकादिषु ॥
तस्यशाप प्रभावेन ऋषयस्य महात्मनः ॥
नरकान्साधयेद्देवि कथितस्ते जनार्द्दनः ॥
प्रथमं मत्स्यरूपेण पातालाच्च समुद्धृताः ॥
मधुकैटभहृतावेदाश्चत्वार शिरसा शुभे ॥
द्वितीये कूर्म्मरूपस्तु क्षीराब्धौप्रविशन्शुभे ॥

मन्दरंधरति विष्णुः पृष्ठेनामृतमन्थने ॥
तृतीये नारसिंहस्तु जन्मनारायणस्य तु ॥
हिरण्यकशिपोर्नाशं कुरुते स जनार्द्दनः ॥
भूत्वा यज्ञवराहस्तु हिरण्याक्ष्यं महासुरं ॥
पृथिवीमुद्धरन्विष्णुर्हत्वाद्देवि चतुर्थके ॥
पञ्चमेवामनो भूत्वागत्वादेवि महाध्वरं ॥
वञ्चयित्वासुरपतिं क्रामतिस्म त्रिविष्टकं ॥
षष्ठेतु भार्ग्गवोरामो गृहीतपरशुर्द्विजः ॥
देवि क्षत्रियहीनाञ्च करिष्यति वसुन्धरां ॥
सप्तमस्तु भवेद्रामः सुतोदशरथस्य तु ॥
वध्वामहौदधिन्देवि राक्षसानां कुलक्षये ॥
अष्टमे वासुदेवस्तु धनञ्जयसहायवान् ॥
भाराक्रान्तामिमामुर्व्वींलह्वीकर्त्ता सुचिस्मिते ॥
नवमे शाक्यगोत्रे तु सुद्धोदनसुतोवली ॥
वौद्धं धर्म्मंसमस्थाप्य करिष्येद्धर्म्म देशनः ॥
दशमेकल्किराजस्तु ब्राह्मणो हरिपिङ्गलः ॥
म्लेच्छान्संहरति देवि गृहीतस्तुः कुशायुधः ॥
ब्राह्मणो नावमन्तव्यास्त्रैलोक्यस्थितिहेतवः ॥
ये पूजिताः सुराः सर्व्वे पूजितास्तुनसंशयः ॥
विष्णोरपि प्रभुत्वेन शापानुग्रहकारकाः ॥
यै सन्तुष्टैर्भवेत्स्वर्गं नरकन्तद्विपर्ययात् ॥
तस्माच्च ब्राह्मणोमूल भोगनिश्रेयसादिषु ॥
ज्ञानमूलाः क्रियासर्व्वाः फलमूलाभियोजिताः ॥
एतत्ते कथितन्देवि किम्भूयच्छ्रोतुमर्हसि ॥

इति शिवधर्म्मोत्तरे महासम्वादे सप्तमोऽध्यायः ॥

अथ पशुपतिमते शिवधर्मोत्तरे गहासम्वादे

अष्टमोऽध्यायः ॥

ॐ नमः शिवाय ॥

॥उमोवाच ॥

पृथिव्यां भगवन्देव नरनारीजनास्तथा ॥
यथोक्तान्न चरिष्यन्ति तद्‌भवान्वक्तुमर्हसि ॥

॥महेश्वर उवाच ॥

पृथिव्यां तु वरारोहे नरनारीजनास्तथा ॥
यथोक्तान्न करिष्यन्ति स्वांचर्यांगृहमेधिनः ॥
युगदोषाद्वरारोहे तत्तथा न भविष्यति ॥
भविष्यन्ति नसंदेहो लोभमोहसमावृताः ॥
कूटकर्म्मकराश्चैव सत्यार्ज्जव विवर्ज्जिताः ॥
नरनारीजनाश्चैव भविष्यन्ति न संशयः ॥
मातुलं भगिनीञ्चैव पितरं भ्रातरं सुतं ॥
वञ्चका वहुधालोके भविष्यन्ति परस्परम् ॥
मातापितृभ्यान्निस्नेहा नराः कार्यवशानुगाः ॥
ततस्तु लुप्तमर्यादागुरुगौरववर्ज्जिताः ॥
नशृण्वन्तिपितुः पुत्रा नस्नुषा न च भ्रातरं ॥
नभृत्या न कलत्राणि हा कष्टं युगपर्य्य ये ॥
एवं कलियुगे प्राप्ते नरनारीजनास्तथा ॥
कथं धर्म्मङ्करिष्यन्ति कलिनोपहते शुभे ॥

॥उमोवाच ॥

कथंकलियुगन्नाम आदि मध्या वसानतः ॥
श्रोतुमिच्छामितत्वेन भगवन्वक्तुमर्हसि ॥
चातुर्व्वर्णा महीपाला ये च पाखण्डदीक्षिताः ॥
युगमासाद्यते देव प्रचरिष्यन्ति वै कथम् ॥
प्रकृति विकृतिञ्चैव यद्यथा च प्रवर्त्तते ॥
तत्तथैवानुपूर्वेण भगवन्वक्तुमर्हसि ॥

॥महेश्वर उवाच ॥

पृथिव्यां भूमिपालानां सर्व्वेषान्निधनेगते ॥
समानभृत्यससुतैः समित्र गुरुवान्धवैः ॥
धर्म्मेण चोद्यमानाश्च यथाकालवशागताः ॥
अधर्म्मेण तदा देवि प्रचरिष्यन्तिमानवाः ॥
अशक्यन्तेषु दण्डेषु तथाकरशतेषु च ॥
असद्वृत्तशतैश्चापि अमर्यादा शतैरपि ॥
स्वराष्ट्रान्नाशयिष्यन्ति परराष्ट्रन्तथैव च ॥
परराष्ट्रेयथादेवि वृथास्वविषये तथा ॥
हरिष्यन्ति च वित्तानि महाक्लेशेन पार्थिवाः ॥
अन्यायेन प्रवृत्तास्तु सत्यार्ज्जवविवर्ज्जिताः ॥
श्रेष्ठिनः सार्थवाहाश्च ब्राह्मणाः क्षत्रियास्तथा ॥
कार्याकार्यविशेषज्ञ लोभमोहसमावृत्ता ॥
यथाशास्त्रं यथान्यायं न करिष्यन्ति ते तथा ॥
मूल्यक्रीतविवाहैस्तु भविष्यन्ति च ये नरा ॥
आदीन्कृत्वा महीपालान् सर्व्वलोका यशस्विनि ॥
भविष्यन्ति नसन्देहो लोभमोहसमावृताः ॥
देवानामपि येदेवा भुविदेवद्विजातयः ॥
भविष्यन्ति तदा देवि मन्त्रजाप्य विवर्ज्जिताः ॥
अहन्यहनिक्लिश्यन्ते पुत्रदारान्तरीकृताः ॥
यतयोनिर्वृतादेवि वर्त्तमानविकर्म्मसु ॥
यथातेजस्विनः पूर्व्वन्नभविष्यन्ति ते तथा ॥
यतीनाञ्चपुरा क्रोधो निर्दहेत् पृथिवीमिमाम् ॥
युगदोषाद्वरारोहेतत्तथा न भविष्यति ॥
निष्प्रभावा भविष्यन्ति यथालेख्यगतानराः ॥
परिभूतस्त्रिवर्गस्य शूद्रकर्म्मोपजीविनः ॥
भविष्यन्ति न सन्देहो वृषलीपतयो द्विजाः ॥
ब्राह्मणी पतयः शूद्रा भविष्यन्ति न संशयः
कुलानामकुलानाञ्च विशेषो न भविष्यति ॥
सर्वसंकीर्णवर्णाश्च चातुर्वर्ण भविष्यति ॥
शूद्रा विप्रसमाचाराः शूद्राचारा द्विजातयः ॥
एवं शीलसमाचाराभविष्यन्ति युगक्षये ॥
श्रुतिमन्तः प्रपन्नास्ते देवतातिथि पूजकाः ॥
शूद्रावेदानधीयाना भविष्यन्ति युगक्षये ॥
विप्रा विप्रत्वमुत्सृज्य गुप्तानिस्तृंशधर्म्मिणाः ॥

भविष्यन्ति न संदेहो राज्यपौरुषगर्व्विताः ॥
चौरप्रभाश्च चौराश्च सुरापानपरिप्लुताः ॥
हस्त्यारोहाश्वरोहाश्च सुरापानैकपाणयः ॥
शूद्राचारा भविष्यन्ति आक्रोध कलहप्रियाः ॥
छिद्रस्यान्वेषणेत्यिं शूद्रकर्म्मोपजीविनः ॥
एवं प्रवर्तमानस्य मूषिका शलभाः शुकाः ॥
ग्राम देशान्तरेष्वेव तथा क्षेत्रेखलेषु च ॥
विषमासस्यनिष्पत्तिर्म्मण्डलेषु भविष्यति ॥
क्वचित्सम्पद्यते सस्यं क्वचिद्रोषान्ना जायते ॥
एवं दुर्भिक्ष वहुलं भविष्यति युगक्षये ॥
रसातलगताकूपाः श्रोतः श्रोतः समुद्भवा : ॥
नराणां जीवनोपाया भविष्यन्ति युगक्षये ॥
नात्यन्तसुखिनो देशा न चात्यन्त सुनिश्चिताः ॥
सुखं दुःखञ्च सर्व्वेषां पर्यायेण भविष्यति ॥

॥उमोवाच ॥

यद्येवं युगदोषेण राजानो ब्राह्मणा अपि ॥
लुप्तलज्जा भविष्यन्ति स्वचर्या परिवर्ज्जिताः ॥
ग्रहाणाञ्चरितञ्चैव ऋक्षोल्कापातसंघता ॥
वियानेन गमिष्यन्ति ग्रहाणाञ्चैव विग्रहः ॥
येषां दोषेण दुर्भिक्ष हाहाभूतम्भविष्यति ॥
विरुध्यन्ति च राजानो ग्रहाणांविग्रहे सदा ॥
एतदिच्छामि विज्ञातुं भगवन् वक्तुमर्हसि ॥

॥ईश्वर उवाच ॥

श्रृणु देवि यथातथ्यं न चाहमनृतं वदे ॥
पशुपालादयो मूर्खाः ज्यौतिषज्ञानपाठकाः ॥
ग्रामे ग्रामे भविष्यन्ति ज्ञानविज्ञानवर्ज्जिताः ॥
तेष्वेवच विलुप्यन्ते नक्षत्रेषु तिथीषु च ॥
ज्योतिर्ज्ञानेषु नष्टेषु देशनाशो भविष्यति ॥
ते तथा तु ग्रहासक्ता विवर्णा देवि पर्व्वतः ॥
मृगवीथींप्रपद्यन्ते दक्षिणांदिशि संश्रिताः ॥
अवसथ्यं गमिष्यन्ति ग्रहाणां विग्रहेषु च ॥
तेषां दोषेण दुर्भिक्षं हाहा भूतं भविष्यति ॥

क्षीयन्ते ते यदा दोषा दीक्षितानां वरानने ॥
इष्टाँल्लभन्ते तस्यान्ते सुरलोकं हि मानवाः ॥९४॥
मम भक्तास्तु ये देवि पापेन नरकं गताः ॥
क्षयान्ते तस्य पापस्य उद्धरेहं गुणेन तु ॥९५॥
मयाख्यातं प्रिये तुभ्यं पृच्छसे किमतः परं ॥
कथयामि न संदेहस्तवस्नेहाद्विशेषतः ॥९६॥

॥ उमोवाचः ॥

देव देवीति मां ब्रूयात्कादेवीति अहं प्रभो ॥
अत्र मे शंसयो देव प्रसीद कथयस्व मे ॥९७॥

॥इश्वर उवाच ॥

किन्न वुध्यसि आत्मानं लोकसन्तान कारिणीं ॥
प्रकृतिस्त्वं महादेवि पुरुषोऽहं न शंसयः ॥९८॥
ब्रह्मरूपेण स्रष्टाहं विष्णोः स्थितिर्लयं स्वयं ॥
त्वया मया वरारोहे सर्व्वव्याप्तमिदं जगत् ॥९९॥
उमादेवीति गौरीति गायन्ति वरसुन्दरी ॥
कालिकाकालरात्री च सावित्री च वसुन्धरा ॥१००॥
शरण्यावरदा देवि भक्तानां भक्तिवत्सला ॥
कात्यायनीस्वधास्वाहावेतालीब्रह्मवादिनी ॥१०१॥
रौद्री च भद्रकाली च दुर्गादेवि वरप्रदा ॥
ब्रह्माणी चैव ऐशानी कौमारी च वरानने ॥१०२॥
वैष्णवी चैव वाराही माहेन्द्री वायेवेति च ॥
चामुण्डा चैव विज्ञेया महायोगेश्वरेश्वरी ॥१०३॥
आचार्या योगविद्या च विख्याता सुरसुन्दरि ॥
क्रिया पुष्टिः सुधा तुष्टिः द्युतिर्लक्ष्मी सरस्वती ॥१०४॥
मेधावुद्धिमतितृष्णानिद्राप्रीतिस्तडिच्छुभे ॥
लज्जाक्षान्तिरहिं सा च प्रकृतिस्त्रिगुणात्मिका ॥१०५॥
मन्दाकिनी तथा गङ्गा यमुना चैव नर्म्मदा ॥
गोदावरी तथातापी भीमगङ्गानदी शुभा ॥१०६॥
तुङ्गगङ्गा पद्मवती वेण्याचैव सरस्वती ॥
विपाशा घर्घराश्चैव सिन्धुश्चैव महानदी ॥१०७॥
कावेरी कपिलाख्याता याच्चान्या पुण्यवाहिनी ॥
नन्दा च उपनन्दा च करतोया महानदी ॥१०८॥

पातालेयाश्च मर्त्ये च सुरलोके च यास्त्रियः ॥
स्वर्लोके अन्तरिक्षे च दुर्गे चैव समेषु च ॥१०९॥
दिशायाम्विदिशायाञ्च सप्तलोकेषु यास्थिताः ॥
सर्व्वत्रैवस्थितादेवि यथाहं सर्वतोमुखः ॥११०॥
अरुन्धती तथा सीता देवीमन्दोदरी तथा ॥
लोकेयास्त्रीस्वरूपेण दीव्या वै देवि प्रोच्यते ॥१११॥
त्वयामया इदं व्याप्तं त्रैलोक्ये सचराचरे ॥
एतत्त्वंकथितादेवि किं भूय श्रोतुमिच्छसि ॥११२॥

॥उमोवाच ॥

यद्यहं सर्व्वगा शर्व्व सर्व्वलोके व्यवस्थिता ॥
गौरी सरस्वतीलक्ष्मी धरणी लोकधारणी ॥११३॥
सीता च पत्नीरामस्य दयितारावणस्य च ॥
तत्किमर्थमिमं जन्म गृहे वै जनकस्य तु ॥११४॥

॥महेश्वर उवाच॥

विश्वावसुर्न्नामऋषिः कुलसन्ततिकारकः ॥
तस्यपुत्रो महाभागः दशग्रीवो महावलः ॥११५॥
दशवर्षसहस्राणि वायुभक्षेण तेन वै ॥
आराधितो ह्यहं देवि छिन्दयित्वा शिराँसि च ॥११६॥
पश्चाद्गान्धर्व्वशब्देन अहं तुष्टो वरानने ॥
प्रजापति मुखेनैवं दत्तमिष्टवरम्मया ॥११७॥
पातालं मानुषं स्वर्गं त्रैलोक्यं सचराचरं ॥
स्ववश्यानि करिष्यन्ति मत्प्रसादाच्चराचरं ॥११८॥
एवं लब्धवरो देवि राक्षसो मदमोहितः ॥
त्वयावचोदितः पूर्व्वम् वरमिष्टन्ददाम्यहम् ॥११९॥
प्रत्युवाच स दीनात्मा स्त्रियायानेच्छतिवरं ॥
एवं ब्रुवतपौलस्त्य त्वञ्चापि रुषिताननाः ॥१२०॥
यस्मात्त्वं नेच्छतेमूढ स्त्रीहेतोर्म्मरणं भव ॥
नन्दिना च तथैवोक्तं वरमिष्टं ददाम्यहम् ॥१२१॥
वानरेण वरंदत्तन्नकार्यं किञ्चिदस्ति मे ॥
त्वयाशप्तोदुरात्मानो मन्दवुद्धिस्तु राक्षसः ॥१२२॥
शापितो नन्दिकेशेन वानरैश्च वधिष्यसि ॥
तेन सीताभवेद्देवि रावणस्य वधाय वै ॥१२३॥

स्त्रीरूपेण सुवेषेण कृत्वामुत्पादितामया ॥
रावणस्यवधार्थाय नन्दिशाप प्रभावतः ॥१२४॥
देवतुल्यवलाः सर्व्वे वानराः सृजितामया ॥
येनासौ रामदेवेन मयादेवैस्तु वर्ज्जितः ॥१२५॥
वानरैस्तु विनादेवि को योधयति रावणं ॥
कथितं जन्मदेवेशि जनकस्य गृहे तव ॥१२६॥
पत्नीत्वं रामदेवस्य किमन्यत्कथयामि च ॥

॥उमोवाच ॥

कोदेवो रामदेवोयं कस्यपुत्रो सुरेश्वरः ॥
किंवीर्यं वानराणाञ्च के वा वानरपुंगवाः ॥१२७॥
एतत्कथय मे सर्व्वं प्रसीद भवशंकरः ॥

॥महेश्वर उवाच ॥

राजादशरथो नाम इक्ष्वाकुकुलसम्भवः ॥
अपुत्रस्त्वभवत्सो वै धर्म्मज्ञोसत्यवाक् नृपः ॥१२८॥
वेश्याभिर्मुनिरूपाभि रानयिष्यन्नृषेः सुतं ॥
लोभयित्वाउपायेन स्वपुरं पितुराश्रमात् ॥१२९॥
राज्ञश्चापत्यलाभाय ऋष्य शृंङ्गं महामुनिं ॥
अश्वमेधं क्रतुश्रेष्ठमिष्ट्वावहु सुवर्णकं ।
रामश्च लक्ष्मणश्चैव शत्रुघ्नो भरतस्तथा ॥१३०॥
एते पुत्राः समुत्पन्नाः महावीर्यपराक्रमाः ॥
स एव रामदेवस्तु विख्यातगुणपौरुषः ॥१३१॥
नीलोत्पलदलश्याम अतसीपुष्प सन्निभः ॥
दीर्घवाहुर्विशालाक्षः पीनस्कन्धो महाद्युतिः ॥१३२॥
चापहस्तो वरारोहे अयोध्यस्त्रिदशैरपि ॥
स्वयंकृष्णश्च यो देवि शंखचक्रगदाधरः ॥१३३॥
सहस्रभुजशीर्षञ्च सहस्रायुधधृक्प्रभुः ॥
असुराणाम्वधार्थाय अवतीर्णोस्तुभूतले ॥१३४॥
ब्रह्मादीनां नियोगाद्धि विष्णुर्मानुष्यताङ्गतः ॥
त्वच्छापस्य प्रभावाच्च नन्दीशस्य च सुन्दरि ॥१३५॥
निवासितं वनेदेवि सीताहरणमोहितः ॥
वानराश्चैव ये देवि महावीर्या महावलाः ॥१३६॥

नियुक्तास्तु वरारोहे वधार्थंरावणस्य तु ॥
जम्भवस्तु भवेद्ब्रह्मा वालिइन्द्रः प्रकीर्तितः ॥१३७॥
सुग्रीवश्चैव आदित्य रुद्रोहं हनुमान्स्मृतः ॥
गवाक्षस्तु भवेद्यक्षो धनदः स्वयमेव तु ॥१३८॥
गवयरश्विनौदेवौ नलस्तु वरुणः स्मृतः ॥
वैश्वानरो भवेन्नीलो द्विजराजस्तु अंगदः ॥१३९॥
सुसेनस्तु महावीर्यः सोपि धन्वन्तरिः स्मृतः ॥
एवं रामः स्वयं विष्णुर्देवो वै वानराः स्मृताः ॥१४०॥
अशक्ता रावणं जेतुं देवरूपेण सुन्दरि ॥
विभीषणसहायस्तु रामः लक्ष्मण मारुतिः ॥
सुग्रीवप्रमुखा देवि देवकार्यं प्रचक्रिरे ॥
इत्येतत्कथितं देवि रामवानरराक्षसां ॥
अद्यापि त्वं न पर्याप्तं किंपृच्छसि वरानने

॥उमोवाच ॥

यदि विष्णुर्भवेद्देवः स्वयं स्रष्टा जगत्पतिः ॥
तत्किमर्थं भवेद्देव पुत्रोयं मानुषस्य तु ॥
एतत्कथय देवेश इदं कौतूहलं हि मे ॥

॥महेश्वर उवाच ॥

शृणुदेवि परं गुह्यं विष्णोर्जन्म महात्मनः ॥
ब्रह्मशाप प्रभावेन श्वांशेन निरयङ्गतः ॥
भृगुर्नाममहाभागो ब्राह्मण ऋषिरुत्तमः ॥
तेन संरक्षणार्थाय प्रार्थितो मधुसूदनः ॥
यज्ञं पुरुषमेधस्तु यजेहं तवतेजसा ॥
असुराद्राक्षसात्सर्व्वे तन्मेरक्षजनार्द्दनः ॥
वाचंदत्वा ततस्तेन ऋषयेस्मै महात्मने ॥
न रक्षितस्तु तद्यज्ञ असुरैस्तु विमर्द्दितः ॥
ततस्तंदोग्रतेजसा भृगुणा केशवः प्रिये ॥
शपितस्तुवरारोहे गच्छत्वं नरकादिषु ॥
तस्यशाप प्रभावेन ऋषयस्य महात्मनः ॥
नरकान्साधयेद्देवि कथितस्ते जनार्द्दनः ॥
प्रथमं मत्स्यरूपेण पातालाच्च समुद्धृताः ॥
मधुकैटभहृतावेदाश्चत्वार शिरसा शुभे ॥
द्वितीये कूर्म्मरूपस्तु क्षीराब्धौप्रविशन्शुभे ॥

मन्दरंधरति विष्णुः पृष्ठेनामृतमन्थने ॥
तृतीये नारसिंहस्तु जन्मनारायणस्य तु ॥
हिरण्यकशिपोर्नाशं कुरुते स जनार्द्दनः ॥
भूत्वा यज्ञवराहस्तु हिरण्याक्ष्यं महासुरं ॥
पृथिवीमुद्धरन्विष्णुर्हत्वादेवि चतुर्थके ॥
पञ्चमेवामनो भूत्वागत्वादेवि महाध्वरं ॥
वञ्चयित्वासुरपतिं क्रामंतिस्म त्रिविष्टकं ॥
षष्ठेतु भार्ग्गवोरामो गृहीतपरशुर्द्विजः ॥
देवि क्षत्रियहीनाञ्च करिष्यति वसुन्धरां ॥
सप्तगस्तु भवेद्रामः सुतोदशरथस्य तु ॥
वध्वामहौदधिन्देवि राक्षसानां कुलक्षये ॥
अष्टमे वासुदेवस्तु धनञ्जयसहायवान् ॥
भाराक्रान्तामिमामुर्व्वींलह्वीकर्त्ता सुचिस्मिते ॥
नवमे शाक्यगोत्रे तु सुद्धोदनसुतोवली ॥
वौद्धं धर्म्मंसमस्थाप्य करिष्येद्धर्म्म देशनः ॥
दशमेकल्किराजस्तु ब्राह्मणो हरिपिङ्गलः ॥
म्लेच्छान्संहरति देवि गृहीतस्तुः कुशायुधः ॥
ब्राह्मणो नावमन्तव्यास्त्रैलोक्यस्थितिहेतवः ॥
ये पूजिताः सुराः सर्व्वे पूजितास्तुनसंशयः ॥
विष्णोरपि प्रभुत्वेन शापानुग्रहकारकाः ॥
यै सन्तुष्टैर्भवेत्स्वर्गं नरकन्तद्विपर्ययात् ॥
तस्माच्च ब्राह्मणोमूल भोगनिश्रेयसादिषु ॥
ज्ञानमूलाः क्रियासर्व्वाः फलमूलाभियोजिताः ॥
एतत्ते कथितन्देवि किम्भूयच्छ्रोतुमर्हसि ॥

इति शिवधर्म्मोत्तरे महासम्वादे सप्तमोऽध्यायः ॥

अथ पशुपतिमते शिवधर्मोत्तरे महासम्वादे

अष्टमोऽध्यायः ॥

ॐ नमः शिवाय ॥

॥उमोवाच ॥

पृथिव्यां भगवन्देव नरनारीजनास्तथा ॥
यथोक्तान्न चरिष्यन्ति तद्भवान्वक्तुमर्हसि ॥

॥महेश्वर उवाच ॥

पृथिव्यां तु वरारोहे नरनारीजनास्तथा ॥
यथोक्तान्न करिष्यन्ति स्वांचर्यांगृहमेधिनः ॥
